तन्त्रागमेषु परादिवाणी विमर्शः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

विद्यावारिधिः (पी-एच्० डी०) इत्युपाधये

प्रस्तुतः शोधप्रबन्धः

१९९१

निर्देशकः

डॉ० रामचन्द्रशुक्लः

आचार्योध्यक्षश्च

व्याकरणविभागे

संकायाध्यक्षश्च

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये, वाराणस्याम् ।

गवेषकः

विन्ध्यवासिनीशरणपाण्डेयः

नव्यव्याकरणाचार्यः

प्राध्यापकः, व्याकरणस्य

श्रीरामसंस्कृत-महाविद्यालये,

विजयीपुरे, गोपालगञ्जे, विहारप्रान्ते ।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी-२

विक्रम संवत् २०४८

कार्तिकशुक्ल हरिप्रबोधनी एकादशी ।

दिनांक :- १८-११-१९९१

T.O.
262

तन्त्रागमेषु परादिवाणी विमर्शः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

विद्यावारिधिः (पी-एच्० डी०) इत्युपाधये

प्रस्तुतः शोधप्रबन्धः

१९९१

निर्देशकः

डॉ० रामयत्नशुक्लः

आचार्योध्यक्षश्च

व्याकरणविभागे

संकायाध्यक्षश्च

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये, वाराणस्याम् ।

गवेषकः

विन्ध्यवासिनीशरणपाण्डेयः

नव्यव्याकरणाचार्यः

प्राध्यापकः, व्याकरणस्य

श्रीरामसंस्कृत-महाविद्यालये,

विजयीपुरे, गोपालगञ्जे, विहारप्रान्ते ।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी-२

विक्रम संवत् २०४८

कार्तिकशुक्ल हरिप्रबोधनी एकादशी ।

दिनांक :– १८–११–१९९१

प्रसारणम्

श्रीमता विन्ध्यवासिनीशरणपाण्डेयेन विद्यावारिध्युपाधि मधिगन्तुं मन्निर्देशने " तन्त्रागमेषु परादिवाणी विमर्श" इतिविषय-मधिकृत्य सम्यगनुसन्धाय शोधप्रबन्धः पूर्णतां नीतः । अनुसन्धात्रानेन प्रबन्धे प्रकृतशोधोपयोगिविशिष्टाभिमताख्यानां सरल शैल्याविष्करणं व्यधायि। स्वगुणमहिम्ना चायं शोधप्रबन्धः प्रकाशनार्हः परीक्षार्हश्चेति प्रतिभाव-तोऽस्य कृती गवेषकस्योन्नयनकामोऽग्रेसारयति ।

रामयत्न शुक्ल

(डॉ० रामयत्न शुक्लः)

उत्तमोऽयं शोधप्रबन्धः स्वीकरोतीति

रामयत्न मिश्रः

३२२/८२ परीक्षकः

२६।१२।८२

विषयानुक्रमणिः

पृष्ठाङ्काः

प्रस्तावना-

भूमिका -

प्रथमाऽध्याये-

तन्त्रशब्दनिरुक्तिः १-४

आगमशब्दविचारः ५-६

तन्त्रागमयोरैक्यम् ७-८

तन्त्रागमेन व्याकरणागमस्य सम्बन्धः ८-११

चतुर्दशमाहेश्वरसूत्रमुद्दिश्य व्याकरणशास्त्र
प्रवृत्तौ आगमस्यैव प्रभावः १२-१६

तन्त्रागमे माहेश्वरसूत्राणां तत्त्वज्ञानान्वविमर्शः १६-१७

उपनिषत्स्वाहमितिपदस्य निर्देशः १७-

विरूपाक्षपञ्चाशिकायामहमित्यस्य विचारः १७-१९

परिवृत्त्याहरत्वे अहमितिवर्णविरचितस्य माहेश्वर-
सूत्रसमुदायस्य सर्वशक्तिमत्त्वम् २०-२१

नित्याषोडशिकार्णवे माहेश्वरसूत्रोक्तवर्णानां
स्थितिसमीक्षणम् । २१-२३

परात्रिंशिकादृष्ट्या माहेश्वरसूत्रोक्तवर्णसमीक्षणम् २३-

अन्यतन्त्रागमग्रन्थेषु माहेश्वरसूत्रोक्तवर्णस्थितिः २३-२७

कामधेनुतन्त्रे वर्णमातृकास्वरूपम् २७-२८

पृष्ठाङ्काः

द्वितीयोऽध्यायः

व्याकरणशास्त्रस्येतिहासः	२९ - ३०
संस्कृतभाषायाः व्यापकता	३० - ३१
व्याकरणशास्त्रस्योत्पत्तिरुपादेयता च	३१ - ३४
व्याकरणशास्त्रस्यादिप्रवक्ता ब्रह्मा	३४ - ३४
ब्रह्मणः शास्त्र प्रवचनम्	३४ - ३५
व्याकरणशास्त्रस्य द्वितीयः प्रवक्ता बृहस्पतिः	३५ - ३६
व्याकरणशास्त्रस्यादिप्रणेता इन्द्रः	३७ - ३७
अष्टव्याकरणप्रकाराः	३८ - ३८
नवसंख्याकं व्याकरणम्	३८ - ३९
पाणिनेः प्राचीनाचार्याः	४० - ४०
प्रातिशाख्यादिग्रन्थे वैदिकव्याकरणप्रकारः	४० - ४२
पाणिनेरर्वाचीनाचार्याणां सङ्केतः	४२ - ४३
पाणिनीयाष्टके नुल्लिखिताः प्राचीनाचार्याः	४२ - ४३
शिवः महेश्वरः	४४ - ४५
बृहस्पतिः	४५ - ४५
इन्द्रः	४५ - ४७
वायुः	४७ - ४८
भरद्वाजः	४८ - ४९
भागुरिः	४९ - ५०
पौष्करसादिः	५१ - ५१
चारायणः	५१ - ५१
काशकृत्स्नः	५२ - ५२
शन्तनुः	५२ - ५३
वैयाघ्रपद्यः	५३ -
माध्यन्दिनिः	५४ -

	पृष्ठाङ्काः
रौढ़िः	५४
शौनकिः	५५
गौतमः	५५
व्याडिः	५६-५७
पाणिनिकाष्टाध्याय्यामनुक्ता आचार्याः	५७
आपिशलिः	५७
काश्यपः	५८
गार्ग्यः	५८
गालवः	५९
चाक्रवर्मणः	५९
भारद्वाजः	६०
शाकटायनः	६०
शाकल्यः	६१
सेनक	६१
स्फोटायनः	६२
पाणिनिः	६२-६६
अष्टाध्यायीग्रन्थस्य वार्त्तिककाराः	६७
कात्यायनः	६७-६९
भरद्वाजः	६९-७०
सुनागः	७०-
क्रोष्टा	७१
वाडवः	७१
व्याघ्रभूतिः	७१-७२
वैयाघ्रपद्यः	७२-
हेलाराजः	७३
राघवसूरि	७३

	पृष्ठाङ्का:
रामचन्द्रः	८३ -
महाभाष्यकारः पतञ्जलिः	८४ - ८५
भर्तृहरिः	८५ - ८९
व्याकरणेदर्शनपक्षस्याविर्भावः	११० -
शब्दसाधुत्वधारा	११० - ११२
परिष्कारधारा	११२ - ११३
दर्शनधारा	११३ - ११४
व्याकरणशब्दार्थः	११४ - १३१
व्याकरणदर्शनस्यागमिकत्वे	१३२ - १४२
चत्वारिशृङ्गादि—मन्त्रद्वयस्यव्याख्या	१४२ - १४३
चत्वारिवाक्परिमितानी—त्यादिमन्त्रस्य तन्त्रागमानुसारि व्याख्यानम् ।	१४३ - १५०

तृतीयाध्याये-

✓ महाभाष्ये पस्पशाह्निके परादिवाग् विमर्शः	१५१ - १५५
✓ भर्तृहरिमते परादिवाग्विमर्शः	१५६ - १५८
✓ नागेशभट्टमते परादिवाग् विमर्शः	१५९ - १६१
✓ नागेशाभिमतपरादिवाग्विमर्शस्तन्त्रागमानुसारी एव	१६२ - १६-
तन्त्रागमव्याकरणागमयोरैक्यम्	१६० - १६०
आगमशब्द निर्वचनम्	१६० - १६९
चतुर्दशमाहेश्वरसूत्रविषयकवैयाकरणानां सम्मतिः	१६९ - १७०

पृष्ठाङ्काः

चतुर्थोऽध्याये-

त्रिकदृष्टिग्रन्थरीत्या परादिवाग् विमर्शः १८१ - १८६
व्याकरणतन्त्रागमग्रन्थानुसारं परादिवाग् विमर्शः १९० - १९०
क्रमदर्शने परतत्त्वम् १९० - १९२
कुलदर्शने परतत्त्वम् १९२ - १९२
प्रत्यभिज्ञादर्शने परतत्त्वम् १९२ - १९८
योगिनो हृदये परादिवाग् विमर्शः १९८ - २००
कुण्डलिनीशक्तेरेव परादिशब्दव्यवहारः २०१ - २०८
परकुण्डलिनी स्वरूपम् २०९ - २१०
षट्चक्राणां परिचयः २१० - २११
मूलाधारचक्रवर्णनम् २११ - २१२
मूलाधारचक्रे डाकिन्याः स्थितिः २१३ - २१३
तत्रस्थस्वयम्भूलिङ्गस्यावस्थितिः २१३ -
स्वयम्भूलिङ्गोर्ध्वे कुण्डलिन्याः स्थितिः २१४
कुण्डलिन्याः ध्यानफलम् २१४
स्वाधिष्ठानचक्रम् २१४ - २१५
तत्र भौममण्डलं तत्र च वरुणबीजस्थितिः २१५
वरुणबीजस्याङ्के विष्णोरवस्थानम् २१५
मूलाधारादिषट्पद्मान्तर्गतशक्तीनां स्थितौ २१५
मणिपूरचक्रम् २१६
तत्र पद्मे लाकिनीशक्तेरवस्थितिः २१६
मणिपूरचक्रचिन्तनफलम् २१६
अनाहतचक्रम् २१६
तत्र वायुबीजं तत्र राशिस्थितिश्च २१६
तत्पद्मकर्णिकायां काकिनीशक्तेरवस्थितिः २१७
अनाहतचक्रचिन्तनफलम् २१८

पृष्ठाङ्काः

विशुद्धिचक्रम् २१२

विशुद्धिपद्मकर्णिकायां शाकिनीशक्तेश्चन्द्र २१२

मण्डलस्य चावस्थितिः

एतत्पद्म चिन्तनफलम् २१६

आज्ञा चक्रम् २१६

आज्ञापद्मकर्णिकायामस्याः कर्णिकान्तस्त्रिकोणे - २२०

चैतन्याख्यशिवस्य प्रणवस्य च स्थितिः

आज्ञाचक्रचिन्तनफलम् २२०

सहस्रारचक्रम् २२०

सहस्रदलकमलध्यानफलम् २२२

शिवशक्त्योः सामरस्येप्रकाशविमर्शात्मतत्त्वनिष्पत्तिः २२५ - २३८

पञ्चमाऽध्याये-

परादिस्वरूपप्रदर्शनपुरस्सरं शब्दसृष्टिवादः २३५ - २३६

अर्थसृष्टिवादश्च

श्रीतन्त्रालोकग्रन्थानुसारि सृष्टिः २३६ - २४०

वरिवस्यारहस्ये सृष्टिक्रमः २४० - २४१

प्रपञ्चसारे सृष्टिक्रमः २४१ - २५०

व्याकरणशास्त्रीयस्फोटस्य परादावेवान्तर्भावः २५१ - २५२

स्फोटस्याखण्डत्वम् २५३ -

ध्वनिस्फोटतादात्म्यविचारः २५३ - २५४

स्फोटशब्द व्युत्पत्तिविचारः २५५ - २५६

नादध्वनिस्फोटेषु भेदः २५६ - २५८

नादतत्त्वस्य स्वारस्यम् २५८ - २६०

भास्करराय-लक्ष्मीधरयोरत्र स्वारस्यम् २६१ - २६०

नादादिप्रकरणानुसृत्यवरिवस्यारहस्ये

सौन्दर्यलहरी ग्रन्थेनादबिन्दुमधिकृत्य

लक्ष्मीधराचार्याः २६१ - २६४

उपसंहारः परिशिष्टम् २६५ - ३०

"उपोद्घातः"

"प्रयोजनमनुद्दिश्य मन्दोऽप्यप्रवर्तते" इत्युक्त्यानिष्प्रयोजने कर्मणि मन्दानामव्यप्रवृत्त्या सचेतसां प्रयोजने किल वर्तते किञ्चित्तत्त्वम्। आचार्यकक्षायामध्ययने प्रवृत्तो हं वाचां चातुर्विध्यं श्रावं-श्रावमचिन्तयम्, यदाशां चातुर्विध्यस्य मूलतत्त्वं कुतःसमुदेति ? जिज्ञासयैनामाध्याय यदा कदा हं तन्त्रागमग्रन्थानामप्यध्ययने प्राभवम् । सत्यान्च व्याकरणाचार्योत्तीर्णपरीक्षायामध्ययनकालादेव जागृतेयं मदीया जिज्ञासा वद्धमूला, दृढसङ्कल्पा च भूतवती । तदनु स्वाध्यायेन गुरुभिःप्रबोधनेन च यत्किञ्चिल्लब्धं तदत्र प्रबन्धे मया निबद्धम् । तत्र सुधिय एव प्रमाणम् ।

मुखं व्याकरणं स्मृतमित्यभिजनोक्त्या प्रधाने च कृतो यत्नः फलवान् भवति" इति महाभाष्यप्रामाण्येन च "कणादं च पाणिनीयन्च सर्वशास्त्रोपकारकमित्यनुसृत्य व्याकरणशास्त्रस्य दर्शनत्वविषयं विविच्यते किञ्चित् ।

व्याकरणस्य दर्शनत्वम्

"आत्मा वा अरे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] "य आत्मा पहतपाप्मा,सोऽन्वेष्टव्यः स विजिज्ञासितव्यः"[2] आत्मेत्येवोपासीत"[3] आत्मानमेव लोकमुपासीत"[4] "ब्रह्मवेद ब्रह्मैव भवति"[5] इत्यादिश्रुतिभिः प्रत्यगात्मसाक्षात्कारस्यैव परमपुरुषार्थमोक्षसाधनत्वं

---

1. बृहदारण्यकोपनिषदि 2-4-5
2. छान्दोग्योपनिषदि 8-7-1
3. बृहदारण्यकोपनिषदि 1-4-7
4. " " 1-4-15
5. मुण्डमालातन्त्रे 3-2-9

समर्थितम् । तादृशसाक्षात्कारसाधकानि वेदान्तादीन्येव शास्त्राणि दर्शनशास्त्रव्यपदेश्यानि भवितुमर्हन्ति, न तु पदसाधुत्वासाधुत्वसाधनेन शब्दसाक्षात्कारसाधकं शब्दशास्त्रं दर्शनशास्त्रपदव्यपदेश्यतामादधीत ।

अत्रेदं तात्पर्यम् - यद्व्याकरणग्रन्थेषु दर्शनशब्दप्रवृत्ति-निमित्तमधिकृत्य शास्त्रीयपद्धत्या न क्वचनापि कश्चनापि विचारलेशो निभाल्यते, तथापि येषु शास्त्रपदवाच्येषु किं वस्तु ? क आत्मा ? किं तत्स्वरूपम् ? कानि च तत्साधकानि प्रमाणानि ? को मोक्षः ? इत्यादयोऽध्यात्मविषयाः प्राधान्येन प्रतिपादिताः भवेयुः । प्रसङ्गो-पात्तानां लौकिकानामपि विषयाणां विवेचनतात्पर्यं यदि तत्रैव पर्य-वस्येत्, तान्येव दर्शनशास्त्रव्यपदेश्यतां समुपयान्तीति पण्डितमण्डलीषु प्रचलन्ती काचन परम्परा पर्यालोच्यते । नैवम्भूतं व्याकरणशास्त्रम् । केवलमत्र पदसाधुत्वासाधुत्वाख्यानमेव विज्ञायतेतमामिति कथङ्कारमस्य दर्शनशास्त्रत्वमिति संप्रीतिःकदाचिद् विदुषामपि मानसे मनाक् पदं निदध्यादित्यत्र व्याकरणग्रन्थेषु निगूढानि प्रस्थानग्रन्थेषु प्रपञ्चितानि न दर्शनतत्त्वानिसंक्षिप्य संगृह्यन्ते ।

तपःस्वाध्यायसततनिरतैर्विगतकल्मषैःसमाधिसमाहित-स्वान्तैर्ऋषिभिः स्वेन स्वेनार्षेण चक्षुषा स्वेस्वे निर्विकल्पे समाधौ सम्प्र-त्युपलभ्यमानानां चेतनाचेतनभेदेन द्विविधमाप्तानां पदार्थानां सर्वग्राह्य-ग्राहकाकाररहितमपरिच्छिन्नं सर्वतः संप्लुतकमं यन्मूलतत्त्वं दृष्टमनुसंहितं च तदेव च तत्तन्मतानुयायिनां सर्वेषां प्राणिनां परमपुरुषार्थसाधनतया-भीप्सिततमम्, तदेव च दर्शनम् । तत्प्रतिपादकानि शास्त्राण्यपि दर्शना-भिधानानि, "शिष्यतेऽनुशिष्यते पूर्णोऽर्थो बोध्यते नेन-दृश्यते बोध्यते-

पूर्वोऽर्थत्वेन "इति विग्रहाभ्यां दर्शनशास्त्रपदयो:पर्यायवाचकत्वात् । एवञ्च दार्शनिकान्तरैरिव शाब्दिकशार्दूलैरपिशब्दतत्त्वं मूलतत्त्वरूपेणसमाधौ साक्षात्कृतम्, तस्यैव च प्रत्यगात्मस्वरूपत्वेन व्याकरणस्याप्यध्यात्मज्ञानो- पायभूतत्वाद्दर्शनशास्त्रत्वे न विप्रतिपद्येरन् मात्सर्यविधुरा विद्वांस:।

अत्रेदमाकूतम् - "सदेव सोमेदमग्र आसीदेकमेवाद्वितीयम्" ब्रह्मैवेदं सर्वम् "आत्मैवेदं सर्वम्" इत्यादिभि:श्रुतिभिर्जगत्कारणस्य सत्यत्व- मेकत्वं ब्रह्मत्वमात्मत्वञ्च यथाप्रतिपाद्यते , तथा -

वागेवार्थंपश्यति वाग् ब्रवीति वागेवार्थं निहितंसन्तनोति।
वाच्यैव विश्वं बहुरूपंनिबद्धं तदेतदेकंप्रविभज्योपभुङ्क्ते।।"

"ओमित्येकाक्षरमिदं सर्वम्" "ओमिति ब्रह्म "इत्यादिश्रुतिभि:शब्दस्वरूपतापि प्रतिपाद्यत इति शब्दब्रह्मैव जगत्कारणम् । अस्य स्वप्रकाशकत्वमपि "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुत्या प्रतिपाद्यते । हेलाराजो पि - "इह त्रीणि ज्योतिषी त्रय:प्रकाशा:स्वरूपपररूपयोरवद्योतका तद्यथा यो यं जातवेदा:, यश्च पुरुषेष्वान्तर:प्रकाश:, यश्च प्रकाशप्रकाशयो: प्रकाशयिता, शब्दाख्य:प्रकाशस्तत्रैतत् सर्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु च "अभियुक्तोक्त्याऽनया शब्दतत्त्वस्य स्वप्रकाशकत्वं समार्थ्यत ।

ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेवेते पृथगिव स्थिते ।।इति

१॰ वा॰ ब्र॰ 55

प्रतिपादयन् हरिरप्यत्र परमानुकूलतां भजते । यथा तेजस:प्रदीपादे:, ग्राह्यत्वं ज्ञानविषयत्वम्, ग्राहकत्वं घटादिविषयकज्ञानजनकत्वं चेति द्वे ग्राह्यत्वग्राहकत्वरूपे शक्तीस्त:, तथैव सर्वशब्दानामेतेग्राह्यत्वग्राहकत्व-शक्ती, शक्तिशक्तिमतोरभेदाद् नित्यमात्मभूते अपि भिन्न इव स्थिते प्रतिभासमाने स्त इत्यर्थ: । शब्द: स्वं प्रकाशयन्नेवार्थं प्रकाशयतीति कारिकाया निर्गलितोऽर्थ: ।

एतदेव" अन्यदेव तद्विदितादयो अविदितादधि"[1] इत्यनेनात्मनो ब्रह्मत्वे प्रतिपादिते" कथं त्वात्मा ब्रह्म ? आत्मा नामाऽधिकृत: कर्मण्युपासने च । संसारी कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान् स्वर्गं वा आसादयितुमिच्छति ।तस्मादन्य उपास्यो विष्णुरीश्वर इन्द्रश्च प्राणो वा ब्रह्मभवितुमर्हति, न त्वात्मा लोक प्रत्ययविरोधात् । तार्किका अपि ईश्वरादन्यमात्मानमाचक्षते । मीमांसकाश्च-"शर्म यजासुं यज"इत्यन्या एव देवता उपासते । तस्मा-दुक्तं यद्विदितमुपास्यं तद् ब्रह्म भवेत्ततोऽन्य उपासक इत्यस्याऽविप्रति-पत्तेर्विपात्नाय सिद्धान्ततया यच्चैतन्यमात्रसत्ताकमक्रमं शब्दतत्त्वं वाचा सक्रमया वर्णपदवाक्यरूपया नाऽभ्युद्यते, येन वाक्रमेण शब्दतत्त्वेन सक्रमा वागभ्युद्यते तद् ब्रह्म । इदं यदनात्मभूतमुपाधिभेदविशिष्टमी-श्वराद्युपास्यते तन्न ब्रह्मेति विद्धि"इत्यर्थिकया "-

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।[2]

---

1. केनोपनिषदि 1-3
2. " 1-4

अनया श्रुत्या ब्रह्मपदेन प्रतिपादितम् -

य: स्फोटम्=स्फोटाभिव्यञ्जकं ध्वनिं शृणोति, सुषुप्ते इन्द्रियगणे विलीनेऽपि शून्यम्=अज्ञानं पश्यतीति शून्यदृक् सुप्तोत्थितस्य "न किञ्चिदवेदिषम्"इति स्मरणं तदानीमज्ञानानुभवं साधयति, येनाक्रमेण प्रणवेन वाग् व्यज्यते, यस्य चात्मन:सकाशाद् हृदयाकाशे प्रत्यक्षम्, स परमात्मा इत्यर्थकेन -

"शृणोति य इमं स्फोटं सुप्ते श्रोते च शून्यदृग् ।
येन वाग् व्यज्यते तस्य व्यक्तिराकाश आत्मन:।।

इत्यनेन भागवतेनापि परमात्मपदेन तदेव वस्तु समर्थितम् ।

भगवती गीतापि-"ईश्वर:सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"[1] इत्यनेन ईश्वरपदेन तत्त्वं प्रतिपादयति । तथा चोक्तं नागेशभट्टेन -"चतुर्विधा हि वागस्ति परा-पश्यन्ती, मध्यमा, वैखरी च । तथा मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । नाभिपर्यन्तमागच्छता येन वायुना भिव्यक्ता [हृदयदेशे शब्दब्रह्मरूपा [मनोगोचरी भूता पश्यन्ती वागुच्यते । एतद्द्वयं [परा रूपं पश्यन्ती रूपम्] वाग् ब्रह्म योगिनां समाधौ निर्विकल्पक सविकल्पकज्ञानविषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता येन वायुना भिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते"[2] एवञ्च व्यासनागेशयोरैक्यं स्पष्टमेव प्रतीयते ।

1· गीतायाम् 18-61

2· परमल.मं.स्फोटविचारे पृ.68-67

सर्वग्राह्यग्राहकाकारवर्जिता अपरिच्छिन्ना सर्वत:
संहृतक्रमा ब्रह्मापरपर्याया पश्यन्ती वाग् अविद्यालक्षणया अन्त:पश्यद-
वस्था भोक्तृतारूपया विशिष्टं ज्ञेयस्पर्शशून्यं चैतन्यमात्रं जीव इत्यभिधीयते
यथा भागवते -

स एष जीवो विवरप्रसूति:प्राणेनघोषेण गुहांप्रविष्ट:।
मनोमयं सूक्ष्ममुपेत्यरूपं मात्रा स्वरो वर्ण इति स्थविष्ठ:।।[1]

स एष:= अपरोक्ष:,जीवयतीति जीव:=परमेश्वर:,
अपरोक्षत्वे हेतु:-विवरेषु=आधारादिचक्रेषु प्रसूतिरिवप्रसूतिरभिव्यक्तिर्यस्य
स:,तामेवाभिव्यक्तिमाह-घोषेणेति । घोषेण पराख्येन नादवता प्राणेन
सह,गुहामाधारचक्रं प्रविष्ट:सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्य-
माख्यं च मणिपूरचक्रे विशुद्धिचक्रे च,उपेत्य:प्राप्य,वक्त्रे मात्रा=ह्रस्वादि
स्वर:=उदात्तादि:,वर्ण: = अकारादिरित्येवं वैखर्याख्य:,स्थविष्ठ:
अतिस्थूलो नाना वेदशाखात्मको भवति ।

तथा च श्रुति: -

"चत्वारि वाक् परिमितापदानि तानि विदुर्ब्राह्मणा-
ये मनीषिण: ।
गुहा त्रीणि निहितानेङ्गयन्ति तुरीयं वाचो मनुष्या-
वदन्ति ।।इति ।

निगमरूपो यं मन्त्रो नेकधा मुनिभिराचार्यैश्च
व्याख्यायते । नामाख्यातोपसर्गनिपातेति भेदचतुष्टयमुपक्रम्य महाभाष्ये
व्याख्यात:,पशुषु वाच एको भाग:,पक्षिष्वेक:,सरीसृप्स्वेक:तुरीयस्तु
मनुष्येष्वित्यपि क्वचिद् व्याख्यायते । परं परापश्यन्तीत्यादिभेदचतुष्ट-
यानुवादेन तु समनुगतार्थमिदं सुस्पष्टतया भवति"तुरीयं वाचो मनुष्या-

----

1. श्रीमद्भागवते ।। स्कन्धे ।। अ० ।7 श्लोक ।

वदन्ति "इति । एवञ्च सम्मुग्धज्ञानरूपया पश्यन्त्या स्फुटज्ञानरूपया च मध्यमया वैखरी वागियमर्थाववोधक्षमा भवतीति न को प्यत्र विवादावसर:॥। अभियुक्तश्लोकश्च -

> या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
> वर्णानन्त:प्रकटकरणै:प्राणसङ्गात् प्रसूते ।
> तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
> वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये।।इति

इति श्रीधरस्वामी -

पश्यन्त्येव च वक्त्रकुहरं प्राप्ता कण्ठादिस्थान भागेषु - विभक्ताकारादिवर्णरूपा वैखरी वागुच्यते । तत: सैव वाह्यार्थवासनया विधारूपया क्रमेण घटपटाद्याकारैर्विकृता चक्षुरादिना गृह्यते । तिस्र एव वाच:" इति मतेनेदम्, परा वाग् चतुर्थी "इति मते तु परैव वाग् ब्रह्मरूपेति विवेक: ।

अवेदमाकूतम्-कार्येषु कारणधर्मसमन्वयदर्शनाद् वैशेषिकैर्घटादिकार्यस्य पृथिवीत्वेन, तत्कारणस्य परमाणो: पृथिवीत्वम्, सांख्यैश्च विकारग्रामेषु सुखादिसमन्वयदर्शनात् कारणस्य प्रधानस्य सुखादिरूपत्वं यथा आस्थीयते, तथैव घटादिषु शब्दरूपानुगमात् तत्कारणस्यापि शब्दरूपत्वं शाब्दिकै:स्वीक्रियते । जात्यादीनां मिथो विशेष्यविशेषणभावानवगाहिजात्यादिस्वरूपावगाहि "घटघटत्वे "इत्येवरूपं निर्विकल्पकम्, "गौ: शुक्ल:, चल:, डित्थ:इत्यादिविशेष्यविशेषणभावावगाहिसविकल्पकं वा शब्दानुविद्धमेवेति सर्वे र्था:सर्वथा सर्वदा सर्वत्र नामधेयेनान्विता इति नास्ति सोऽर्थो य: कथञ्चित् कदाचित् क्वचिन्नामधेयेन वियुज्येतेति

शब्दार्थयोस्तादात्म्यमभ्युपेयम् । अत एव अर्था: प्रतीयमाना नामधेयै-रूपेता: स्वसामानाधिकरण्येनावगम्यते गौरित्यर्थ: अश्वइत्यर्थ इति ।

एवञ्च निर्विकल्पकं सविकल्पकं वा ज्ञानं "गौ: शुक्ल:, चल:, डित्थ:, इति शब्दविशिष्टमेवार्थमवबोधयति । शब्दाख्यविशेषणानुरक्तस्य तस्य विशेष्यस्य स्वरूपं पृथक्त्वं शब्देनैव दर्शयसि, शब्दापरित्यागलब्ध-प्रकाशस्वरूपया वा ऽनुभूत्यानुभवतीति सो ऽपि विशेष्य:शब्दरूपएवेति जानीहि । शब्दं एवार्थोपारूढ:प्रतिभातीति व्यवतिष्ठते । अथ च यदुपारूढ: शब्द:प्रकाशते, तस्य पृथक् प्रदर्शयितुमनुभवितुं वाशक्यत्वा-च्छब्द एव तथा प्रतिभाति । यथा चेन्द्रियजज्ञानेषु पक्रमस्तथा शाब्दे-ष्वपि प्रत्ययेषु शब्दविशिष्टो वा ऽर्थ: शब्दारूढो वाऽर्थ प्रतिभातीति शब्दविवर्त एवायमर्थो नान्य: कश्चित् । अतश्च शब्दब्रह्मैदमेकमविद्यो-पाधिदर्शितविविक्ता ऽदमविद्योपरमेयथावस्थितरूपं प्रकाशत इति सिद्धम्। तदुक्तम् -

अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।इति

श्रुतिश्चाप्यमुमर्थमनुमोदते -

"वागेव विश्वा भुवनानि जज्ञे नामैवेदं रूपत्वेन ववृते

शिवदृष्टावपि शब्दविवर्तवाद:शाब्दिकसिद्धान्तत्वेनानूदित: -

इत्याहुस्ते परं ब्रह्म यदनादि तथाक्षयम् ।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक् ।

1· वाक्यपदीये ब्रह्मकाण्ड का० ।

5

ए एवात्मा सर्वदेहव्यापृतत्वेन वर्तते ।
अन्त: पश्यदवस्थैव चिद्रूपत्वमरूपकम् ।।इति
तावद् यावद् पराकाष्ठा यावत् पश्यन्त्यनन्तकम् ।
अक्षादिवृत्तिभिर्हीनं देशकालादिशून्यकम् ।।
सर्वत: क्रमसंहारमायमाकारवर्जितम् ।
ब्रह्मतत्त्वं पराकाष्ठा परमार्थस्तदेव स: ।।
आस्ते विज्ञान रूपत्वे स शब्दोऽर्थ विवक्षया ।
मध्यमा कथ्यते सैव बिन्दुनादमरूत्क्रमात् ।।
सम्प्राप्ता वक्त्रकुहरं कण्ठादिस्थानभागश: ।।[1]
वैखरी कथ्यते सैव बहिर्वासनया क्रमात् ।।इति

घटादिरूपैर्व्यावृता गृह्यते चक्षुरादिना ।

यद्यपि -

"शब्दस्य परिणामो मित्याम्नायविदो विदु: ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत[2] ।।इति

इत्यत्र संसारो यं शब्दब्रह्मण:परिणाम: प्रतिपादित: अत्र तु विवर्त:प्रतिपाद्यते । अनयोश्च भूयान् भेद:। उपादानसमसत्ताककार्यापत्ति: परिणाम:यथा दुग्धस्य दधिभवनम्,उभयोरपि व्यावहारिकसत्वात् । उपादानविषमसत्ताककार्यापत्तिर्विवर्त:, यथा शुक्तिकायारजतभवनम्,शुक्तिकाया व्यावहारिकसत्त्वाद्रजतस्य च प्रातिभासिकसत्वात् तथापि "शब्दस्य परिणामो यम्"इत्युपक्रम्य "विश्वं व्यवर्तत"इत्युपसंहारात् परिणामविवर्तयो:पर्यायत्वेन वाक्यपदीये

---

*• वाक्यपदीये ब्र०का० का० ।2। टीकायाम् ।

1• शिवदृष्टौ

2• वाक्य० ब्र० ।2० का०

प्रयोगो दृश्यते । शान्तरक्षितेनापि "अनादिनिधनम्" इति कारिकाम्-

"नाशोत्पादसमालीढं ब्रह्मशब्दमयं च तत् ।
यत्तस्य परिणामो यं भावग्राम: प्रतीयते ।।[1]

इत्यनेनार्थतोऽनुवदता विवर्तपदमपहाय परिणामपदं प्रयुक्तम्। भवभूतिना च जलविकारे तरङ्गादौ -

पृथक् पृथगिवाश्रयते विवर्तान्
आवर्तबुद्बुदतरङ्गमयान् विकारान् ।

इत्यनेन विवर्तपदं प्रयुक्तम् । एवञ्च कतरस्मिन् वाक्यपदीयकारस्य तात्पर्यमिति निर्धारयितुं यद्यपि न शक्यते, हेलाराजादिव्याख्यानेन शब्दब्रह्मविवर्तवाद एव तात्पर्यमध्यवसातुं शक्यते । "इह त्वविसंवादात् प्रमाणे सदर्थातादात्म्यं शब्दस्य साधयत्वेव "इति

त्वविसंवादात् प्रमाणं सदर्थातादात्म्यं शब्दस्य साधयत्वेव "इति तात्पर्य टीका दर्शनात् न्यायमञ्जरीदर्शनाच्च शब्दपरिणामवादो पि केषाञ्चिद् वैयाकरणानामभिमत आसीत् । यतो हि वैयाकरणमतप्रत्याख्यानाय तयो: प्रवृत्ति: ।

शब्दतत्त्वाख्यं ब्रह्म प्रथमं स्वलिङ्गं त्रिमात्रमोङ्कारं ततोऽक्षरसमाम्नायं ततश्चतुरो वेदान् विरचय्य सर्वं जगत् व्यरीरचत् । उक्तञ्च -

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यत: सर्वा:प्रवृत्तय: ।।इति

1· तत्त्वसंङ्ग्रहे का· 128

शब्दतत्त्वाख्यं ब्रह्म च सूक्ष्मप्रणवरूपं परब्रह्मपदेनत्रिमात्र-मोङ्कारं चापरब्रह्मपदेन शब्दब्रह्मपदेन च व्यपदिशन्ति पुराविदः। तथा च श्रुतिः -

"एतद्वै सत्यकामपरं चापरं च ब्रह्मयदोङ्कार३।
तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति ।।"[1] इति

एतेनायतनेन= परब्रह्मप्राप्तिसाधनेन ओङ्कारेणएकतरम्= परब्रह्म अनुगच्छति ।नेदिष्ठं ह्यालम्बनं परब्रह्मणो यदोङ्कार इति फलितार्थः ।

अत एव -

द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म परं च तत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।इति

स्मृतिरपि सङ्गच्छते । शाब्दिकैस्तु परं ब्रह्मैव शब्द-ब्रह्मपदेनोच्यते । एतच्चोपनिबद्धममृतं शब्दब्रह्म शाब्दिकः समश्नुते । उक्तञ्च भाष्ये -"एकःशब्दःसम्यग् ज्ञातः सुष्ठु प्रयुक्तःस्वर्गे लोके च कामधुग् भवति"इति[2] तथाहि व्यवस्थितसाधुत्वेन रूपेण शब्दतत्त्वे संस्क्रियमाणे पथ्भ्रंशरूपप्रतिबन्धकापगमे धर्मविशेष आविर्भवति, ततः शब्द-ब्रह्मतादात्म्योपगमरूपा ब्रह्मणः प्राप्तिर्भवतीति ।
तथा चोक्तं हरिणा -

"तस्माद्यः शब्दसंस्कारः सा सिद्धिःपरमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ।।इति[3]

"द्वौ शब्दात्मानौ कार्यो नित्यश्च । तत्रान्त्यः सर्वेश्वरःसर्वशक्तिर्महान् शब्दवृषभः तस्मिन् खलु वाग्योगविद् शास्त्र-जशब्दज्ञानपूर्वकं प्रयोगेण क्षीणपापःपुरुषो विच्छिद्याहङ्कारग्रन्थीन्

1· प्रश्नोपनिषदि 5-3 2· महाभाष्ये पस्पशाह्निके ।
3· वाक्यपदीये ब्रह्मकाण्डे का· 132

अत्यन्तं संसृज्यत इति तदर्थः । इति तद्व्याख्यातार इति नागेशः ।

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश।।"[1]

अस्य मन्त्रस्य व्याकरणस्वरूपपरव्याख्यानावसरे भगवता भाष्यकारेण "महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणम्" इत्यनेन ब्रह्मतादात्म्यावाप्तिरेव व्याकरणाध्ययनस्य प्रयोजनं प्रतिपादितम् । अत्र नागेशः "महान् परब्रह्मरूपः देवोऽन्तर्यामिरूपः शब्दो मर्त्यैराविष्ट इत्यर्थ" इति । अत्र साम्यमभेदः, शाब्दिकनये "नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः"[2] इत्यत्रान्यसदृशेत्युक्तस्य सादृश्यस्य भेदाघटितत्वसूचनात् । साम्यं सायुज्यमिति नागेशः । तदुक्तं भर्तृहरिणा-

"अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ।।"[3] इति

महाभारतेऽपि-

नाकपृष्ठसुखं यान्ति चतुर्भिर्वा वै: रथै: ।
अथ पत्काषिणो यान्ति ये चीक्रमतभाषिण: ।।[4] इति

"चत्वारि" इत्यादिमन्त्रः कल्पवृक्षवत् तदाश्रितान् सर्वानुपकरोति । अतएव गीतावत् तत्तत्संप्रदायाचार्यैस्तत्तदनुकूलतया व्याख्यातः । भगवान् भाष्यकारस्त्वेत्थं व्याख्यातवान्---"चत्वारि-

----

1. महाभाष्ये पस्पशान्हिके ।

2. परिभाषेन्दुशेखरे पृ० 75

3. वाक्यपदीये ब्र०का० ।3। का

4. महाभारते 3-1-48

शृङ्गाणि=चत्वारिपदजातानि नामाख्यातोपसर्गनिपाताश्च,त्रयो अस्य पादा=त्रय: काला भूतभविष्यद् वर्तमाना:, द्वे शीर्षे=द्वौ शब्दात्मानौ नित्य:कार्यश्च, सप्तहस्तासो अस्य=सप्तविभक्तय: त्रिधाबद्ध:=त्रिषु स्थानेषु बद्ध:,उरसि ,कण्ठे,शिरसीति,वृषभो वर्षणात्,रोरवीति=शब्दं करोति,कुल एतत् रौति:शब्दकर्मा,महो देवो मर्त्यां आविवेशेति महान् देव: शब्द:मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश ।महता देवेन न:साम्यं यथा स्यादित्यध्येयं व्याकरणम् इति"याज्ञिकैश्च यज्ञस्वरूपपरतया व्याख्यात:।किं बहुना राजशेखरेणाप्यलङ्कारशास्त्र-परतया व्याख्यात: । अप्रकृतत्वात् तद्व्याख्यानं नेह निर्दिश्यते ।

अत्रेदं तत्त्वम् - सिद्धान्तशैवादिमते शिवस्य याज्ञानशक्त्या-ख्या समवायिनी शक्ति:सा निमित्तकारणम् समवायो नाम तादात्म्य-मिति शिव:शक्तिश्च एकं तत्त्वम् । शिवस्य या बिन्द्वाख्या परिग्रह-शक्ति:सा क्रियाशक्तिरुच्यते । परिग्रह उपादानकारणमित्यैकं तत्त्व-मिति रत्नत्रयम् ।स च बिन्दुर्द्विविध: - शुद्धो शुद्धश्च । शुद्धबिन्दुरेव महाबिन्दुमहामायेति ,अशुद्धबिन्दुश्च मायेत्युच्यते । बिन्दौ समवायि-न्या:शक्तेर्य:सम्बन्ध: स एव विकल्पो भेदज्ञानमित्याख्यायते । तं च विकल्पमाश्रित्य शिव: शुद्धबिन्दुं शोभयति । तेन च स शब्दार्थसृष्टि-धारां जनयति । सा च शब्दधारा परापश्यन्तीमध्यमावैखरीरूपा शुद्धा । ततो शुद्धबिन्दु:क्षुब्धो शुद्धां शब्दार्थधारां जनयति,सा च परापश्यन्तीमध्यमावैखरीरूपा अशुद्धा । द्विविधस्यापि बिन्दोर्जडत्वेन अचिदात्मकत्वात्तत्परिणामो द्विविधापि-परादिरूपा वागचिद्रूपैव । तस्या अतिक्रम एव बन्धनच्छेदलक्षणो मोक्षो न तु तादात्म्यम् । स च दीक्षादिव्यापारेण सम्पाद्यत इति । तथा चोक्तम् -

---

1. महाभाष्ये पस्पशाह्निके पृ

शब्दतत्त्वमघोषा वाग् ब्रह्म कुण्डलिनी ध्रुवम् ।
विद्या शक्तिःपरानादो महामायेति देशिकैः ॥
बिन्दुरेव समाख्यातो व्योमानाहतमित्यपि ।
चतस्रो वृत्तयस्तस्या याभिर्व्याप्तास्त्रिधाणवः ॥
वैखरीमध्यमाभिख्या पश्यन्ती सूक्ष्मसंज्ञिता ।
तत्र सा वैखरी श्रोत्रग्राह्या यार्थस्य वाचिका ॥
स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
पयोवक्तृणामियं प्रायः प्राणवृत्तिनिबन्धना ॥
केवल बुद्ध्युपादाना क्रमाद्वर्णानुपातिनी ।
अन्तः सञ्जल्परूपा तु न श्रोत्रमुपसर्पति ॥
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाख्यया ।
अविभागेन वर्णानां सर्वतः संहृतक्रमा ॥
स्वयंप्रकाशा पश्यन्ती मयूराण्डरसोपमा ।
स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी ॥
यस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।
पुरुषे षोडशकले तामाहुरमृतां कलाम् ॥
तामेव वाणीं सूक्ष्माख्यामाहुरात्मविदो जनाः ।
प्रत्यात्मनियता एता वृत्तयो बन्धनात्मकाः ॥
आभ्यो विभक्तमात्मानं नहि पश्यन्ति पुद्गलाः ।
यदा वृत्तिविशेषेण विलीना चित्तसंश्रया ॥
तदा सूक्ष्मा विशुद्धैव चिदाभाष्यविवेकतः ॥इति

त्रिधाणव: - उत्तममध्यमाधमभेदेन अनादिमन्त: ।पुद्गला:=जीवा:। सूक्ष्मा=परा ।सूक्ष्मा त्वभिधेयबीजत्वेनसर्वभूतेष्ववस्थिता पश्यन्त्या अपि कारणभूता चिदा ब्रत्यन्तसंश्लेषात् तद्रूपेव भातीत्यर्थ: ।

अभिनवगुप्तपादाचार्यास्तु -

प्रकाशो विमर्शश्चेति वस्तुद्वयम् ।प्रकाश एव शिव:विमर्शस्तु तस्य स्वातन्त्र्यशक्तिरूमा इति चाख्यायते । अथादिप्रकाशस्य विमर्शव्यतिरेकेण विमर्शस्य प्रकाशव्यतिरेकेणासत्त्वादेवमेव तद्द्वयमिति मन्यन्ते । मन्मतानुसारिणो द्वैतिनइत्युच्यन्ते । विमर्शश्च परा वाक् प्रकाशश्च अर्थ इति । यदाहु: -

"शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा ।
अर्थजातमशेषं तु धत्ते मुग्धेन्दुशेखर: ।।इति ।।

सामरस्यमुपगतमनादिमिथुनं वागर्थयुगलं निरञ्जनं परब्रह्मपदमित्यद्वयविदां परिभाषा । विमर्श एव च पूर्णाहन्ता । यदा च शिव: स्वकीयस्वातन्त्र्येण स्वातन्त्र्यशक्तिं संकोचयति, तदा अहमिदं जानामीति भेदमनुभवतीति स्वातन्त्र्यशक्तिरहितो शो जडवर्ग:स्वातन्त्र्य शक्तिसहितश्चांशश्चेतनवर्गो जायत इति । अयमेव परमेश्वराद्वयवाद इत्युच्यते ।

शङ्कराद्वयवादिनस्तु -

यत्प्रकाश:शिव इति विमर्शश्च तत्प्रकाशक इति परमेश्वराद्वैतवादिभिरभ्युपेतम् । तत्र प्रकाशस्यैव स्वप्रकाशत्वमभ्युपेत्य प्रकाशसम्भवे विमर्शो नाङ्गीक्रियते, प्रकाश एव ब्रह्म, तदेवानिर्वाच्या विद्यया नानारूपं भासत इति वदन्ति ।

शब्दब्रह्मवादिनस्तु -

विमर्शः (परा वाक्) एव ब्रह्म तदेवाविद्या नानारूपं भासत इति प्राहुः ।

यद्यपि परमार्थतः परमेश्वराद्वयवादस्य ब्रह्माद्वयवादस्य शब्दब्रह्माद्वयवादस्य च नात्यन्तं भेदःयतःपरमेश्वराद्वयवादे प्रकाशविमर्शयोः भेदाप्रतिभासात् प्रकाश एव विमर्शः ब्रह्मवादे च प्रकाशएवैकं तत्त्वम्, शब्द-ब्रह्मवादे च विमर्श एवेति तथापि तत्त्वनिरूपणप्रणालीनां भिन्नत्वात्त्रयाणां भेदः ।

वाचां चातुर्विध्ये विभिन्नमतानि

तत्र-तत्र शास्त्रेषु वाचश्चातुर्विध्यं विविच्यते । ताश्च परा,पश्यन्ती,मध्यमा,वैखरी च । तत्र वैखरी वर्णरूपा नित्या च । तस्यानेके मतभेदाः ।

केचिज्जैनाः अणुभिः शब्दानां निष्पत्तिमभिवदन्ति केचिद् वायोः । वैयाकरणसिद्धान्तमञ्जूषायां महामतिनानागेशेनापि वैखर्या वायुगुणत्वमेवाङ्गीक्रियते । शिक्षाकारा अन्तःकरणादेव तदु-त्पत्तिं मेनिरे । तथाचोक्तम् -

आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया ।
मनःकायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते ---------- - ----- ।। इत्यादिना

1.

आचार्यभर्तृहरिणापि -

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शन भेदोऽत्र प्रवादेष्वनवस्थित: ।।[1] इति

तत्र परा वागेव शब्दब्रह्म, यस्यास्तत्त्वं व्याकरणादिना संविज्ञाय मुक्तो भवति । पश्यन्ती तस्या एव काचित् स्थूलभूता योगिनां सविकल्पकसमाधौ प्रतीयते । मध्यमा वागस्माभिर्नादैरभिव्यक्ता तत्तद्रूपकल्पिता वाचकत्वेन गृह्यते । वैखरी तु ताल्वादिस्थानैर्बाह्याभ्यन्तरप्रयत्नैश्च निष्पाद्यमाना ध्वनिशब्देन नादशब्देन च व्यवह्रियते । तदुक्तमभियुक्तै:-

वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा ।
उद्योतार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ।।[2] इति

तत्र त्रिविधा वाग् व्याकरणस्य विषय: । तदुक्तम् -

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाच: परं पदम् ।।
तस्माद्य:शब्दसंस्कार: सा सिद्धि परमात्मन: ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ।।
आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तप: ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधा: ।।
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धति: ।।
अत्रातीत विपर्यास: केवलामनुपश्यति ।।[3] इति

---

1. वाक्यपदीये ब्रह्मकाण्डे ।

2. " "

तदाह पुण्यराजः १ "व्यवस्थितसाधुभावे हि शब्दतत्त्वे संस्क्रियमाणेऽपभ्रंशापगमादाविर्भूते धर्मविशेषे नियतोऽभ्युदयः । तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभासतत्त्वप्रभवां भावविकारप्रकृतिसत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुध्य नियतं क्षेममाप्नोति" इति ।

तदुक्तमभियुक्तैः -

प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः ।
क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ॥
वाचः संस्कारमासाद्य वाचः स्थाने निवेश्य च ।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥
ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहम् ।
परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते ॥इति

तस्मात्तु स्फोटेषु पूर्वपूर्वोपमर्देन जातिवाक्यस्फोटस्य वाचकत्वमङ्गीकुर्वता कौण्डभट्टेन का सा जातिरिति प्रश्ने तत्तद्व्यक्त्यवच्छिन्नं ब्रह्मैव जातिरित्युक्तम् । तदुक्तम् -

"सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥ इति

केषाञ्चिन्मते व्यक्तय एव ध्वनयः तद्व्यङ्ग्या जातिरेव स्फोट इति ।

अनेक व्यक्त्यभिव्यङ्ग्या जातिःस्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥इति

---

१. वाक्यपदीये ।

अद्वैतवादिवेदान्तनये द्वैतब्रह्मातिरिक्तं न किञ्चिदस्तीति जातिरप्यविद्यैव आविद्यक: पदार्थो वा । एवञ्च तस्या प्रवाहनित्यतैव। अतस्तन्मते तत्तज्जात्यवच्छिन्नं ब्रह्मैव तत्तच्छब्दवाच्यं वाक्यञ्च । जाति-स्फोटव्युत्पादनमविद्योपवर्णनमात्रम् -

तदुक्तं हरिकारिकायाम् -

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
समारम्भास्तु भावानामनादि ब्रह्मशाश्वतम् ।।[1] इति

शब्दाद्वैतविषये किञ्चिदविशेषत इदानीं विमृश्यते ।

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।[2] इति

अस्मिन् श्लोके भर्तृहरिणा ब्रह्मण एवानादिनिधनमिति विशेषणं तदेवाक्षरं चेत्युक्तम्, न तु शब्दस्य । तस्मादेव ब्रह्मणो जगतो विवर्तभाव उक्त: । तत्र -"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति" इत्यादिश्रुतय:प्रमाणम् । अत: शब्दतत्त्वमित्युक्तम्, तत्र शब्दतत्त्वमित्यत्र यद्यपि कर्मधारयसमासेन शब्द एव तत्त्वमिति वक्तुं शक्यते, तथापि षष्ठीसमास एवात्र युक्ततया प्रतिभाति । यतो हि पुण्यराजेन १ शब्दतत्त्वमित्यस्य सर्वशब्दरूपतया सर्वशब्दोपग्राह्यतया चेति विवृति: कृता । अनेन वाच्यतावाचकतयोश्च ब्रह्मण्येन पर्यवसान-मित्यवसीयते ।

---

1. वाक्यपदीये ।

2. "

इत्थं निरूप्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ।। इति ।[1]

वैयाकरणभूषणसारेऽपि ब्रह्मणः शब्दतत्त्वशब्देनैवोक्तिः न तु शब्दस्यैव ब्रह्मत्वमुक्तम् । अतः शब्दब्रह्मेत्यस्यापि शब्दतत्त्वं ब्रह्मेत्येवार्थः । नन्वेवं सर्वेषां वस्तूनां तत्त्वं ब्रह्मैवेति शब्दतत्त्वमिति कथने विशेषाभावात् कर्मधारय समास एवोचित इति चेन्न ? वैयाकरणप्रक्रियायां सृष्टिस्थितिप्रलयकारणत्वं ब्रह्मणः शब्दद्वारैवेति ज्ञापनार्थं तथोक्तत्वात् । स च शब्दः सूक्ष्मप्रणवरूपो रवपरादिशब्दैर्व्यवह्रियमाणो योगिना निर्विकल्पकसमाधौ प्रतीयमानो वर्तते । उक्तञ्च वाक्यपदीये -

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।[2]
युक्ता प्रणवरूपेण सर्ववादविरोधिनी ।।इति

इत्थैकस्मिन् ब्रह्मणि सर्वं कल्पितम् । स चावान्तरः पुरुषः सर्वविकल्परहित इत्यत्र प्रणवः सर्वस्याभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिः सर्वनामत्वात् सर्वदर्शनोदयप्रत्ययस्तमयं योनिः सर्वा विद्याश्चोपगाही सर्वथेदं ब्रह्मानुजानाति च प्रतिषेधति । तस्मिन्नेव प्रणवे कालाख्या शक्तिः वर्तते । शब्दस्वरूपतत्त्वज्ञः क्रमसंहारेण योगं लभते, साधुप्रयोगाच्चाभिव्यक्तधर्मविषयो महान्तं शब्दात्मानमभिसंभवं कैवल्यं प्राप्नोति । सो व्यतिकीर्णां प्रतिभामुपैति । तस्माच्च सत्ताभावात् प्रतिभाख्याच्छब्दात् पूर्वयोगभावनाभ्यासात् प्रत्यस्तमयसर्वविकारोल्लेखां परां प्रकृतिं प्रतिपद्यते । तत्र प्रतिपत्तौ ब्रह्मणि प्रतिपत्तावेव पर्यवसानम् ।

---

1. वैयाकरणभूषणसारे
2. वाक्यपदीये ।

उक्तञ्च वाक्यपदीये -

"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।इति

उक्तं चाभियुक्तैः -

"आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमञ्च मन्त्राः।
तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ।।

महामतिनागेशभट्टास्तु शैवागमसंस्कारसंस्कृता अद्वैताद् ब्रह्मणः सृष्टिप्रक्रियां दर्शयन्ति । सा च सृष्टिरनादिभूता प्राणिनां कर्मोपभोगाय प्रवृत्ता मायात्मिका मायोपादानात्मिका तत्परिणाम भूता च । तत्र न सर्वदा प्राणिनां कर्मणामुपभोगसमत्वम् किन्तु पक्वकर्मणामेव । एवञ्च कालवशात् परिपक्वकर्मणामभावे जाते स्वोपभोगार्थं जातायाः सृष्टेः क्रमेण स्वस्वकारणे प्रविलीनतया सुप्तमायारूपेण वर्तनात्लय इत्याख्या जायते । पुनरपि कालवशात् केषाञ्चित् कर्मणां परिपाके जाते तदुपभोगार्थं माया विक्षुब्धा भवति । ततो माया सिसृक्षारूपेण परिणमते । सिसृक्षा-वृत्तेरव्यक्तं त्रिगुणं सत्त्वरजस्तमोरूपं बिन्दुरूपमुत्पद्यते, यस्य शब्दतत्त्वमि-त्याख्या जायते । तत्र बिन्दावंशत्रयम् -चित् अचित् -चिदचिच्च। अचिदंशो बीजम्, चिदचिन्मिश्रोऽंशोनादः, चिदंशो बिन्दुरिति । तस्मा-च्छिवदंशबिन्दोश्चिदचिन्मिश्रस्य नादस्योत्पत्तिः । स एव नादः शब्दब्रह्म रूपेण स्वपरादिरूपेण च व्यवह्रियते । तस्य चाभिव्यक्तिः प्राणिनां मूलाधारे व्याकरणजन्यसाधुशब्दज्ञानात् तत्प्रयोगाच्च जायमानधर्मविशेषेणान्तःकरण-शुद्धौ सत्यां जायते । तस्मादेव जगतः सृष्टिः । तदेव शब्दब्रह्म सूक्ष्मतम-

---

1. वाक्यपदीये ब्रह्मकाण्डे ।

सूक्ष्मतर--सूक्ष्मरूपेण क्रमशस्तत्तदर्थ बोधनाय प्रवृत्तस्य पुंसो हृदयाकाशे -भिव्यक्तं स्फोटरूपेण व्याकरणनिकाये प्रसिद्धं भवति । एतया प्रक्रियया पि शब्दस्य तत्त्वं ब्रह्मैव । अतो न वाक्यपदीयवैयाकरणभूषणसारादिभि: सह वास्तविक: कश्चिद्विरोध: ,प्रक्रियायां विरोधे सत्यपि ।

तदुक्तम् -

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमीष्यते ।।इति

शब्दाद्वैतमित्यत्र शब्द:प्रणवएवाद्वैततत्त्वज्ञानजनकत्वाद अद्वैतम्,वदनं वाद:शब्दाद्वैतस्य वाद:शब्दाद्वैतवाद: ।

कर्मधारयसमासस्वीकारवादिनां तु शब्दएव तत्त्वम् ,तदेव च ब्रह्मस्थानीयत्वाद् ब्रह्म ।अतो वेदान्तिमतान्नास्ति कश्चिद् विशेष:। यदेव तत्त्वमेकमेवाद्वितीयं सच्चिदानन्दरूपं"तत्त्वमसि" "प्रज्ञानं ब्रह्म" "अयमात्मा ब्रह्म" अहं ब्रह्मास्मि"इति महावाक्यचतुष्टयाद् बोध्यते, तदेव शब्दब्रह्म नाममात्रे विवाद: । अतएव "तस्मै पूर्णात्मने नम:" "अनादिनिधनम्" "अक्षरम्" इत्यादिविशेषणान्याञ्जस्येनोपपद्यन्ते । अत मते वाक्यपदीयभूषणकारनागेशादीनां सैद्धान्तिको महान् मतभेद: तान्त्रिकस्य रवपरादिशब्दैर्व्यवह्रियमाणस्य शब्दब्रह्मणोSधिकत्वात् हर्यादिसम्मतशब्दब्रह्मणस्तदतीतत्वात् ।

1· वाक्यपदीये ब्रह्मकाण्डे ।

भारतीयानां विदुषां ऋषित्वमाप्तानामन्येषां सर्वेषां चैवमेवपरं लक्ष्यम्, यच्चतुर्वर्गप्राप्तिरिति । तत्राप्यर्थ धर्मकामानामन्ते विनाशित्वादत एव दुःखसंभिन्नत्वात् सर्वतः परमं लक्ष्यं परमपुरुषार्थोमोक्ष एव । स च जगतो वास्तविकतत्त्वज्ञानादेव । तस्यैव तत्त्वज्ञानस्योपायभूतानि सर्वाणि दर्शनानि, निखिलानि शास्त्राणि च साक्षात्परम्परया वा तादृशतत्त्वज्ञानं जनयन्त्येवेति सर्वसम्मतः पन्थाः । किं बहुना, अत्यन्तं व्यवहारमार्गं लौकिकमापन्नस्य साहित्यशास्त्रस्यापि "रसो वै सः" इत्यादिश्रुत्यनुसारेण रसरूपब्रह्मनिरूपणद्वारा तदेव परमं लक्ष्यम्, किमुतान्येषां तदर्थमेव बद्ध-परिकराणां दर्शनशास्त्राणाम् । तस्माद् व्याकरणज्ञानेन क्रमशश्चतुर्वर्गफला-वाप्तिर्भवतीति ।

तन्त्रागमदर्शने ज्ञानस्वरूपम्

शिवाज्ज्ञानं प्रवर्तते -

आत्मनामणूनां मलाख्यो मायारूपः कर्मरूपो वरित्रविधो बन्धस्तद्विमोचनाय शिवत्वस्य व्यक्तये च शिवभावप्रकाशनाय च शिवात् परमशिवाज्ज्ञानं प्रवर्तत इति हि तस्य सूत्रस्यार्थः । ज्ञानं चेदं परापर-भेदेन द्विविधम् । तत्र परमवबोधरूपम्, अपरं च कामिकादितन्त्ररूपम् । तद्यथा-

ज्ञानं द्विविधमाख्यातं परं चैवापरं स्मृतम् ।
परं चैवावबोधाख्यमपरं शास्त्रमुच्यते ।।इति

"ज्ञानं शिवं परं बोधमपरं तन्त्रसंज्ञितम्" इति च ।

तयोरवबोधरूपं ज्ञानं शिवस्य शक्तिरेव । सा च द्विविधासमवायवर्तिनी परिग्रहवर्तिनी चेति । तत्र समवायवर्तिन्यपि द्विविधा-बोधरूपा क्रियारूपा चेति । तत्र बोधरूपा सर्वार्थपरिच्छेत्री । क्रियारूपादि द्विविधा-अनुग्रहरूपा तिरोधानरूपा चेति । परमेश्वर:सर्गारम्भे पुरुषार्थप्रसिद्धये तदेतदवबोधरूपं विमलं ज्ञानं पञ्चस्रोतोभिरूर्ध्वं पूर्व दक्षिण-पश्चिम-वाम-मुखै: प्रवर्तयन्ति । निष्कलाच्छिवादवबोधरूपमेतज्ज्ञानमेव प्रथमं नादरूपेण प्रसृतम् । पश्चात् सदाशिवरूपात् षट्पदार्थप्रतिपादकतन्त्राकारतां प्राप्तमपरमुच्यत इति भाव: । तदुक्तं पौष्करे -

"अदृष्टविग्रहाच्छान्ताच्छिवात् परमकारणात् ।
नादरूपं विनिष्क्रान्तं शास्त्रम् ---------इति ।[1]

केचनिदभियुक्तेन -

शुद्धात्मनां हितं शास्त्रं त्रायते यद् भवार्णवत् ।
तज्ज्ञानपरित्राणाच्छास्त्रमित्यभिधीयते ।। इति

"सदाशिवो पि भगवान् नादरूपतया गतम् । षट्पदार्थमयं ज्ञानम् । इति च । ज्ञानपदमत्र शास्त्रपर्यायम् । तद्यथा -

अनादिनिधनाच्छान्ताच्छिवात् परमकारणात् ।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं तत: क्रिया ।। इति
तयोत्पन्नानि भूतानि भुवनानि चतुर्दश ।
वाङ्मयं चैव यत्किञ्चित् तत्सर्वं मातृकोद्भवम् ।।[2] इति

1.

2. कुलमूलावतारे ।

तथा च -

अदृष्टविग्रहाच्छान्ताच्छिवात् परम कारणात् ।
ज्ञानरूपं विनिष्क्रान्तमनवच्छदनं महत् ।।[1] इति

अन्यच्च-

शिवादिविग्रहात् पूर्णात् सर्वकारणकारणात् ।
ध्वनिरूपं परं सूक्ष्मं शुद्धं सकलतेजसाम् ।।
वाग्रूपं प्रसृतं तत्त्वमुन्मनाशक्तिकेवलम् ।
अव्यक्तं व्यक्तिरूपेण निष्कलं क्रमकारणम् ।।
परानन्दं स्वरूपं तत् स्वच्छन्दादिप्रभेदतः ।।[2]इति

अपि च -

अदृष्टविग्रहायातं शिवात् परमकारणात् ।
ध्वनिरूपं सुसूक्ष्मं तु सुशुद्धं सुप्रभान्वितम् ।।
तदेवापररूपेण शिवेन परमात्मना ।
लौकिकादिशिवान्तानि परापरविभूतये ।
गुरुशिष्यपदे स्थित्वा स्वयं देव:सदाशिव: ।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रमाधारभेदत: ।।[3]इति

पुनरपि-

पञ्चवक्त्रो दशभुजस्त्रिपञ्चनयन: प्रभु: ।
---अनाश्रितो यं भगवान् पञ्चवक्त्रस्त्रिदृक् तथा ।।
दशबाहुश्चतुर्बाहुर्द्विबाहुश्चैकबाहुक: ।
लोकागमादिवक्ता सौ देवदेव:सदाशिव: ।
परापरविभागेन प्रोवाचासंख्यमागमम् ।।[4]इति ।

1· श्रीकण्ठीसंहितायाम्   2· स्वच्छन्दभैरवतन्त्रे ।
3· स्वच्छन्दतन्त्रे ।   4· स्वच्छन्दसंग्रहे ।

कुण्डलिन्याः महामायायाः स्वरूपम्

"इष्यतां कुण्डलिन्याख्यं शुद्धमेतद् । द्विजोत्तमाः" इति पौष्करवचने महामाया कुण्डलिनी शब्देन प्रोक्ता । समवायिशक्तेरधो वर्तमाना मायाकर्मानुसारिणी कुण्डलिनी शक्तिः शिवस्य परिग्रहशक्ति-रित्युदीर्यते ।

तदुक्तम् -

"मन्त्रयोनिर्महामाया या परिग्रहवर्तिनी"[1] ।।इति

कुण्डलिनीशब्दवाच्यात् भुजङ्गकुटिलाकारेण नादात्मना स्वकार्येण प्रतिपुरुषं भेदेनावस्थिता, न तु स्वरूपेण प्रतिपुरुषमवस्थितेत्यर्थः । तस्याः महामायायाः सकाशान्नादबिन्द्वादिकं कार्यं निष्पद्यते ।

एतदुक्तम् -

"याऽथ कुण्डलिनी शक्तिर्मायाकर्मानुसारिणी ।
नादबिन्द्वादिकं कार्यं तस्या इति जगत्स्थितिः[2] ।।" इति

अत्रेदमाकूतम् - शिवेन समवायिशक्त्या क्षुब्धायाः महामायायाः कुण्डलिन्याः सकाशान्नादाभिधानं तत्त्वं प्रथममुत्पद्यते । इदमेव शिवाधारतया शिवतत्त्वमित्यपि वदन्ति । ततो बिन्दुसंज्ञकं तत्त्वमुत्पद्यते । इदं च तत्त्वं शब्दाधारतया शक्तितत्त्वम् । ततः शक्तितत्त्वात् सादाख्यं तत्त्वम् । सादाख्यादीश्वराख्यं तत्त्वम् । ईशाख्याद् विद्याख्यं तत्त्वमिति क्रमेण शुद्धानि पञ्चतत्त्वानि जायन्ते । तत्र विद्यातत्त्वे

---

1. रत्नत्रये श्लोक 166
2. विश्वसारोत्तरसूत्रे ।

विद्यातत्त्वाधिपतिश्च, भृगुण्यादयः सप्त विद्याराज्ञश्च, तदधीनाः सप्तकोटिमहामन्त्राश्च, वाचकशब्दा व्योमव्याप्यक्षरादयश्च, वैश्वर्यादयः कामिकाद्यष्टाविंशतितन्त्राणि च वर्तन्ते । ईश्वरतत्त्वे अनन्तादयोऽष्टौ विद्येशाः, तदधिष्ठात्र्यस्त्वष्टौ वामादिशक्तयः तद्विलासिन्य, शक्त्योऽष्टौ, भानुमत्यादयः, उष्णुष्मादयः पन्चरुद्राः सिद्धान्तशास्त्रैः प्रपूजिता नन्द्यावष्टौ गणेश्वराः इन्द्रादयो लोकपालास्तेषामायुधानि च शिवासन भूता धर्मादयोऽष्टौ च स्थिताः । सदाशिवतत्त्वे तदधिकारावस्थः सदाशिवः, प्रणवाद्या दश अणवः, पन्चब्रह्माणि, षड्ङ्गानि च, अक्षरबिन्दुस्थूलध्वनिरूपो नादश्च वर्तते । बिन्दुतत्त्वे भुवनरूपो निवृत्त्यादादिसंज्ञः सद्योजातादिसंज्ञः सकलनिष्कलाख्यः शिवः, अक्षरबिन्दुहेतुस्वरूपः सूक्ष्मनादश्च वर्तते । नादतत्त्वे तु ध्वनिपतिरिन्धिका वा दीपिका वा रेचिका वा निवृत्त्यादिभुवनपतिसंज्ञः शिवो वर्तते । चिच्छक्तौ शक्तिमद्वरिष्ठः परमेश्वरः सकलजगत्परमकारणं कुण्डलिनी च वागीशांपत्यश्च । तदूर्ध्वं केवलं शिव एवेति ।

इदं नादतत्त्वमेव परमकारणं नित्यम् । तदेवमहामायेति केचिदाचार्या वदन्ति । तेषां पक्षे चत्वार्येव कार्याणि शुद्धतत्त्वानि । तद्यथा -

"शुद्धानि पन्चतत्त्वान्याद्यं तेषु स्मरन्ति शिवतत्त्वम् ।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च ।।इति ।

अयमभावः - तेषु मध्याच्छिवतत्त्वं बिन्द्वात्मकमाद्यं प्रधानमुपादानं स्मरन्ति पूर्वाचार्याः, परमोपादानत्वेनैव चास्य मायावन्नित्यत्वं सिद्धम् ।

---

1. तन्त्रालोके पृ० 2।

चत्वार्यन्यानि चत्वारि तत्त्वानितत्कार्याणिति भाव: । श्रीमत्पौष्करे तु नादाभिधानं शिवतत्त्वमपि कार्यमेव किन्तु तत्र शक्तितत्त्वान्तर्भावेण चत्वार्येव कार्याणि शुद्धानीत्युक्तम् ।

तथोक्तम् -

"वृत्तिस्तत्त्वात्मिका वाच्य चतुर्धी संव्यवस्थिता ।
शिवतत्त्वं सदेशाख्यमीशं विद्याह्वयं तथा ।।
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम् "।।इति

सर्वज्ञानोत्तरे तु शक्त्यभिधानं बिन्दुतत्त्वमेव परमकारणमित्युक्तम्-

"अतोऽर्ध्वं बैन्दवं तत्त्वं विमलं सर्वतोमुखम् ।
परमं सर्वतत्त्वानामनन्तज्योतिरूपकम् ।।इति

तस्या कुण्डलिन्या महामायाया: वाग्रूपायाश्चतस्रोवृत्तय:

वाग्रूपा वैखर्यादयश्चतस्रस्तस्या महामायाया: वृत्तय:कार्याणि । "तस्याश्च वक्तीति कर्तृव्युत्पत्त्या वाक्त्वम् ,न पुनरुच्यत इति वर्णानुगुण्यात इति[2] । तथा च स्कन्द प्रदीपिकाकारेणोक्तम् -

"पराक्षरतरोर्धातुर्नानाशक्तिर्विवर्तगा :।
शक्तयो: वर्णदेहेषु वक्त्राद्वर्णत्वमागता :।।[2] इति च पराया

वाच एव सर्वोऽपि वाग् व्यवहार:प्रसृत: । "निष्कम्पबोधसामान्यरूप:"[3]

1· तत्त्वार्थमञ्जर्यां पृ० 124

2· स्कन्दप्रदीपिकायां पृ० 89

3· जया 2०/233 -239

इत्यादिभिर्लोकैस्तस्या अभिव्यक्तिक्रमश्च प्रदर्श्यते ।

तद्यथा -

"संविन्मूलाद् वर्णरूपा ज्ञानस्तम्भात् सरस्वती ।
प्रागघोषा सनादा नु पुण्यतीर्थां प्रवर्तते ।।इति[1]

अन्यच्च-

"घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्या निर्घोषैव गरीयसी ।।
गौरिव प्रसवत्यर्थान् इयमुत्तमशालिनी ।
सततं स्पन्दते ह्येषा शाश्वतं ब्रह्मवादिनी ।।
दिव्यादिव्य प्रभावेण भारतीगौः शुचिस्मिते ।
एतयोरन्तरं पश्य सूक्ष्मणोः स्पन्दमानयोः ।।इति[2]

"वागेवास्याः "इति संवित्प्रकाशवचनं च वायो महिमानं प्रदर्शयन्ति । संविदेव प्राणद्वारेण वाग्रूपतां धत्ते इति "स्थानेषु विवृते वायौ"[3] इत्यादिकान् श्लोकानुद्धरता स्कन्दप्रदीपिकाकारेण सुष्ठु प्रदर्शितम् । "तस्यां चान्तःसंजल्परूपायां परायां वाचि द्वावपि शब्दार्थौ समंस्फुरतः[4] इत्येवं वाचः शब्दब्रह्मस्वरूपत्वमत्र प्रतिपाद्यते । यथा -

खेचरी गोचरी चाथदिक्चरी भूचरीभिदा ।
परादिभारतीसंस्थं शक्तिचक्रं चतुर्विधम् ।।
आनन्देच्छाज्ञक्रियाख्यं खेचर्यादि चतुष्टयम् ।।इति[5]

1· संवित्प्रकाशवचने पृ० 87   2·आश्वलायनगृह्यसूत्रे 21/22-23

3· संवित्प्रकाशवचने पृ० 112

4· " " 113

5· " " 91

तस्याश्चतस्रो वाग्रूपा वृत्तयो वैखर्यादय: । वैखरी मध्यमा वान्या पश्यन्ती सूक्ष्मसंज्ञिता "इति विश्वसारोत्तरसूत्रप्रमाणम् । एका वृत्तिर्नाम्ना वैखरीत्युच्यते । अन्या वृत्तिर्नाम्ना मध्यमा अपरा नाम्ना पश्यन्ती । इतरा च सूक्ष्मसंज्ञिता । तत्र सूक्ष्मा वृत्तिर्नाद: पश्यन्ती वृत्तिर्बिन्दु: मध्यमा वृत्तिरक्षरम्, वैखरी वृत्तिर्मातृकेत्युच्यते । तदुक्तं सिद्धान्तरहस्य सारे -

"नाद: सूक्ष्मो भवेद् बिन्दु: पश्यन्ती मध्यमा क्षरम् ।[1]

मातृका वैखरी ज्ञेया नादाद्यास्तु शिवादय: ।। " इत्यनेन शब्दसृष्टिरपि बिन्दूपादानेत्युक्तं भवति । अत्रायं सृष्टिक्रम:- शिवेच्छया प्रथमं क्षुब्धाया महामायाया: सकाशान्नाद उत्पद्यते । नादाद् बिन्दु: बिन्दोरक्षरम् ।अक्षरान्मातृकेति । "तेन मा मातर:प्रोक्ता: "इति विष्णुयामलवचने तेषां मातृत्वं व्याख्यायते । "न तैर्विना भवेच्छब्दो नार्थो नाऽपि चिते: स्थिति:" इति सर्ववीरवचनेन मातृकावर्णानां माहात्म्यातिशयो प्रदर्श्यते । यथा -

"अष्टाष्टकविभेदेन मातृका या निरूपिता ।

तदेव कुलचक्रं तु तेन व्याप्तमिदं जगत् "इति

त्रिकरत्नकुलवचनेन मातृकाख्येन कुलचक्रेण सर्वं जगद् व्याप्तमिति ज्ञायते । तदुक्तम् -

"शक्तेर्नादोऽभवद् बिन्दुरक्षरं मातृका तत: "।।इति[2]

"बिन्दु:क्षुब्धस्तदिच्छात: शब्दराशिरभूत् तदा "इति च पराख्ये ।

---

1. सिद्धान्तरहस्यसारे पृ० 23

2. मृगेन्द्रागमे 1/2

आसां चतसृणामपि वृत्तीनामाश्रयभूता निवृत्त्यादयः कलापञ्च च बिन्दोरेव कार्याणि । तदुक्तम् -

"सैषा चतुर्विधा वृत्तिर्निवृत्त्यादिकलाश्रयात् ।
पञ्चधा भिद्यते भूयः कलास्ता बिन्दुवृत्तयः"।।[1] इति

इयं च महामाया शब्दवस्तूभयात्मिका भवति, शब्दात्मकानां वर्णपदमन्त्राणां वस्त्वात्मकानां कलातत्त्वभुवनानां चोत्पादनात् ।

अत्र शब्दब्रह्मवादिन आत्मन एव नादादिक्रमेणावस्थानमिति वदन्ति । तदुक्तम्, अविकारिणस्तस्य नादाद्याकारेणपरिणामानुपपत्तेः। नापि तच्छक्तेः, तस्या अपि परिणामयोगात् ।द्वयोरपिविकारित्वाभ्युपगमे चैतनत्वप्रसङ्गात् । तस्मात् शब्दोपादानत्वं बिन्दोरेवाभ्युपगन्तव्यम् । तदुक्तम् -

"अविकारेकात्मोक्तस्तच्छक्तिश्चाप्यतो न योग्यौ तौ ।
बहुधा स्थातुं यद्वा चैतन्यविनाकृतौ विकारित्वात् ।।[2] "इति

एवमत्र वागीश्वर्या महामायायाः कुण्डलिनी नादबिन्दुप्रभृतिभिः शब्दैस्तेषु-तेषु शास्त्रेषु व्याकृतायाःस्वरूपमुन्मीलितम् । सर्वे इमे शब्दा स्वरूपोन्मीलनाय विस्तरमपेक्षन्ते । तन्नाधुना सम्भवति ।

1· नादकारिकासु श्लोक- 16

2· ईश्वरप्रत्यभिज्ञाविमर्शिन्यां 423-424

प्रकाशविमर्शात्मकं परतत्त्वम्

ईश्वरप्रत्यभिज्ञायां भट्टोत्पन्न:, विमर्शिन्यां विवृतिविमर्शिन्यां चाभिनवगुप्त:सर्वदर्शनसमन्वयमुखेन प्रकाशविमर्शात्मक:शिव एव परं तत्त्वमिति साधयति । तथाहि - "प्रकाश लक्षण:स्वात्मा ।---स एव हि अहंभावात्मा विमर्श: । प्रकाशरूपता ज्ञानम् । तत्रैव स्वातन्त्र्यात्मा विमर्श: क्रिया ।विमर्शश्चान्त: कृतप्रकाश इति विमर्श एव परावस्थायां ज्ञानक्रिये ।----सर्वथा तु विमर्श एव ज्ञानम्"[1] "सो यं प्रकाशो नपह्ननीय:" इति, "प्रकाशस्यैव भावानां----न शापोक्तया विलीयते"[2] इति दिवाकरवत्सप्रामाण्येनाभिनवगुप्त:प्रतिपादयति । "प्रकाश एव हि संविदां परमार्थ:"इति[3] ।इह भावानां सत्त्वमसत्त्वं वा व्यवतिष्ठमानं संविद्विश्रान्तिमन्तरेण नोपपद्यते । संविद्विश्रान्ता हि भावा: प्रकाशमाना भवन्ति। -----प्रकाश एव संविदत:"[4] इति "प्रकाशस्वातन्त्र्यमिह बोधसंवेदनादिशब्दवाच्यम्"[5] "अभावो पि बुद्ध्यमानो बोधात्मक ईश्वर एव"[6] इत्यादिना प्रकाशस्य संविद्बोध संवेदनादिशब्दवाच्यत्वमभिधाय"परमेश्वर एव प्रकाशवपुर्विश्वक कारणम्"[7] "प्रकाशात्मक: शिव:"[8] इति प्रकाशात्मक: परमेश्वर एव शिव इति साधयति ।"सा देवता (च युक्तिपर्यालोचनायां स्वात्मसंवित्स्फुरत्तामात्रस्वरूपेतिप्रकाश एव विश्वोपास्या देवता"[9]

1• ईश्वरप्रत्यभिज्ञाविमर्शिन्यां 423-424

2• " " 424

3• " विवृत्ति 433

4• " " पृ० 4-5

5• " " " 82

6• " "द्वितीय 387-412

7• " " " 172

8• तन्त्रालोके 1/52

9• म०म०प०पृ० 4-5

"प्रकाशरूपं ज्ञानं, विमर्शरूपा च क्रिया"[1] "विमर्श एव देवस्य शुद्धे ज्ञानक्रिये-यत:"[2] "विमर्शशक्तिरेव क्रिया"[3] इत्यादिना च प्रकाशविमर्शयोर्ज्ञानक्रिया-रूपत्वं वर्ण्यते । तथा च -

"औन्मुख्यमिच्छा ज्ञानं च क्रियेत्येतच्चतुष्टयम् ।
स्पन्दनं देवदेवस्य बोधभैरव रूपिण:।।"

इति च पूजारहस्ये । "स्वात्मैव देवता"[4] इति च महेश्वरानन्द:।

सांख्यजैमिनीयचिरन्तनवैशेषिकबौद्धानां मते चित्स्वभाव आत्मा"[5] "बौद्धैरध्यवसायापेक्षं प्रकाशस्यप्रामाण्यं तदद्विधस्यगतपाय एवायमर्थ:"[7]। प्राभाकरं मतं स्वमतेन समीकरोति"।[8] माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभि:प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्वबाह्यार्थशून्यत्वबाह्यार्थ-प्रत्यक्षत्ववादानातिष्ठन्ते । अत्र सर्वदर्शनसंग्रहकार:सायणमाधव:- "यद्यपि भगवान् बुद्ध एक एव बोधयिता, तथापि सर्वासामासां दृष्टीनां यथा काल-क्रमेण विकास:समजायत तथैव प्रत्यभिज्ञादर्शने प्रकाशविमर्शात्मकस्य शिवस्य परतत्त्वेनाङ्गीकारेऽपि बौद्धनैयायिकमीमांसकसांख्यादिदृष्टीनां विकास-क्रममुपजीवतीति तदत्र प्रयतनीयं विपश्चिद्भि: ।

---

1. ई०प्र०वि०वि० प०भा० पृ० 98
2. ई० प्र० 1/8/11
3. ई०प्र० नि० वि० तृतीयभागे पृ० 3
4. म०म०प० पृ० 119
5. ई०प्र०वि० वि० द्वितीयभागे 434
6. ई०प्र०प्र० भा० 266
7. ई०प्र०वि०वि०प०भा०219

"प्रकाशश्च विमर्शशून्यो न भवति"[1] "प्रकाशस्य हि विमर्श एव जीवितम्"[2] "विमर्शमयो हि प्रकाश:"[3] "विमर्श शरीर एव प्रकाशो युक्त"[4] "प्रकाशस्य जीवितं विमर्श"[5] इत्यादिना ज्ञानाधिकारीये पञ्चमे विमर्शे तत्र प्रकाशस्य विमर्शात्मकत्वं साटोपं साध्यते । "परामर्शो हि प्रकाशस्य सत्य:, स्वभाव"[6] "प्रकाशस्य हि स्वभाव: परामर्श:"[7] इत्यत्र च विमर्श एव परामर्शपदेनोक्त: । "प्रकाश एवार्थस्य आत्मा"[8] "न केनापि प्रकारेण प्रकाशबाह्यस्य सिद्धि:"[9] इत्यादिना च प्रकाशस्यैव सर्वात्मकता साध्यते इत्यादिना प्रकाशस्य विमर्शाव्यतिरिक्तत्वे प्रदर्शिते पि-

"इदमित्थस्य विच्छिन्नविमर्शस्य कृतार्थता ।
या स्वस्वरूपे विश्रान्तिर्विमर्श: सो हमित्ययम् ।।"[10]

अहमिति अव्ययमव्यतिरिक्ते प्रकाशे वर्तते ।
तस्य भावो हमिति विमर्शस्वरूपमहन्ता ।।"[11]

1· ई·प्र·वि·वि·प्र·भा· 5
2· " " 73
3· " " 21
4· " " 2·7
5· " " 241
6· " " 248
7· " " 251
8· " " 68
9· " " 164
10· श्लोक 15
11· ई·प्र·वि·वि·प्र·भा·पृ· 1·7

"अहन्तैव हि संविदो लक्षणम्" [1] "अहमिति शुद्धो विमर्शो न विकल्प:" [2] "विमर्शो न कदाचिदिदन्ताभूतमभास्कन्दति" [3] विमर्श विशेष एव विकल्प:" [4] इत्येवं विमर्शविकल्पयो: स्वरूपमुपवर्ण्याभिनवगुप्तस्तयोर्वैशिष्ट्यं विस्तरेण वर्णयति । "प्रकाशस्यात्म विश्रान्तिरहं भावो हि कीर्तित:" [5] इति च विमर्शस्य स्वरूप जडप्रमातृसिद्धिप्रामाण्येनाभिनवगुप्त: "विमर्शो हि सर्वं सह: परमप्यात्मीकरोति, आत्मानं च परीकरोति उभयमेकी करोति, एकीकृतं द्वयमपि न्यग् भावयतीत्येवं स्वभाव:" [6] इति । "विमर्श एव स्फुरता महासत्ता, स्पन्द: स्वातन्त्र्यम् ,परा वागित्यादिना रूपेण परिस्फुरतीति

एवमत्र वागर्थात्मकं शिवशक्तिसामरस्यात्मकं परतत्त्वमेव प्रकाशविमर्शात्मना व्याख्यातमिति प्रकाशविमर्शयोर्नात्यन्तं भेदप्रभा ।अतएव "यथैव विश्वप्रकाशात्मा परमेश्वर: तथा विश्वविमर्शात्मा" [7] इत्यभिनवगुप्तस्तयोरद्वैतं वक्ति । एवं च सत्यमत्र "संसाराब्धौ प्लव इव जगत्तारणाय स्थिर: स्याम्" [8] इति च साम्बो याचते । तथा च -

"न चाहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दु:ख तप्तानां प्राणिनामार्त्तिनाशनम्।। [9] इति च स्मर्यते ।

---

1. ई.प्र.वि. वि.प्र.भा.पृ. 265
2. ई.प्र.वि. 311
3. " वि. 83
4. " वि.भा. 22
5. " श्लोक 22
6. " 252
7. " पृ. 94
8. सा. प. श्लोक 34
9. गीतायाम् ।

सत्यं सर्वेष्वेषु वचनेषु भगवतो बुद्धस्य करुणा परिस्फुरति । तथा च -

"शिवस्य परिपूर्णस्य किं नाम क्रियते जनैः ।
यत्कृतं शिवभक्तेषु तत्कृतं तु शिवे भवेत् ।।इति

शिवधर्मवचने च करुणा पूरितचेतसा सेवाभावः समुपदिश्यते । प्रत्यभिज्ञा-दर्शने जनस्याप्युपकारमिच्छता भट्टोत्पलेनागमेषु द्वैतवादमपास्यब्रह्मवादे-विद्यां मायाशक्तीकृत्य विज्ञानाद्वयवादमात्मेश्वराभिप्रायेण निरूप्य सुगमःपन्थाः प्रदर्शितः । प्रतिबिम्बवादसतत्त्व आभासवाद इति च नाम्ना सोऽयं शास्त्रेषु प्रथितः ।।

एवं व्यत्र व्याकरणतन्त्रागम शास्त्राणां केचन सिद्धान्तान् समासतो विमृश्याधुना शिष्टाचारानुबन्धिपरम्परां निभाल्यते ।

--:--

कार्तज्ञापनम्

कृतज्ञताया: भाव: कार्तज्ञमिति शब्दस्य विद्वत्सु परम्परया बहुकालाद् प्रथिता । पूर्वपूर्वाचार्यप्रभृति-उत्तरोत्तराचार्याणां प्रशंसापराणि तत्र-तत्र बहूनि वचनानि शास्त्रेषु व्यवहारेषु च दृश्यन्तेऽनुभूयन्ते च । किञ्च पदार्थविवेकपराणां व्याकरणन्यायवैशेषिकादिशास्त्राणां सर्वशास्त्रोपकारित्वं "कणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति वचनेन सङ्गच्छते । तथापि "मुखं व्याकरणं स्मृतमिति" सिद्धान्तानुरोधेन व्याकरणशास्त्रस्य मुख्यत्वेन सर्वशास्त्राणामुपजीव्यत्वेन च सर्वतोऽधिकं माहात्म्यं समुल्लसति । एतद्धियैवादावहं यदा शास्त्राणामध्ययनाय काशीमागच्छम्, तदा मदीयमिच्छा दृढतरा जाता यद् व्याकरणशास्त्रमेवाध्येयम् । एतदनुरोधेनाहं तदानीं "वाराणसेय संस्कृतविश्वविद्यालये" व्याकरणविभागेऽध्यापकपदमलङ्कुर्वन्तां तत्र भवतां स्वर्गीयाऽऽचार्याणामाचार्य श्री "वासुदेवमिश्राणां" सन्निधावगच्छम् । विद्यया, तपसा च नामान्वर्थतां भजमानास्ते स्नेहाधिक्येन विद्यानुरागेण च मां पाठयामासुः । अध्यापने शैली तेषां मनोज्ञा, स्पष्टा तत्त्वप्रकाशिका चासीत् । तर्ककर्कशव्याकरण शास्त्रे विविधोदाहरणैः कथाख्यानादिभिश्च सम्यक् रुचिमुत्पादयन्तः मन्दमतीनामप्यस्माकं बोधमुत्पादयन्तश्च साक्षाद् भगवान् भाष्यकार इव राजयामासुः । विद्योपासनया सह परमेश्वरे पि तथैव दृढतरा भक्तिरासीत्तेषां यथा महर्षि पाणिनि प्रभृतीनामासीत् । व्याकरण,दर्शन,शास्त्रबोधोत्सवैः ते सन्ध्यावन्दनाद्याचाराणां विवेकेऽप्यन्तेवासिनां प्रेरणास्रोतः साक्षाद्धर्ममूर्तिरिव जाता। तैं एव मानुकृत्य पूर्णधान्य विद्यायां वाग्विषयमधिकृत्य किञ्चिद्विवेच्यमिति ममाभिमतम् । शास्त्रानन्दनिमग्ना ब्रह्मानन्दमनुभवन्तो, साम्प्रतं त्रिदशालये वर्तन्ते। तेषामाज्ञया अत्र कर्मणि प्रवृत्तोऽहं वाग्विषयमधिकृत्य विदुषां पुरतः शोधनिबन्धरूपेण किञ्चिदुपहरामि । यतः कायेन वर्तमानानां तेषामेवाशीर्वादो मन्ये मम पथप्रदर्शकमिवाभवत् अतः मानसार्घ्यैश्च प्रणामोपचारान् तेभ्यो वितनोमि ।

ममास्य शोध-प्रबन्धस्य प्रयोजककर्तृत्वेन स्वनामधन्या परमदैवता: स्वर्गीया: आचार्य पण्डित श्री "रामकृष्ण पाण्डेय" महोदया मे तातपादा एव कारणम् । ते च सोत्साहं सानुकम्पमनुसन्धातुं च मामादिश्य गार्हस्थ्य कार्य गौरवं स्वयमेवनिर्वह्य ममात्र कर्मणि कृपया आशीर्वादेन च साहाय्यमासादित-वन्त: । किन्तु जटिलानपि विषयाणामज्ञानान्धकारे निमज्जन्तं मां तथैव रक्षितवान् यथा अप्सु निमज्जन्तीं नौकां कश्चन्दृश्यशक्तिको महान्ना-विक उद्धरति । अत: न प्रशंसार्थं न चैवोपचारार्थमेवेदं मम वचनमपि तु तात-पादानां सामान्यगुणकीर्तनमेवेति तदुपकारं शिरसा आवहामि ।

तत्र पदवाक्य प्रमाणपारावारीणानां सद्गुणशालिनां वैशारदानां तत्र भवतामाचार्य "डॉ० रामप्रसादशुक्ल" महाभागानां साम्प्रतं श्री "सम्पूर्णानन्द-संस्कृत विश्वविद्यालये चिरं व्याकरणविभागीयाचार्य पदमलंकुर्वतामुपकारं स्मारं-स्मारं मे मोमोदीति चेत: । ते हि स्वाशीर्वचोभि: प्रभा नुकूलयित्वा मां प्रबोध्य सम्यङ्-निबन्ध ग्रन्थ ग्रथनाय यथा पक्षादिश्यानुकम्प्य चानुगृहणन्ति-ति तादृशत कार्याभिस्तोषं कार्तज्ञ्यमावहामि ।

अन्ते च "सम्पूर्णानन्द संस्कृत विश्वविद्यालये" सांख्ययोगतन्त्राऽऽ-गम विभागेऽध्यापक पदेऽध्यापयतां शैव-शाक्तागमसिद्धान्तप्रचार-प्रसारान् ग्रन्थ-ग्रथन द्वारा सततं तत्पराणां मम केवलं व्याकरणाचार्य परीक्षोत्तीर्णस्य तन्त्रागम शास्त्र-सिद्धान्त ज्ञानरहितस्य सम्यग् प्रबोध-द्वारा-तन्त्रशास्त्र सिद्धान्तं व्याकरण शास्त्र सिद्धान्तञ्च सम्यगनुशील्य शोधप्रबन्धप्रणयनाय "डॉ०राजनाथ-त्रिपाठिभि: योग्यतामुत्पादितम् । नूनं तेषामुपकारं स्मारं-स्मारमात्मानं धन्यमिति मन्यामहे । व्याकरणशास्त्रे यदि दार्शनिकं तत्त्वं तर्हि पाणिने-रागमिकत्वेनागमिकत्वमेवेति ज्ञातेन मम सर्वं सफलं ग्रथनञ्च सम्पन्नतामुपगतम्, मम "तन्त्रागमेषु परादिवाणी विमर्श:" इति शोधप्रबन्धविषय: पूर्णतामगादिति।

तदर्थं तान् सारस्वतसपर्याभिः समर्चये ।

शोध-प्रबन्धस्यास्य "श्री कान्ताप्रसाद पाण्डेय"सम्पूर्णानन्द संस्कृत-विश्वविद्यालये टंकिक पदे कार्यरतं स्वाशिषा सम्पृक्तो,यस्तु यावच्छक्यं स्वल्पेनैव कालेन शुद्धं टङ्कणं तेन गुम्फितमिति ।

सर्वान्येऽस्मिन् कृतिविशेषे प्रत्यक्षाप्रत्यक्षं भावन्तो विश्वनाथं समर्चये ,यत्कृपया ममाल्पेन कार्यमिदं साधितमिति,यदि ममास्मिन् कर्मणि कश्चन त्रुटयः जनानाञ्च स्युस्तदा प्रार्थना:मामल्पमनुकम्पयानुगृहीष्यन्तीत्या-शासानः द्रुतिमिमां स्मरन् विरमामि ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।इति ।

विदुषां वशंवदः
विन्ध्यवासिनीशरणपाण्डेयः
विन्ध्यवासिनीशरण पाण्डेयः

===========================

प्रथमोऽध्याय:

1· तन्त्रशब्दनिरुक्ति:

2· आगमशब्दविचार:

3· तन्त्रागमयोरैक्यम्

4· तन्त्रागमेन व्याकरणागमस्य सम्बन्ध:

5· चतुर्दशमहेश्वरसूत्रमुद्दिश्य व्याकरणशास्त्रस्य प्रवृत्तौ आगमस्यैव प्रभाव: ।

===============================

प्रथमोऽध्याय:

तन्त्रशब्दनिरुक्ति:

तनु विस्तारे इत्यस्मात्तनादिगणपठितात्धातो: "सार्वधातुकेभ्य: ष्ट्रन्" इत्युणादिसूत्रानुसारं ष्ट्रन् प्रत्ययान्त: तनोति तन्यते नेन वेति व्युत्पत्त्यनुसारं यद् वा कुटुम्बधारणपोषणार्थकात् "तत्रि" चु धातो: भावे [3-3-18] इत्यष्टाध्यायी सूत्रानुसारं घञ्प्रत्ययान्त:तन्त्रणं तन्त्र्यते यद् येन यत्र वेति व्युत्पत्त्यनुसारं तन्त्रशब्द:सिद्ध्यति ।

किञ्च –

तनोति विपुलानर्थान् तत्त्व [तन्त्र] मन्त्र समन्वितान् ।
त्राणं च कुरुते यस्मात्तन्त्रमित्यभिधीयते । इति – प्रमाणेन निरन्तरं विस्तारार्थक विशेषार्थक तत्त्वमन्त्रसमन्वितत्राणकर्तृता तन्त्रस्य सिद्ध्यति । एवञ्च तन्त्रागमग्रन्थजातं यत् तं सर्वं ज्ञानराशिं विस्तृणाति , विस्तरेण प्रकटयति, तदनुसारि कुटुम्बं समूहं बिभर्ति, तत् तन्त्रम् । ज्ञानराशीनां विस्तरेण प्रतिपादयतां ग्रन्थानां च विषयभेदात् भवति पारस्परिको भेद:। नास्ति किञ्चित् यत्कस्यचन ज्ञानगोचरो नास्ति । तथा च य: कश्च नापि ग्रन्थोयं कश्चन ज्ञानविषयं विस्तरत: प्रतिपादयन् तन्त्रशब्देन वक्तुं शक्यते ।

सांख्यसिद्धान्ते स्वीकृतान्यासन् तन्त्राणि" कृत्स्नस्य षष्ठितन्त्रस्यु: तेषु च षष्ठितन्त्रादिख्याते ष्विति ।----

---

1• अष्टाध्याय्याम् ।

विस्तरत्वात्तच्छितन्त्रस्य संक्षिप्त सविलरत्वानुग्रहणार्थं सप्तति-कारभ्य: इत्यादिवचनै: सांख्यतन्त्रस्य आहोस्वित् सांख्यदर्शनस्य वा तन्त्र-संज्ञा समधिगम्यते । भगवन्त: शङ्कराचार्यपादा: स्मृते: तन्त्रपदेन व्यवहारं कुर्वन्तो ब्रह्मसूत्रव्याख्याने "स्मृतिश्च तन्त्राख्यापरमर्षिप्रणीता शिष्टपरिगृहीतेति" प्राहु: । गायत्री तन्त्रमित्यधुनापि शङ्कराचार्यपादानां रचना समुपलभ्यत एव ।

आयुर्वेदे सुश्रुतसंहिताकारा: अष्टाङ्गचिकित्साविधं तन्त्रपदेन व्यवहारन्त्याभजन्ति चैतत्तन्त्रमादिदेवप्रकाशितम् । तथाहि -

"इत्यष्टाङ्गमिदं तन्त्रमादिदेव प्रकाशितम्" इति ।

कोशेष्वपि तन्त्रशब्दस्य व्यवस्थिति:दृश्यते । यथा-ह्यमरकोषे -----"तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छेदे"इत्युक्तम् ।

वाचस्पत्ये तु ------

व्यवहार: कथ्यते यत्र तथा चाध्यात्मवर्णनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ।।

राजनीतिग्रंथेष्वपि तच्छास्त्रज्ञानाय,तन्त्रपदव्यवहार:दृश्यते । यथा "पञ्चतन्त्रमिति । एतेनेदं प्रतिभाति यद् राजनीतिरपि तन्त्रप्रतिपाद्यविषयेषु परिगणितोपलभ्यते ।

उक्तञ्च वाराहीतन्त्रे -------

----

1. ब्र० सू० शा० भा० 2-1-1

राजधर्मो दानधर्मो युगधर्मास्तथैव च ।
व्यवहार: कथ्यते च तथा चाध्यात्मवर्णनम् ।।[1] इति

किन्त्वास्माकं भारतवर्षस्य शासनपद्धति प्रजातान्त्रिकी । येनोद्-बुध्यते भारतं प्रजातन्त्रराष्ट्रमिति । अस्य व्युत्पत्तिरस्तु - प्रजा तनुते शासन नियमान् यत्र प्रजया तन्यते विस्तार्यते शासनपद्धतिर्यत्र, प्रजया तन्त्रयते भ्रियते स्वसमूहो यत्र । एवञ्च भारतं तद्राष्ट्रं यस्मिन् प्रजैव राष्ट्र नियमांस्तथैव तनुते विस्तारयति संशोधनपरिष्करणादिभिर्यथा तन्तुवायस्तन्तून्, यत्र प्रजैर्विभिनियम्: स्वात्मानं धारयति, पोषयति, यत्र प्रजा एव राष्ट्रचिन्तां कुर्वन्ति ।

नारदपाञ्चरात्रस्याप्यागम संज्ञा । अत: वैष्णव दर्शनानामपि तान्त्रिकत्वं सुतरामेव सिद्धम् ।।

एवञ्च नानार्थको पि तन्त्रशब्द:सम्प्रति शैव-शाक्त दर्शनेरूढ़िमापन्न: । तथा च समस्त सुरगणगीयमानप्रकर्षे भारतवर्षे सकलसाधक-काम-पूरणकल्पद्रुममिव को न जानाति नाम तन्त्रशास्त्रम् । विशेषत: शाक्तास्तन्त्रानुगामिनो प्यागमप्रवक्तारो बहव: शैवा:वैष्णवा:सौरा गाणपत्याश्च । अत: परमेश्वरोपासनाया: साधनभूतानामुपकरणानां हि तन्त्र संज्ञा प्रतिष्ठते ।

तन्त्रशास्त्रं सर्वशास्त्रेभ्यो महत्तमं स्थानं विभर्तीति मुण्डमालातन्त्रे निगदितम् । यथा -

नदीनाञ्च यथा गङ्गा पर्वतानां हिमालय: ।
अश्वत्थ: सर्व वृक्षाणां राज्ञामिन्द्रो यथावर: ।।

---

1. वाचस्पत्यमिति कोशे तन्त्रशब्दोपरि वचनम् ।

देवीनाञ्च यथा दुर्गा । वर्णानां ब्राह्मणो यथा ।
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम् ।।इति

महानिर्वाणतन्त्रे च -------
किं तस्य तीर्थभ्रमणैः किं यज्ञजपसाधनैः ।
जानन्नेव महातन्त्रं कर्मपाशैर्विमुच्यते ।।इति ।

भारतीयाः संस्कृतेः भारतस्याचारपरम्परायाश्च चत्वारिमुख्योपजीव्यानि श्रुतिः स्मृतिः, पुराणं, तन्त्रञ्च । एषु चतुःस्तम्भेष्वेव समग्रा भारतीयाः संस्कृतिः अवस्थिताः । अतएव च तन्त्रशास्त्रस्य महानुपयोगः ।।

---

१. मुण्डमालातन्त्रे अष्टमे पटले ।

आगमशब्दविचार:

भारतीया संस्कृति: निगमागममूलिका । निगमो वेद: आगमश्च वेदोपयिकस्मृत्यनुमोदितलोककल्याणकर:पन्था:। आगमस्यैव परनामतन्त्रमिति, तन्त्रागमस्य परस्पराभेदेन प्राय: सर्वत्रशास्त्रे व्यवहार:। अत: शास्त्रे त्र "विषयमप्यमृतायते " "भोगो पि योगायते" कुतश्चैतदित्याकाङ्क्षायागमस्यशास्त्रस्य प्रवक्ता साक्षात् शिव: श्रोत्री पराम्बा सर्वानुग्रहकर्त्री पार्वती, विषयश्च साक्षात् वासुदेव: । एवं भूत्वैव परलोकायानायासेन साधनक्षमो गममार्ग: । उक्तन्च ----

आगतं शिववक्त्रेभ्यो गतन्च गिरिजानने ।
मतं हि वासुदेवस्य तस्मादागम उच्यते ।।इति

आगमतन्त्राणां प्रवक्तरि भगवति शिवेविषामृतयो: सम्मेलनम् । मूलस्तयो:सामरस्यमपि विस्पष्टं परिलक्ष्यते । तथाहि -

"यच्छम्भोरहिभूषणं शिरसि वा कण्ठे भृशं राजते ।
तत्पाशेन विषं गले च विधृतं गोपायिता स्वर्धुनी ।
विज्ञानं नामृतेन हि यथा भालेन्दुमूर्ध्वमृते
गङ्गां विष्णुपदोद् भवां किमितरद्धेनाहिराशीर्विष:।।

अयम्भाव: - शिरसि कण्ठे वा अहिर्भूषणमपि पाशरूपो भूत्वा विषं शङ्करगले विधारयति । तेनैव पाशेन जटाकलापेषु गोपायिता स्वर्धुनी ।

१· सारस्वती सुषमायां 2 वर्षे । अङ्के १ पृष्ठे ।

सम्यग्योगक्षेमाय तदेव विज्ञानं समाश्रयणीयं लोकैर्यद्बलेन यथामृतेऽध्वं सुधा सन्देहसारं श्रीशङ्करभालेन्दुमेव जयति, जटामात्रेषु गोपायिता गङ्गा-मपि या गङ्गा सत्यपि स्वयं विष्णुपादोद्भवां "तद्विष्णोःपरमं पदम्" तस्य ध्रुवैक पथप्रदर्शिनी भवति । शिववक्त्रेभ्यो विनिःसृता या आगमवाणी सेयमध्यात्मगङ्गा । सैव पुनः शिवशक्तिसागरस्य विज्ञानप्रसूर्जननी । किमन्येन विज्ञानेन, येन अहिराशीविष एव भवेल्लोकानां भयाय क्षयाय च । अनेनागमविज्ञानस्य जडविज्ञानवादिभ्यो विलक्षणतया पि सूचिता । उभयतः प्रयोगविधान सामान्ये पि प्रयोगतन्त्रभेदलक्षितव्यस्यार्थस्यापि भेद इति विचारणीयम् । एतद्भेदवशादेवैनामृतत्वस्य सनातनःपन्थाःप्रवर्तितः, अपरस्मिन् बाह्येन्द्रियभोगोपकरणबाहुल्यसृष्टिसामर्थ्य गौरवे सत्यपि लोकानां महाविनष्टैरेवक्रमवर्धमानम् । प्रयोगविज्ञानेषु बाह्यभोग्यलङ्ग्रहसौविध्यं न वा परीक्षालब्धतथ्यत्वादीनां चमत्कारित्वं तेषामुपादेयत्वप्रतिपादनापात्रम् मुख्यपुरुषार्थनिर्वहणत्वेनैव सर्वेषां प्रयोगाणांमर्थप्रतिपादितव्यवस्थापनात् । तथापि तन्त्र प्रयोगेषु समीक्षापरीक्षाजन्य प्रत्ययस्यापि प्रामाण्यगौरवमस्त्येवेत्यत्रागमविज्ञानस्याधुनिकबहिर्विज्ञानादिना सह साजात्यम्, यथासम्भवं पारस्परिकोपकारकत्वमपि सुधीभिर्योपेक्षितव्यम् ।

तन्त्रागमयोरैक्यम् तयोश्चाधुनिकउपयोग:

कृते श्रुत्युक्त आचारस्त्रेतायां स्मृतिसम्भव: ।
द्वापरे तु पुराणोक्त: कलौ आगमसम्मत: ।। इति

अद्यत्वेविविधघटनासङ्घट्टकुले लोकव्यवस्थितिगर्भे भारतवर्षे पाश्चात्यसभ्यतासम्पर्कात्तत्प्रयोगे यदावांशिकी मर्यादा पतिपदामवधीर्यते, भक्ष्याभक्ष्ययोर्विवेको उसभ्यता विभाव्यते, स्पृश्यास्पृश्ययोर्विचारो निराक्रियते, वर्णाश्रमव्यवस्था युगधर्माननुकूलेति, प्रतिपाद्यते परमेश्वरो परलोके पुनर्जन्मनि चास्तिक्य बुद्धे: विभ्रम इति लंगिरन्ते तदा भारतीयचिरन्तन संस्कृते: संस्कारस्य ज्ञानस्य च यदस्ति कश्चित् संरक्षणोपायस्तर्हि तन्त्रमित्येव युक्तमुत्तरम् -

यथा चोक्तं निर्वाणतन्त्रे -

"विना ह्यागममार्गेण कलौ नास्ति गति:प्रिये"इति ।

एवं हि तन्त्रज्ञानशून्या केचन तन्त्रस्याभिप्राय:मन्त्र, यन्त्र साधनं पुरश्चरण, मुच्चाटनं, मारणादिकन्च मन्यन्ते, परमिदृशं तन्त्रसाज्ञानग्रस्ता एव कथयन्ति । एतद् विपरीतश्च तन्त्रग्रन्थेषु सर्वात्मिकाया: भौतिकया:समृद्धे: सर्वविधायाआध्यात्मसम्पद:, वह्वीनां विस्मयावहानां सिद्धीनान्चार्जनस्य च पन्थान: निर्दिष्टा:सन्ति । तन्त्रेषुदार्शनिकविचाराणामतिगहनं समीक्षणमपि भवति ।

---

1. कुलार्णवतन्त्रे -----1

अद्यत्वे समग्रे भारते व्यवहारे शास्त्रे च तन्त्रसंस्कृते: प्रभावा: परीक्षान्ताम् । शैव-शाक्त वैष्णव-सौर गाणपत्यादय:सेर्वे पन्थान: तान्त्रिकीरीतिं मनुसरन्ति । कस्य देवस्य कथमुपासना कर्तव्या ,कस्या: उपासनाया: कियत् फलमित्यादयो विषया: तान्त्रिका:। ग्रामे-ग्रामे नगरे-नगरे गेहे-गेहे अपि तन्त्रोक्त देवानां देवीनाञ्चोपासना प्रचलति । अत: भारतीयजीवनपद्धत्या तन्त्रागमस्याभेदसम्बन्ध: । तन्त्रागमशास्त्रे सर्ववर्णानां ,नराणां नारीणाञ्चाधिकारादस्याशास्त्रस्यलोकोपयोगिता सहैव क्रियालाघवात् युगधर्मितापि सिद्ध्यति । अत: अद्यत्वे सम्भारलाघवा-दाशुसिद्धत्वात् सर्वेषाञ्चाधिकारात् तन्त्रोक्तपन्था: एव समीचीन इति न विस्मर्तव्यं नरीक्षीर विवेकिभि: ।

तन्त्रागमेन व्याकरणागमस्य सम्बन्ध:

भारतीया हि संस्कृति: निगमागममूलिका निगमो वेद:। आगमश्च -

"आगमो ज्ञानमित्युक्तमनन्ता:शास्त्रकोटय:"।[1]

इति रीत्या समस्तवैदिकविचारधारासम्पोषक:शब्द:। किन्च तत्तच्छास्त्राणां पर्यायत्त्वेन आगमशब्दस्य व्यवहारो भवति। अत: शैव -वैष्णव-शाक्त-सौर-गाणपत्य-जैन-बौद्धादि समस्त विचार-प्रचारा:आगमपदेन व्यवह्रियन्ते । वाक्यपदीयकारेण भर्तृहरिणापि -

---

1. स्वच्छन्दतंत्रे उ 4 श्लोक 432

"सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजन्तुषु ।।"[1]

इति शब्देन व्याकरणस्य स्मृतितत्त्वेन स्मृतम् ।

व्याकरणशास्त्रे महाभाष्यरीत्या "अथ शब्दानुशासनमिति"[2] प्रतिज्ञया शब्दविषयक विचारा: प्रकाशनीया: इति प्रस्फुटीभवति । तन्त्रागमे पि शब्दवर्णाद्यधिकृत्यैव सूक्ष्मविचारा: प्रभवन्ति । उभयत्र तत्त्वतो निरूपणीया: विषया:समानैव ।

किन्त अद्यत्वे तत्त्वतो प्रचलितस्यपाणिनीयव्याकरणस्य विशाल:प्रासाद: माहेश्वरसूत्रस्तम्भेष्वेवावस्थिति: । तन्त्रागमे पि शैव शाक्त विचाराणामेव स्थिति: । अत: उपजीव्यत्वेन तत्तो यं उभयत्र समानैव । अत: महावैयाकरणेन भट्टोजिदीक्षितेन माहेश्वरसूत्रमुद्दिश्य साधु एव भणितम् ----

"इति माहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि"।[3]

एतेन व्याकरणशास्त्रस्य शैव-शाक्त दर्शनस्योपजीव्यतासुतरामेव सिद्ध्यति । अतएव नागेशभट्टादय: परवर्ति आचार्या:तन्त्रागमसिद्धान्तानुकृत्य "यदि व्याकरणागम इति शब्दं व्यवहरन्ति,तर्हि न किञ्चिच्चित्रम् ।

1· वाक्यपदीये ब्रह्मकाण्डे कारिका सं· 126

2· महाभाष्ये पश्पशान्हिके । सूत्रम् ।

3· सिद्धान्त कौमुद्यां संज्ञाप्रकरणे आरम्भे पृ·सं· 2

दृश्यतागेको व्यावहारिको विषयः । ज्ञानन्तु शिवाराधनेनैव प्राप्यते । "ज्ञानमिच्छेन्महेश्वरात्"इति शिवसूत्रनिर्देशेन ज्ञानागारः शिवःशक्तिश्चेति । अतः व्याकरणाध्ययनाध्यापनपरम्परायां समागतायां त्रयोदश्यां तिथौ गुरवः शिवस्य दिवसमिति विज्ञाय शिष्यान्नाध्यापयन्तिस्म शिष्याश्चापि तत्त्वलाभाय तद्दिने विशेषतो शिवस्य व्रतमनुष्ठाय तमर्चयन्तिस्म ।स्थितिरियं व्याकरणशास्त्रीयपरम्परायां क्वचिदद्यापि दृश्यते । एतेन मौलिकतत्त्वे शिवे-शक्तौ च व्याकरणशैवसिद्धान्तानाञ्च समानमभिनिवेशः सङ्गच्छते । अतः शैवागमवत् व्याकरणागमस्य व्यवहारः सर्वथासमीचीन एव ।

व्याकरणागमो ष्टौ स्फोटानङ्गीकृत्य वाक्यस्फोटे चरमतत्त्वं सम्पाद्य कृतकृत्यता सम्पद्यते । परं तन्त्रागमे परायां सर्वतत्त्वमूलायामेवैतत् सर्व सम्पद्यत इति । केवलं शब्दभेदैव न तु तत्त्वतोर्थगतभेदः ।

शब्दसाधुत्वनिबन्धनं व्याकरणस्य मुख्यः प्रतिपाद्यः,परं कश्चासौशब्दः यश्च महाभाष्यरीत्या नित्यः कूटः अविचालीति सिद्ध्यति तमेव शब्दं तन्त्रागमाचार्या पि -वर्ण-मन्त्र पदादिशब्दैरभिमताप्यनित्यत्वं सङ्गरन्ते । क्वचिद् क्वचिद् प्रक्रियाभेदमुद्भाव्य असङ्गतिर्दृश्यते । तत्तु स्वशास्त्रानुरोधेन युक्तमेव परं तत्त्वतः पदार्थानां समीक्षणे उभयत्र समानैव सरणिः । अतः भर्तृहरेः-"इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"[1] । इति कथनस्य "पितरौ चास्य स्वर्गे लोके महीयेते"[2] इति भगवतः पतञ्जलेः कथनस्य च सङ्गतिर्भवेत् ।

1· वाक्यपदीये ब्रह्मकाण्डे कारिका सं 18

2· महाभाष्येपस्पशाह्निके ।

तन्त्रागमसिद्धान्तानुसारन्तु:-

शब्दस्वरूपमखिलन्तु धत्तेशङ्•करवल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखर: ।।[1]

अयमेव भाव: वाक्यपदीये पि--------

" न सो ि स्त प्रत्ययो लोके य: शब्दानुगमादृते ।
अनुविद्धमिवज्ञानं सर्वशब्देन भासते ।।[2]

इत्यादावपि सङ्•गच्छते । अत: शब्दार्थयो:समीक्षणे पि उभयशास्त्रयो: समानैव दृष्टिर्दृश्यानीति संक्षेपेण निवेद्यविरमामि ।

1• वायवीय संहितायाम् ।

2• वाक्यपदीये ब्रह्मकाण्डे का॰सं॰ 123

चतुर्दश माहेश्वरसूत्रमुद्दिश्यव्याकरणशास्त्रस्य प्रवृत्तौ आगमस्यैव प्रभाव:

भगवान् पतञ्जलिर्महाभाष्ये चतुर्दशसूत्रव्याख्यावसरे उक्तवान् । "अथगिमिदमक्षरमिति"[1] ।व्याख्याकार कैयटश्च- वर्ण समाम्नाय इति[2] व्यवहारयो वा स्वरसो क्षरश्च इत्युक्तत्वात्प्रश्न:"। नागोजिभट्टाश्च-[3] अ इ उ ण् सूत्रे यं व्यवहारो भाष्ये "। प्रश्न इति । तद् घटकीभूता- क्षरपदार्थावगमायेति भाव:"।

अक्षरं किमिदमिति प्रश्नस्योत्तरं भाष्ये स्वयमेव प्राह तदुत्तरं भगवान् पतञ्जलि: । तथाहि -"अक्षरं न क्षरं विद्यात्""न क्षीयते न क्षरतीति वाक्षरम्" इति । प्रदीपे पि- "अक्षरं न क्षरमिति"क्रियाशब्दो यं नित्यस्यार्थस्य वाचक इति प्रदर्शयति । क्षि क्षय: क्षरतेर्वा निवाशार्थस्य नञ् पूर्वस्यरूपम् । तच्च ब्रह्मतत्त्वं परमार्थतो नित्यम् । व्यवहारनि- त्यतयातु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा इत्युक्तम् ।

नागोजिभट्टाश्च - ब्रह्मतत्वस्यैव तत्त्वे हेतुगर्भविशेषण माह- परमार्थतो नित्यम् । यतस्तस्य प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्वात् । सर्वेषां शब्दानामाकाशादिवत् सृष्ट्यादावुत्पत्ति: प्रलये च नाश इति ।।

एवन्च व्यवहारनित्यतयाक्षर ब्रह्मसादृश्यवतां तेषां पदादि- रूपाणामयं वर्णसमाम्नाय:शास्त्रप्रवृत्तिद्वारा बोधक इति वर्णसमाम्नाय

1• महाभाष्ये । अध्याये ।पादे द्वितीयान्हिकान्ते ।

2• " " " प्रदीप टीकायाम् ।

3• " " " उद्योते ।

इति चतुर्दशसूत्र व्यवहारोत्पत्ति: । एवन्च शब्दे औपचारिको क्षरपद प्रयोग:इति भाव: । इति प्राहु: । नागेश:एवन्चाक्षर समाम्नाय इत्यस्य श्रुतिवर्णसङ्घात इत्यत्र तात्पर्यम् ,इत्युक्त्वा वर्णसमाम्नायस्य चतुर्दश-सूत्रात्मकस्य श्रुतिमूलकत्वमिति ।

अक्षरसमाम्नायस्योपदेश: किमर्थमिति जिज्ञासायां महाभाष्ये-

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्मवर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ।।[2] इति

अयमक्षरसमाम्नायो वा वर्णसमाम्नाय: पुष्पित:फलितश्चन्द्र-तारकवत् प्रतिमण्डितो ज्ञातव्यो ब्रह्मराशि: सर्ववेदफलप्राप्तिश्च तज्ज्ञाने भवति ।

"मातापितरौ चास्य स्वर्गलोके महीयेते"।।[3] इत्युक्तम्

महाभाष्य पङ्क्तेराशय: कैयटेनोक्तम् । वर्णज्ञानमितिवर्णा: येन शास्त्रेण ज्ञायन्ते तद् वाचो विषय:शास्त्रेण वाग्विषयीक्रियते,साध्यते, शास्त्रेण तस्या:परिज्ञानादित्यर्थ: । ब्रह्मवेद: पदे वर्तते । तस्य च शास्त्रं विषय:।

इष्टबुद्ध्यर्थमिति- कदादिदोषरहितवर्णज्ञानार्थमिति ।

लघ्वर्थमिति- अनुबन्धकरणार्थमित्यर्थ: । वाक्समाम्नाय इति । एतावद्भिरेव वर्णै वाग्व्यवहार:। पुष्पित: फलित इति । दृष्टादृष्ट-फलाभ्यामुदयनि:श्रेयसाभ्याम्च । चन्द्रतारकवदिति ।अनादित्वान्नित्यत्वा

1. महाभाष्ये । अ० ।पा० द्वितीयान्हिकान्ते ।
2. " " "
3. "

वाग्व्यवहारस्य सूचयति । ब्रह्मराशिरिति । ब्रह्मतत्त्वमेव शब्दरूपतया प्रतीयते । सर्ववेदेति । सर्ववेदाध्ययनवृत्तस्य पुण्यस्य यत्फलं तदवाप्नोतीत्यर्थः । इत्येवं रूपेण कैयटेन भाष्याशयः वर्णितः ।

उद्योतकाराश्च[1]

"येन शास्त्रेणेति"। चतुर्दशसूत्रात्मकेन तन्मूलक पाणिनिव्याकरणे चेत्यर्थः । तच्छास्त्रम् भाष्ये यत्र चेत्यनेन वाक् परामृश्यते ।का सा वाक् ? या ब्रह्म च वर्तते । वा तुराणादि भाष्यार्थः सङ्गच्छते । वाग्व्यवहारस्येति तत्सङ्ग्राहकस्येति चतुर्दशसूत्ररूपस्येत्यर्थः । यथा श्रुते हि भाष्ये वर्णसमाम्नायोद्देश्येन पवृत्तविशेषणानामन्यतया योजने भाष्यविरोधः ।

अत एवैतत्प्रतीकमुपादाय भर्तृहरिणा-----

"अस्याक्षरसमाम्नायस्य वाग्व्यवहारजनकस्य न कश्चित् ।
कर्तारस्त्वेवमेव वेदे पारम्पर्येण स्मर्यमाणम्"इति व्याख्यातम् ।

तदुक्तं नन्दिकेश्वरेण -

"अकारः सर्ववर्णाग्र्यःप्रकाशः परमेश्वरः" ।

इत्यादिना सर्ववर्णानां महेश्वररूपता अक्षरेभ्य एव च मह्दादि सृष्टिपरतया चतुर्दशसूत्रं योजयता । अन्ये तु वर्णज्ञानं चतुर्दशसूत्रात्मकं शास्त्रं वाचो वेदशास्त्रपुराणरूपायाःतत्र वाचो विषयो निबन्धनम् । यत्र च वर्णसमाम्नाये ब्रह्मबोध्यतया भवति । उक्ता चैषा चतुर्दशसूत्री ब्रह्मपरतया नन्दिकेश्वरेण । तदर्थं सकलवाग्ज्ञानार्थं ब्रह्म

---

1. महाभाष्ये -द्वितीयाह्निके "अ इ उ ण्" सूत्र व्याख्यायाम् ।

बोधनार्थञ्च । अनेन सकलवेदाध्ययनेन यत् फलं तद् वर्णसमाम्नाय ज्ञानेनोक्तम् । वाग्विषयइत्यस्य व्याख्या वाक्समाम्नाय इति सर्ववाक्रूपत्वात् । "चन्द्रतारकवत् प्रतिमण्डितं इत्यनेनास्यानादित्वं प्रकाशितम् "तादृशो यं ब्रह्मराशिर्वेदितव्यः। बोध्यबोधकयोरभेदात् । सर्ववेदेति । सर्ववेदाध्ययनजन्यपुण्यफलस्य मनःशुद्धिरूपस्य प्राप्तिरूपस्य ज्ञाने ध्ययनमात्रे स्वरूपं जातम् । इदमेव पूर्वं पुष्पितम् । तादृशपुत्रवत्वेन च मातापित्रोःस्वर्गे महीयेते । यथा कृतराजसूययुधिष्ठिररूपपुत्रेण पाण्डुः "स्वर्गे महीयते"[1] इति प्राहुः ।

अत्रोद्धृतेन भाष्यप्रदीपोद्योतवक्तव्येन महेश्वरसूत्राणामध्ययनेन सर्ववेदशास्त्रपुराणरूपायाः सकवाचः अध्ययनस्य फलं प्राप्यते । अत एवोक्तम् – केनचिदभियुक्तेन –

"यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम् "इति।

महाभाष्ये च–

पुराकल्प एतदासीत् "संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते"[2] इति कथितम् ।

अत्रोक्तरीत्यादर्शनांशे व्याकरणागमस्योपरितन्त्रागमस्य प्रभावः स्पष्ट एव प्रतिभाति । तन्त्रागमे निखिलमेव षट्त्रिंशत्तत्त्वजातं शिवशक्त्योरभेदेनस्थित संविदःपरावाचःमहिम्नैव प्रकाशयति । पाणिनीयं हि व्याकरणं चतुर्दशमाहेश्वरसूत्रनिर्देशं विना निष्प्रयोजनं भविष्यति ।

---

1. महाभाष्ये प्रदीपे उद्योते । अ० । पा० द्वितीयान्हिकान्ते ।
2. " पस्पशान्हिके "दुष्टो शब्दः "इति प्रयोजन निरूपणे ।

अत: पाणिनीय सूत्राणामपि सूत्रभूतानीमानि माहेश्वरसूत्राणिआगमस्य रहस्य भूतानि पाणिनीयव्याकरणस्योपजीव्यभूतानीति नागेशभट्टा: आमनन्ति ।

तन्त्रागमे माहेश्वरसूत्राणां तत्त्ववर्णानान्च विमर्श:

अनन्तकोटिब्रह्माण्डाधीशस्य परमेशितु:सृष्ट्युपयोगित्वेन शब्दार्थमयस्य रूपद्वयस्य स्थितिं प्रकाशयति । शब्दब्रह्माण्डपणवनाम्ना अर्थब्रह्म च परपणवनाम्नापि व्यवह्रियते । तन्त्रागमिकेष्वियं सृष्टि: परमशिवस्य चिति शक्त्या वा परिणामभूतेति । उक्तन्च -

"या सा शक्तिर्जगद्धातु: कथिता समवायिनी"।।[1] इति

अन्यच्च -

आस्थाय देवरूपेण वपुषा चेन्महेश्वर: ।
महेश्वरत्वं संवित्त्वं तदत्यस्यद्घटादिवत् ।।[2] इति

अकारादारभ्य हकारपर्यन्तस्य अक्षरसमाम्नाय स्याह-मित्यस्याद्वैतता स्ति । तत्राकार:सर्ववर्णाग्र्य:प्रकाश:परम:शिव: भवति । हकारश्च चरमावयवस्थित: विमर्शस्वरूप: । अनयोर्सामरस्यमेव परा हन्ता स्वरूपेण प्रकाशयति । कथितन्च -

---

1. मातृकाचक्रविवेके 3/5
2. तन्त्रालोके 3/10

अहमित्येकरसैतं यत्प्रकाशात्मविभ्रम: ।
अकार: सर्ववर्णाग्र्य: प्रकाश: परम: शिव:।।

हकारो न्त्य:कलारूपो विमर्शाख्य:प्रकीर्तित:।
अनयो: सामरस्यं यत्परस्मिन्नहमिस्फुट:"।।इति

गीतायामपि ---

"अक्षराणामकारो स्मि"[2] इत्युक्तम् ।

योगिनी हृदये च -

शून्याकाराद्विसर्गान्ताद् विन्दुप्रस्पन्दसंविद: इत्युक्त्वा शून्याकार शून्यमात्ररूपोयो विसर्गान्त: योक्षास्वरान्यस्तस्माद्विन्दु-विशेष उत्पन्न इति । अकारहकारावेव शून्याकारौ कीर्तितौ । अतएव शून्यश्चासावकारश्चेति केचिद् व्याख्यापविसर्गौ हकार स एवान्ते यस्येति विग्रहप्रदर्शनपूर्वकं हकारविशिष्टादकारादिति कथ्यते । अत एवाकार: हकारयोर्मध्ये सर्ववर्णपाठ: "अह्" प्रत्याहारवदिति । क्षकारस्य हकारादभिन्नत्वात् क्षकारस्य क् + ष् संयोगरूपत्वान्न तद् वहिर्भाव: । एतन्मूलभूत ब्रह्म तु तुरीय विन्दुरित्युच्यते, तद्रूपाभ्यां, शून्यरूपाभ्यामकारहकाराभ्यामुत्पन्ना कामकला व्यक्ताव्यक्तविलक्षणा "अहं पदवाच्या" । अकारहकारोभयात्मकत्वं शिवशक्तिरूपद्वयं चाहं पदस्य निष्कृष्टो र्थ: ।

---

1. वरिवस्यारहस्ये पृ सं 5
2. गीतायां । अध्याये श्लोकांश 33

उपनिषत्स्वहमिति पदस्य निर्देशः

माहेश्वरसूत्रेष्वादिमो कारः अन्त्यो हकारः तयोः समाहारः "अहम्" इति । वेदान्तदर्शनेषु चतुर्षु महावाक्येषु "अहं ब्रह्मास्मि" इत्यवसानिको त्यन्तिकश्च वाक्यम् ।

उक्तञ्च उपनिषत्सु -

"ब्रह्म वा इदमग्र आसीत् तदात्मानमेव वेदाहं ब्रह्मास्मीति ".[1]

"त्वं वा अहमहं वैत्वम्".[2]

"कस्त्वमित्यहमिति होवाचत्वमेवेदं सर्वं तस्मादहमिति सर्वाभिधानम्".[3]

"अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतो हमुत्तरतो हमेवेदं सर्वम् ।।"[4]

इत्युक्तम् -

विरूपाक्षपन्चाशिकायामहमित्यस्य विचारः

पाणिनीयव्याकरणोपजीव्यभूतस्य माहेश्वरचतुर्दशसूत्र-घटितस्य "अल्" प्रत्याहारस्थितस्य वर्णसमाम्नायस्यैवाहमित्तिपदव्यवहारः विरूपाक्षपन्चाशिकायामपि जातः ।

1· बृहदारण्यकोपनिषदि । 2· ऐतरेयोपनिषदि ।
3· तापनीयोपनिषदि । 4· छान्दोग्योपनिषदि ।

तथाहि --

प्रत्यवमर्शात्मासौ चितिः स्वरसवाहिनी परावाक् सा।
आद्यन्तप्रत्याहृतवर्णगणा सत्यहन्ता सा ॥
स्वपरावभासनक्षमा आत्मा विश्वस्य यःप्रकाशो सौ ।
अहमिति स एक उक्तो हन्तास्थितिरीदृशी तस्य ॥[1]

एवमकारहकारयोरवयवयोर्दर्शने पि शास्त्र प्रामाण्यात् सूक्ष्मरूपौ तौ भवतः । तस्यैव च हार्दकलायोगे दीर्घता पि सम्पद्यत इति चतुर्थस्वरस्य कामकलारूपत्वं मन्त्ररहस्यविद्भिःविज्ञायते । अत एवाकारहकारयोःकामकलात्वं सिद्धं भवति । तद्भूते मन्त्रे विजातीयाक्षरवत्त्वान्यथा नुपपत्त्यापि तयोर्गर्भे सूक्ष्मरूपेणान्येषां वर्णानामर्थसृष्टेरचावस्थानं सिद्धं भवति । यथावटबीजसम्पुटे पर्णकाण्डादेः ।

किन्च वटादिबीजानां स्फोटनेनैवाङ्कुराद्युत्पत्तिरिति बीजस्य पूर्वार्धोत्तरार्धयोर्वियोगइत्यभिवादम् । तच्चार्धद्वयं वदति वृक्षे कस्मिन् कस्मिन् मार्गे स्तीति दुर्बोधम् ।

----

1. विरूपाक्षपन्चाशिकायां द्वितीयस्कन्धे १/१ कारिके.।

वीरवस्यारहस्ये अहमितिवर्णघटितस्यमाहेश्वरसूत्रसमुदायस्य सर्वशक्तिमत्त्वम्

माहेश्वरसूत्रोत्पन्नानि अज्झलक्षराणि विश्वरूपाणि । अस्यैव माहात्म्यं नागेशभट्टेन लघुशब्देन्दुशेखरे संज्ञाप्रकरणे प्रकाशितम्। लघुशब्देन्दुशेखरोक्तमेव वीरवस्यारहस्ये भास्कररायेणापि प्रकटितम्-

अहंकारौ शिवशक्तीशून्याकारौ परस्पराश्लिष्टौ ।
स्फुरणप्रकाशरूपावुपनिषदुक्तं परं ब्रह्म ।।
विश्वसिसृक्षावशतः स्वांशांशक्तिंविलोक्य ब्रह्म ।
विन्दूभवति तमिन्दुं प्रविशति शक्तिस्तुरक्तविन्दुतया।।
एतत् पिण्डमितयं विकासं हकारचैतन्यम् ।
एषा हं पदतुर्यस्वरकामकलादिशब्दनिर्देश्या ।।
वागर्थ सृष्टिबीजं तेनाहन्तामयं विश्वम् ।
अन्त्यप्रथमे मध्यचतुर्थे मन्त्रेपि तौ व्यक्तौ ।।
तेनात्मनामनुजगतामभेद एवात्र भावार्थः ।।[1]

एकञ्च प्रथमं विमर्शशक्तेर्हकारः उत्पन्नः ततःप्रकाशादाकाशःततो विमर्शात् सकारस्ततः प्रकाशादापःततो विमर्शाल्लकारः ततःप्रकाशात् भूमिः, इत्येवं क्रमेण पञ्चमहाभूतोत्पत्तौ सत्यामपि हकारवद्विमर्शविशिष्ट प्रकाशस्यैव आकाश प्रतिकारणत्वात्-उक्तरीत्या कारणत्वावच्छेदकत्वस्य हकारेसिद्धेर्विनिगमनाविरहात् कारणत्वमपि सिध्यति । उक्तञ्च वीरवस्यारहस्ये -

---

1· वीरवस्यारहस्ये द्वितीयांशे श्लोकाः 69,70,71,72,73·

व्योमादिजनकहकारस्वर्णैर्घटनेन पञ्चभूतमयी ।
पञ्चचतुस्त्र्येकगशब्दादि गुणा त्मपञ्चदर्शवर्णा ।।[1]

तत्रैव टीकायाम् -

हकाराद् व्योम संभूतं ककारात्तु पभञ्जन: ।
रेफादग्नि: सकाराच्च जलतत्त्वस्य सम्भव: ।।
लकारात् पृथिवी जाता तस्माद् विश्वमयी च सा ।।[2]

अत्रायमभिसन्धि:-

आकाश:पञ्चविध: वायुश्चतुर्विध:, अग्निस्त्रिविध:, जलं द्विविधं भूम्येकविधेति पञ्चीकरणवार्तिकविधिना बोध्यम् । एवं पञ्चादि-संख्याकानामाकाशादीनां गुणा:शब्दादयो पि तादृश संख्याका एव सन्ति। तेन आकाशादिषु पञ्चसु पञ्चशब्दा:, वाय्वादिषु चतुर्षु चत्वार: स्पर्शा:, अग्न्यादिषु त्रिषु त्रीणि रूपाणि, जलभूम्योर्दौरसौ, पृथिव्यामेको गन्ध इत्येवं क्रमेण पञ्चदशगुणा भवन्ति , पञ्चदशभिर्वर्णैरभिन्ना इति पञ्चदशानां वर्णाना-मुत्पत्ति: ।

नित्याषो शिकार्णवे माहेश्वरसूत्रोक्तवर्णानां स्थिति समीक्षणम्

सर्वे वर्णास्तकागन्ता स्ते च शक्त्यात्मका:पिये ।
शक्तिस्तु मातृकाज्ञेया सा च ज्ञेया शिवात्मिका ।।[3]

1· वीरवस्यारहस्ये द्वितीयांशे श्लोका 74

2· " श्लोक 74 तत्रै टीकायाम् पृ·सं· 42

3· तन्त्रसद्भाववचनम् नित्याषो शिकार्णवे भूमिकायां 62 पृष्ठे ।

तन्त्रसद्भाववचनात् शिवशक्त्यादिपतिनियतव्यपदेशमहिष्णु-रनाख्य:परस्परामर्शात्मनान्तर: प्रकाश: एव परं तत्त्वम् ।

स एव स्वातन्त्र्यात् विश्वमप्रकाशयितुं प्रथमं शिवशक्तिरूपतां स्वात्मनि प्रकाशयति अकारादिक्षकारान्तानां मातृकामुल्लासयति । अत्रा नुत्तरलिपि अकार: विमर्श लिपिश्च हकार: । अत्रायमर्थ: -

"अकार: सर्ववर्णाग्र्य: प्रकाश: परम: शिव:

हकारो ऽन्त्य:कलारूपो विमर्शाख्य: प्रकीर्तित: ।।इति[1]

सङ्केतपद्धतिवचनमुपोद्वलयति-

एवञ्च यस्या:पूर्णहन्ताया: पराशक्ते:कलाभूतानि यान्य-क्षराणि तान्येव विश्वसूचकतया तेषु प्रकर्षेण तादात्म्येन एतज्जगत्त्रयम् । ब्रह्माण्डादिकटाहान्तं समुल्लसति । किञ्च मूलाधारादारभ्यब्रह्मरन्ध्रपर्यं-न्तमित्यर्थ: । इयमेव मातृका पञ्चाशद्रुद्राणां श्रीकण्ठादीनां जननी ।

कथितञ्च ----

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।

ब्रह्मादि कटाहान्तं तां वन्दे सिद्धमातृकाम् ।।इति[2]

प्रपञ्चसारेसप्तवर्णात्मिकामातृकास्तुता । तथाहि -"अकचट-तपयशादै:सप्तभिर्वर्णवर्गै:[3] इति । शैवेषु अष्टवर्णात्मिका नित्याषो शिका-र्णवे चाष्टवर्गात्मिका मातृका ।

1• सङ्केतपद्धति वचने 62 पृ

2• नित्या प० प श्लोक सं 5

3• प्रपञ्चसारे । प श्लोकांश: ।

यथा हि -

"वर्गानुक्रमयोगेन यस्यां मात्रष्टकं स्थितम् ।
वन्देतामष्टवर्गोत्थ महासिद्धयष्ट केश्वरीम् ।।[1] इति

परात्रिंशिका दृष्ट्या माहेश्वरसूत्रोक्तवर्णसमीक्षणम्

वर्णमात्रामयी अक्षमाला मातृका वान केवलं सामान्य जनैः किन्तु शिवेनाप्यनुष्ठीयते सा । तथा च परात्रिंशिकाटीकायामुक्तम् -

"कथयामि वरारोहे यन्मया जप्यते सदा ।
अकारादिक्षकारान्ता मातृकावर्णरूपिणी ।।
चतुर्दशस्वरोपेता बिन्दुत्रयविभूषिता ।
कलामण्डलमास्थाय शक्तिरूपं महेश्वरि ।।
ककारादिक्षकारान्ता वर्णास्तु शक्तिरूपिणः ।
व्यञ्जनत्वात् सदानन्दोच्चारणं सहते यतः ।।
अकारः प्रथमं देवी क्षकारो न्यस्ततः परम् ।
अक्षमालेति विख्याता मातृका वर्णरूपिणी ।।इति[2]

अन्यतन्त्रागमग्रन्थेषु माहेश्वरसूत्रोक्तवर्णस्थितिः

तन्त्रागमग्रन्थेषु विलोममातृकायाः, बहिर्मातृकायाश्च भूयस्त्वेन विचारः दृश्यते । इदानीं प्रचलितायाः मातृकायाःसबिन्दुः प्रतिलोमरूप एव विलोममातृका कथ्यते । लिपिमयीदेवी एवास्ति बहिर्मातृका । अक्रमविशेषेण अकारादिवर्णैरेव देव्यवयवानां निर्मितः भवति ।

---

1. नित्या० प० प श्लोक सं ।।
2. परात्रिंशिकाटीकायां पृ 194

आधार स्वाधिष्ठानमणिपूरानाहतादिचक्रेषु यदा च साधकःमातृकावर्णानां वं,शं,षं,सं प्रभृतीनां न्यासं करोति, तदा सा स्थितिः अन्तमातृकापदेनोच्यते । अकारादारभ्य क्षकारान्तःक्रमः सुश्लिष्टः अकारश्च मातृकाद्यः[1] क्षकारश्च मातृकान्त इति कथ्यते ।[2]

अकारहकारयोरनुस्वारविसर्ग रूपस्याहमितिपदस्य गीतायामपि निरूपणं दृश्यते । -

तथाहि - अक्षरं ब्रह्म परमं स्वभावो ध्यात्ममुच्यते ।
भूतभावोद्भवाकारी विसर्गःकर्मसंज्ञितः ।।[3]इति

माहेश्वरसूत्रोक्तस्य स्वर-व्यञ्जनअक्षरसमुदायस्य शिवशक्तिमयत्वात् बीजयोनिसम्बन्धकल्पना पि तन्त्रशास्त्रे समधिगम्यते । तत्र व्यञ्जनानि योन्याख्यानि स्वराश्च बीजाख्याः । तथाहि -

बीजयोन्यात्मकाद् भेदात् द्विधाबीजं स्वराःमताः।
कादिभिश्च स्मृता योनिर्नवधावर्गभेदतः ।।
बीजमत्रशिवः शक्तिर्योनिरित्यभिधीयते ।।[4] इति

-नपुनरन्तरेणाचं व्यञ्जनस्योच्चारणं सम्भवतीति"व्याकरणागमसिद्धान्तस्य पुष्टिःस्वव्यञ्जनवर्णयोबीजयोनिनामधेययोः परस्परभविनाभावसम्बन्धा तयोरपार्थक्यं मन्तव्यम् ।

1· मातृकाद्यःस्वराश्च प्र थमो भवेत् ।।2 मातृकानिघण्टुः
2· क्षकोषः-----मातृकान्तो नलक्षणौ ।। 172 पकारान्तरमन्त्राभिधानम् ।
3· गीतायां 8 अ 32 श्लोक ।
4· मालिनीविजयोत्तरतन्त्रे तृ अधि श्लोकः 1,11,12

काशिकायां "अइउण्" इति पतीकमादाय नन्दिकेश्वरेणोक्तम् -

"अकारो ब्रह्मरूप: स्यान्निर्गुण: सर्ववस्तुषु ।
चित्कलां समाश्रित्य जगद्रूपं उणीश्वर: ।।
अकार:सर्ववर्णाग्र्य: प्रकाश: परमेश्वर: ।
आद्यमन्त्येन संयोगादहमित्येव जायते ।।
सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमावाक् तत:स्मृता ।।
वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता तत: ।
सृष्ट्याविर्भावमासाद्य मध्यमावाक् समागता ।।
अकारं सन्निधीकृत्य जगतां कारणत्वत: ।।
इकार: सर्ववर्णानां शक्तित्वात् कारणं मतम् ।
अकारो ज्ञप्तिमात्रं स्यादिकारो चित्कलामता:।।[1]
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वर: ।।इति

उक्तञ्च -

वृत्तवृत् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ।।
वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ।
चन्द्रचन्द्रिकयोर्यद् वद् यथावागर्थयोरपि ।।
स्वेच्छया स्वस्यचिच्छक्तौ विश्वमुन्मीलयत्यसौ ।
वर्णानां मध्यमंक्लीबमृलृवर्णद्वयं विदु: ।।इति[2]

---

1. नन्दिकेश्वर काशिकायाम् 3,4,5,6,7,9 श्लोका: ।
2. " " 1, 11, 12, "

एओङ् सूत्रमुद्दिश्य काशिकाटीकायाम् -

"एओङ्मायेश्वरात्म्यैक्यविज्ञानं सर्ववस्तुषु ।

साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ॥[1] इति

ऐ औच् सूत्रे पि उक्तम् -

ऐ औच् ब्रह्मस्वरूपः सन् जगत स्वान्तर्गतं ततः ।

इच्छया विस्तरं कर्तुमाविरासीन्महामुनिः ॥[2] इति

क्रमेणैव हयवरडिति सूत्रमाश्रित्य विलक्षणं तन्त्रागमसिद्धान्ताभिमतं व्याख्यानं नन्दिकेश्वरेण काशिकाटीकायां प्रदर्शितम् । तथाहि -

हयवरट् ------

भूतपञ्चकमेतस्मात् हयवरण् महेश्वरात् ।

व्योमवायुवम्बुवह्न्याख्य भूतान्यासीत् स एव हि ॥

हकाराद् व्योमसंज्ञं च यकाराद् वायुरुच्यते ।

रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक् ॥[3] इति

एवमेवान्येषु सूत्रेषु तन्मात्राणामिन्द्रियाणां प्राणवुद्ध्यहंकारादीनां गुणानाञ्चोत्पत्तिस्तत्र निर्दिष्टा । हलित्यवसानके चतुर्दशसूत्रे सर्वानुग्रहसाक्षी तत्त्वातीतो हलस्यामिति डक्कानिनाद व्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन् तिरोदधे । यतोहि - हकारःशिववर्णः स्यादिति शैवागम सिद्धान्तः - उक्तञ्च -

----

1· नन्दिकेश्वर काशिकायाम् 13 श्लोकः

2· " " 14 "

3· " " 15, 16 श्लोकौ ।

तत्त्वातीत: पर:साक्षी सर्वानुग्रहविग्रह: ।
अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ।।इति[1]

एवमेव तन्त्रागमे पन्चाशद् वर्णमातृकाणां पृथक्-पृथक् वस्थिति:, तद्वर्णस्थितदेवता तत्स्मरणफलादिकन्च तत्र तत्र विस्तरेण प्रदर्शितम् । उक्तन्च वातुलशुद्धाख्यतन्त्रे – तथाहि –

अकारादिक्षकारान्तमेकपन्चाशदक्षरम् ।
एते वर्णा: प्रदर्श्यन्ते कामितार्थप्रदायका:।।
स्त्रीरूपाश्चैव पुंरूपास्तथा चोभयरूपका: ।
सर्वे वै देवतारूपा:प्रत्येकं वर्णरूपधृक् ।।
वर्णो बीजं तथार्णं च लिङ्गमपरमात्रकम् ।
एतानि षट् च नामानि वर्ण पर्याय वाचका:।।इति[2]

कामधेनुतन्त्रे वर्णमातृकास्वरूपम्

कामधेनु तन्त्रे वर्णमातृकाया:प्रत्येकं च अक्षरस्याद्भुतं माहात्म्यं प्रदर्शितम् । वर्णरहस्यमज्ञात्वा य: जपं करोति, ध्यानं धारेण योगसमाधिर्वा नुष्ठीयते तस्य सर्वं निष्फलं जायते । प्रदर्शितन्च ------

अज्ञात्वा मन्त्रतत्त्वानि महाविद्यां जपेत्तु य: ।
सर्वं तस्य वृथा देवी किं तस्य जपसाधनै: ।।
ध्यानावधारणे चैव तथा योगसमाधिना ।
वर्णज्ञानं यदानास्ति किं तस्य जपपूजनै: ।।इति[3]

1· नन्दिकेश्वरकारिकायाम् 27

2· वातुलशुद्धाख्यतन्त्रे द्वि पटले श्लोक 2,3,4

3· कामधेनुतन्त्रे । पटले श्लोक 4,5 तन्त्रसङ्ग्रहे भाग- 2

भगवतः महेश्वरस्य कण्ठे या पन्चाशत् संख्याका मुण्डमाला विराजते सा पन्चाशत्वर्णमाला वर्णमातृकास्पैव । तन्त्रागमसिद्धान्ते वर्णा एव सर्वतत्त्वाधारभूता सारभूताश्च प्रदर्श्यन्ते । तथाहि -

मम कण्ठस्थितं बीजं पन्चाशद्वर्णमद्भुतम् ।
नानावर्णयुतं मुदं तन्त्राणां सारमुत्तमम् ।।इति[1]

पन्चाशन्मातृका नानाविद्यामयी सती महाविद्यानामधेया ब्रह्माण्डजनिका भवति । सा चाकारादि क्षकारान्त अनन्तकोटिब्रह्माण्डजननी ब्रह्मविष्णुरुद्रोत्पादिका सर्व जगतःबीजभूता शिवत्वेन शिवतत्त्वे वस्थायिनि भवति ।

उक्तन्च - अकारादिक्षकारान्ता मातृकाबीजरूपिणी ।
विसर्गश्चैव विन्दुश्च त्रिशक्तिकलविग्रह: ।।
वर्णास्तु जायते ब्रह्मा तथा विष्णुःप्रजापते ।
रुद्रश्च जायते देवी जगत्संहारकारक: ।।
मम कण्ठस्थिता या सा शारदावामलोचना:।
तस्या गर्भस्थिता देवी बीजानि विविधानि च ।।
विधृता कण्ठदेशे तु शिवो हं कमलानने ।।इति।[2]

एवं यदा परब्रह्मा प्यक्षराज्जायते तदा किं बहूक्तेनाक्षर माहात्म्येन ।

1· कामधेनुतन्त्रे । पटले श्लोक 6 तन्त्रसङ्गते भाग-2
2· " " " श्लोका:-9, 10, 11, 12 तन्त्रसंग्रहे भाग-2

द्वितीयोऽध्यायः

व्याकरणशास्त्रस्येतिहासः

द्वितीयोऽध्याय:

व्याकरणशास्त्रस्येतिहास:

भारतीया:सर्वे प्राच्या विद्वांस: ऋषय:,मुनयश्च वेदस्यापौरुषेयत्वं स्वीकुर्वन्ति । ईश्वर:प्रतिकल्पारम्भे नादिनिधनरहिता नित्या वाग् वेदस्योपदेशं करोति, तेन वैदिकोपदेशेन च समस्त जगत: व्यवहारं व्यवहरति । भारतीयेतिहासस्याद्वितीयेन ज्ञाता परम् ब्रह्मनिष्ठेन कृष्ण द्वैपायन व्यासेनोक्तम् -

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यत: सर्वा: प्रवृत्तय: ।।इति[1]

भारतीय संस्कृत वाङ्मयानुसारं ज्ञायते यत् लौकिक संस्कृत भाषाया: विकास: वेदेना भूत् । यत् -

सर्वेषां तु स नामानि कर्माणि च पृथक् - पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।इति[2]

अतएव महर्षिभि: सृष्ट्यारम्भ एव वेदमाधारभूतं गत्वा सर्व व्यवहारोपयोगी अतिविस्तृता भाषा संस्कृतैवास्तीत्युपदिष्ट । वेद स्वयमेव कथयति -

"देवी वाचमजनयन्त देवास्तां,
विश्वरूपां पशवो वदन्ति ।।[3] इति

1· महाभारते -

2· मनुस्मृतौ अ० । श्लोक 2।

3· ऋग्वेदे 8/100/।

देवा: यं वाचं वदन्ति तमेव वाचं सर्वसाधारणा: जना:प्रवदन्ति ।

संस्कृतभाषाया: व्यापकता

सर्वं सिद्धान्तितमिदं यत् सर्वासां विद्यानामादि:प्रवक्ता प्रथमो विद्वान् सर्वशास्त्रवेत्ता, सृष्टिकर्ता भगवान् ब्रह्मा बभूव ।[1] ब्रह्मा यथा - आयुर्वेदशास्त्रे "प्रजापतिरश्विभ्याम्, प्रजापतये ब्रह्मा" इति । ज्योतिषग्रन्थे च -"तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा[2] "इति उपनिषदि "तद्धैतद् ब्रह्मा प्रजापतये उवाच[3]"इति। व्याकरणशास्त्रे तु "ब्रह्मा बृहस्पतये प्रोवाच[4]" इत्यादय: ।। यत्पूर्वोत्तरकाले ब्रह्मा "नामाभिधानं "चतुर्वेद विद्" एव मानवाय प्रयुक्तम् । संस्कृत वाङ्मयस्यावलोकनेन ज्ञातं यद् आयुर्वेदो धर्मशास्त्रं, अर्थशास्त्रं, कामशास्त्रं, मोक्षशास्त्राणाञ्च प्रथमो ग्रन्थ इति विस्तृतम् । उत्तरोत्तरक्रमेण मनुष्याणां शारीरिक मानसिक: शक्तीनां ह्रासत्त्वेनातिविस्तृता: ग्रन्था: संक्षिप्तैवाभवन् । वर्तमानकाल उपलब्ध तत्तद्विषयक ग्रन्था: अति संक्षिप्ता: । अत: इदमापातत: मन्यन्ते यद् वर्तमानकालापेक्षया प्राचीने, प्राचीनतरे, प्राचीनतमे कालेषु संस्कृत भाषा, विस्तृता, विस्तृततरा विस्तृततमा सीत् । प्रसिद्ध चीनदेश यात्री ह्यूनसाङ्ग:लिखति यत् -प्राक्कामादेव शब्दभण्डारमति विस्तृतमासीत् । भगवत् पतञ्जलिना पि महाभाष्ये उक्तम् - सर्वे खल्वप्येते शब्दा:देशान्तरे प्रयुज्यन्ते । न चैवोपलभ्यन्ते । उपलब्धौ यत्न:

1· चरकसूत्रस्थाने 1/4

2· नारद संहितायाम् 1/7

3· छान्दोग्योपनिषदे 8/15

4· ऋक्तन्त्रे प्रथमप्रपाठकान्ते ।

क्रियताम् । महान् हि शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती, त्रयोलोकाः चत्वारो वेदाःसाङ्गाः सरहस्याः बहुधा भिन्नाः, एकशतमध्वर्युशाखा, सहस्रवर्त्मा सामवेदः, एकविंशतिधावाबृत्त्यं नवधाथर्वणो वेदःवाकोवाक्यम्, इतिहासःपुराणमित्येतावाञ्छब्दस्य प्रयोगविषयः।[1] इति उक्तैःप्रमाणैःसिध्यति यत् संस्कृत भाषायाः क्षेत्रमति विस्तृतमासीत् । यदि विश्वस्य सर्वाषां भाषाणां नवीनप्राचीनरूपेण परीक्षणं भवेत् तदा स्पष्टमेव ज्ञातं यत् विश्वस्य सर्वासां भाषाणामादिभाषा संस्कृतभाषा ।

संस्कृतभाषायाः प्रयोगे व्यवहारे वा व्याकरणशास्त्रस्य महती आवश्यकता विद्यते । अतः व्याकरणशास्त्रोपरिकिञ्चिन्निवेदनं निवेदयामि। यस्या सम्यक् निर्देशनमहत्वं आधुनिक कम्प्यूटर यन्त्र विज्ञानं साधयति ।

व्याकरणशास्त्रस्योपपत्तिरुपादेयता च

भारतीयविदुषां मतेनेदंसुनिश्चितं यत् संसारे यानि यानि ज्ञानान्युत्पन्नानि तेषामादिः मूलं वेदोएवास्ति । उक्तञ्च "सर्वज्ञानमयो हि सः"[2] । इति मनुसिद्धान्तेन व्याकरणशास्त्रस्यादिःमूलं वेदो स्ति । यथा वेदे पि - "यज्ञेन यज्ञमजयन्त देवाः"[3] इति । "ये सहांसि सहसासहन्ते"[4] इति । येन देवाः पवित्रेणात्मानं पुनते सदा"[5] इति । "तीर्थैस्तरन्ति"[6] इति। शब्दशास्त्रस्य प्रमाणभूतो चार्यः भगवान् पतञ्जलिरपि व्याकरणाध्ययनस्य

1· वैयाकरण म०भाष्ये अ०। पा०।आ०।

2· मनुस्मृतौ अ० 2 श्लोकार्ध 7

3· ऋग्वेदे 1/164/50

4· " 6/66/9

5· सामवेदे 5/2/8/5

6· अथर्ववेदे 18/4/7

प्रयोजनोपरि उक्तमस्ति - चत्वारि शृङ्गा त्रयो अस्य पादा"[1] इति । चत्वारि वाक्परिमिता पदानि"[2] इति । उत्तत्व:"[3] सक्तुमिव"[4] "सुदेवो असि"[5] इतीमानि पञ्चमंत्रान्युद्धृतानि, तेषां व्याख्या च व्याकरण परैव कृता । पतञ्जलेरपि प्राचीन:यास्को पि "चत्वारि वाक्" मन्त्रस्य व्याख्या व्याकरणशास्त्र परकैव । निरुक्ते- "नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा"[6] इति व्याकरणमितीपदं येन धातुना निष्पन्नो भवेत् तस्य मूलार्थं यजुर्वेदेवोपलब्धो स्ति । उक्तञ्च -

"दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापति:"।।[7] इति

व्याकरणशास्त्रस्योत्पत्ति: कदा भूत् ? प्रश्नो यं दुष्कर:। परन्तु इदमेव निस्सन्देह रूपेण कथितुं शक्नोमि यदुपलब्धानां वैदिक पद-पाठानां रचनाभि: ज्ञातं यत् व्याकरणशास्त्रं स्वपूर्णताम वाप्तवान् । प्रकृति प्रत्यय, धातूपसर्ग, समासघटितपूर्वपदानाञ्च विभागं पूर्णतया निर्धारितो भूत् । वाल्मीकीय रामायणावलोकनेन स्पष्टं यत् भगवत:राजराजेश्वर श्रीरामचन्द्रस्य राज्यकाले पि सुव्यवस्थितरूपेण व्याकरणशास्त्रस्याऽध्ययनाऽध्यापनमभूत् । उक्तञ्च -

"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहुव्याहरतानेन न किञ्चिदपभाषितम् ।।[8] "इति

1· ऋग्वेदे 4/58/3
2· ऋग्वेदे 1/164/45
3· " 10/71/4
4· " 10/71/2
5· " 8/69/12
6· निरुक्ते 13/9
7· यजुर्वेदे 19/77
8· वा०रामायणे कि०काण्डे ,3सर्ग श्लोक सं0-29

महाभारत काले पि यास्कीय निरुक्ते व्याकरणशास्त्रस्य प्रवक्तृणामुल्लेखो विद्यते । यथा - "न सर्वाणीति गार्ग्यो वैयाकरणानां चैके" इति[1] । समस्त नामधातूनां प्रदर्शक: मूर्धाभिषिक्त: शाकटायनव्याकरणो पि यास्काद् प्रागेव निर्मितम् "तत्र नामाख्यात जानीति शाकटायनो नैरुक्तसमयश्च"[2] इति । महाभाष्यकार: आचार्यपतञ्जलिरपि भाष्ये - "पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते"[3] इति । युधिष्ठिर मीमांसक मतानुसारं त्रेतायुगस्यारम्भे व्याकरणशास्त्र:ग्रन्थरूपेण सुव्यवस्थितो सीत् । "हमारा विचार है कि "त्रेता युग के आरम्भ में व्याकरण एक ग्रन्थ रूप में सुव्यवस्थित हो चुका था"[4] इति ।

शिक्षा, व्याकरण निरुक्त छन्द, कल्प, ज्योतिष, इति वेदाङ्गानां षडङ्गशब्देन निर्देश:गोपथब्राह्मणग्रन्थे दृश्यते "षडङ्गविदस्तत् तथाधीमहे"[5] इति तथा च वाल्मीकीय रामायणे पि- "नाषडङ्गविदत्रासीनाव्रतो ना बहुश्रुत:"[6] इति महर्षि: पतञ्जलिरपि महाभाष्ये व्याकरणस्य षडङ्गत्वेन गृह्यते - "ब्राह्मणेन निष्कारणो धर्म:षडङ्गो वेदो ध्येयो ज्ञेयश्च"[7] इति सम्प्रत्युपलब्धेषु ब्राह्मणग्रन्थेष्वपि प्राचीनतम: महर्षि: देवलो पि व्याकरणशास्त्रं षडङ्गत्वेन गृह्यते "शिक्षा व्याकरणनिरुक्तछन्दकल्पज्योतिषाणि"[8] इति व्याकरणशास्त्रस्य प्राचीनतमाया: विषये इदमेव सुयुक्तं यद् मूलवेदाति-

---

1• निरुक्ते 1/12

2• निरुक्ते 1/12

3• म०भाष्ये अ०। पा०अ०।

4• व्याकरणशास्त्र का इति०ले०युधिष्ठिर मीमांसकप्रथमे भागे पृ०60

5•गोपथ ब्राह्मणे पू० 1/27

6• वाल्मीकीय रा०बा०काण्डे सर्गे 14 श्लोक 21

7• महाभाष्ये अ०। पा०। आ०।

8• वीरमीत्रोदये परिभाषाप्रकाशे पृ० 20

रिक्तानि यानि भारतीय वैदिक वाङ्मयानि सम्प्रत्युपलब्धानि सन्ति तेषु व्याकरणशास्त्रस्योल्लेखं प्राप्नोति ।

व्याकरणशास्त्रस्यादि प्रवक्ता ब्रह्मा

भारतीयेतिहासे सर्वविद्यानामादि प्रवक्ता "ब्रह्मा सीत्" इत्युक्तः । इदमेव तु निश्चितं सत्यम् । तदनुसारं व्याकरणशास्त्रस्यापि प्रथमो प्रवक्ता "ब्रह्मैवास्तीति । उक्तञ्च ऋक्तन्त्रे- ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पति रिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः ऋषयो ब्राह्मणेभ्यः"[1] इति तन्त्रवचनानुसारं व्याकरणस्यैकदेश वर्णसमाम्नायस्यादि प्रवक्ता "ब्रह्मा" । ह्यूनसाङ्गेनापि स्वभारत भ्रमण विवरणे "ब्रह्मदेव"कृत व्याकरणं निर्दिष्टम् इति।

ब्रह्मणः शास्त्र प्रवचनम्

भारतीय सर्वविद्यानामादिःप्रवक्तुः "ब्रह्मणः"प्रवचनं "शास्त्रं" शासनं" वा नामधेयम् । "ब्रह्मणः" प्रवचनानुसारमुत्तरोत्तरवर्ति प्रवचन संक्षिप्तरूपेण "अनुतन्त्रमनुशासनम्" वा रूपेणोक्तम् ।महापण्डितेन श्री भगवद्दत्तेन स्वग्रन्थे ब्रह्मणा प्रोक्तं द्वाविंशति ग्रन्थानि सप्रमाणानि उक्तानि - तेषां नामानि क्रमेण -"1-वेदज्ञानम्, 2•ब्रह्मज्ञानम् 3• योगविद्या 4• आयुर्वेदः, 5• हस्त्यायुर्वेदः, 6•रसतन्त्रम् । 7• धनुर्वेदः, 8• पदार्थविज्ञानम् 19•धर्मशास्त्रम्, 10• अर्थशास्त्रम्

1• ऋक्तन्त्रे 1/4

2• हुएनचांग का भारतभ्रमण वृतान्त नामके ग्रन्थे, पृ०109, इण्डियनप्रेस प्रयागेन मुद्रितं सन् 1926

11· कामशास्त्रम्, 12· व्याकरणम् ·13· लिपिज्ञानम् 14·ज्योतिषशास्त्रम्, 15· गणितशास्त्रम् , 16· वास्तुशास्त्रम्, 17· शिल्पशास्त्रम् 18· अश्वशास्त्रम्, 19· नाट्यवेद:, 20· इतिहासपुराणञ्च 21· मीमांसाशास्त्रम्, 22· शिवस्तवं, स्तवशास्त्रं वा ।।[1] इति

व्याकरणशास्त्रस्य द्वितीय:प्रवक्ता बृहस्पति:

"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय, भरद्वाज, ऋषिभ्य:, ऋषयो ब्राह्मणेभ्य:"[2] इति ऋक्तन्त्र वचनानुसारं व्याकरणशास्त्रस्य द्वितीयो प्रवक्ता बृहस्पति: । ब्राह्मण ग्रन्थेष्वपि बृहस्पति:देवानां पुराहित्व निर्दिष्ट:।अस्ति । तथा चोक्तम् -

बृहस्पतिर्वै देवानां पुरोहित:"[3]इति । अन्यच्च-मत्स्यपुराणे - "भार्या मर्पय वाच्यतेस्त्वम्"[4] इति ।

देवगुरु बृहस्पति रपि बहूनां शास्त्राणां पवाचनं कृतवान्। तेषां मध्ये सामगानं, अर्थशास्त्रं, बृहस्पतिकृतार्थशास्त्रस्योल्लेखं महाभारते उक्तम् - "अध्ययानां सहस्रैस्तु त्रिभिरेव बृहस्पति:"[5]इति वायुपुराणानुसारमितिहासपुराणानाञ्च प्रवक्ता देवगुरुबृहस्पति:-"बृहस्पतिस्तु

1· भारतवर्ष का बृहद् इतिहास नामके ग्रन्थे द्वितीयभागे अध्याये -4

2· ऋक् तन्त्रे 1/4

3· ऐतरेय ब्राह्मण 8/26

4· मत्स्यपुराणे अध्याये 23 श्लोक: 47

5· महाभारते शान्तिपर्वे अध्याये 59 श्लोक: 84

त्रिभिरेव बृहस्पतिः"[1] इति वायुपुराणानुसारमितिहासपुराणानाञ्च प्रवक्ता देवगुरुबृहस्पतिः "बृहस्पतिस्तु प्रोवाच सविके तदनन्तरम्" इति । पुनरपि महाभारते हि वेदाङ्गानां प्रवाचकःबृहस्पतिः "वेदाङ्गानि बृहस्पतिः"[2] इति । वेदाङ्गानामध्ये व्याकरणशास्त्रस्योल्लेखः अनेकेषु ग्रन्थेषु लभते । महाभाष्यानुसारम् -" बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच"[3] इति। अन्यत्रापि ब्रह्मवैवर्ते -

"पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिः ।
दिव्यं वर्षसहस्रं च स त्वा दध्यौ च पुष्करे ।।
तदा त्वत्तो वरं प्राप्य दिव्यं वर्षसहस्रकम् ।
उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरम् ।।"[4] इति

महापण्डितेन जयन्तेन न्यायमञ्जर्यां बृहस्पतेःवचनमुद्धृतं यदुशनामते व्याकरणं मरणान्तो व्याधिः"तथा च बृहस्पतिः-"प्रतिपदमशक्यत्वा-ल्लक्षणस्याप्यव्यवस्थितत्वात् तत्रापि स्खलिद्दर्शनाद अनवस्था प्रसङ्गाच्च मरणान्तो व्याधिर्व्याकरणमिति औशनसा"इति ।[5] उक्तैः प्रमाणैरेव सिद्ध्यति यत् शब्दशास्त्रस्य द्वितीयो प्रवक्ता बृहस्पतिरिति ।

1· वायुपुराणे अध्याये 1·3 श्लोकार्धे 59

2· महाभारते शान्तिपर्वे अध्याये 210 श्लोकार्ध- 20

3· महाभाष्ये पस्पशाह्निके 1/1/1 वा०पृ०

4· ब्रह्मवैवर्तपुराणे प्रकृति खण्डे अ०5 श्लोकौ 27-28

5· न्यायमञ्जर्याम् पृ० 418

व्याकरणशास्त्रस्यादि:प्रणेता इन्द्र:

"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच"[1] इति महाभाष्येण बृहस्पतिरिन्द्राय प्रतिपद-पाठेन शब्दानुपदिदेश । तस्मिन्काले शब्दानां प्रकृति प्रत्ययविभागो नासीत् । प्रथमत: "इन्द्र: एव शाब्दोपदेशस्य प्रतिपत्त्याबाधा: दुरूहताया:प्रकृति प्रत्ययविभाग द्वारा शब्दोपदेश प्रक्रियाया:दुष्करत्वं समाकलितवान् । उक्तञ्च "वाग्वै पराच्यव्याकृतावत् । ते देवा इन्द्र-मब्रुवन्,इमां नो वाचं व्याकुर्विति-----तामिन्द्रो मध्यतो वक्रम्य व्याकरोत्"[2] इति । अस्या:तैत्तिरीयश्रुते:षड्•क्ते स्वव्याख्या प्रसङ्•गे सायणाचार्येणापि- " तामखण्डां वाचं विच्छिद्यप्रकृति प्रत्यय विभागं सर्वत्रकरोत्"[3] इति उक्तेप्रमाणै सिद्ध्यति यत् व्याकरणशास्त्रस्य प्रथमो प्रणेता इन्द्र: ।

व्याकरणशास्त्रे द्वौ मार्गौ सम्प्रदायौ वा प्रचलितौ । ऐन्द्र: माहे-श्वरश्च । वर्तमानकालिकी प्रसिद्धयनुसारं"कातन्त्र" व्याकरणमैन्द्र सम्प्रदायस्य व्याकरणमस्ति । पाणिनीय व्याकरणन्तु शैवपरकैव । यथा-महाभारते - वेदात् षड्गान्युद्धृत्य"[4] इति । अनेन वचनेन स्पष्टं यत् देवगुरुणा समं शिवेनापि षड्•गानामपि प्रवचनं कृतम् । "विल्मग्रहणायेमं ग्रन्थं समाम्नासिषु वेदं च वेदाड्•गानि"[5] इति । वेदाड्•गानीति बहुवचनेन विस्पष्टं यत् वेदाड्•गानामादि प्रवक्तार: अनेके विद्वांस: आसन् ।

1• महाभाष्ये पश्पशाह्निके नवा० पृ०- 2• तैत्तिरीयसंहितायां-6/4/7

3• ऋग्वेदभाष्य शकायां पूना संस्करणे भाग-1,पृ०-26

4• महाभारते शान्तीपर्वे शिवसहस्रनामे अध्याये 284श्लोकार्धम् 192

5• निरुक्ते 1/20

अष्टौव्याकरण प्रवक्तारः

अर्वाचीनैः ग्रन्थकारैःप्रधानतया अष्टशाब्दिकानामुल्लेखो कृतः।[1] "व्याकरणे ऽष्टधाभिन्ने लक्षणैकदेशो विक्षिप्तः" इति । अन्यच्च-

"ब्राह्ममैशान रौद्रं च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलं चेति पाणिनीयामथाष्टमम्।।"[2]

इन्द्रश्चन्द्रःकाशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः।।"[3] इति

नवसंख्याकं व्याकरणम्

वाल्मीकीय रामायणे उत्तरकाण्डे - नवव्याकरणानामुल्लेखो वर्तते ।"सो यं नवव्याकरणार्थवेत्ता "इति।[4] भगवतःरामचन्द्रस्य राज्यकाले व्याकरणं शुद्धं परिष्कृतं सुसमृद्धमासीत् । उक्तञ्च -

"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहुव्याहरतानेन न किञ्चिदपभाषितम् ।।"[5] इति

"गीतासार "ग्रन्थे पि नवव्याकरणानामुल्लेखो स्पष्टमेव विलसतितराम् -

---

1• दुर्गनिरुक्त वृत्ति ग्रन्थे पृ० 78

2• हैमवृहत्यवचूर्णिकायां पृ० 3

3• कविकल्पद्रुमग्रन्थस्यारम्भे ।

4• वाल्मी०रा०उ०का०सर्ग 36 श्लोकार्धम् 47

5• " " किष्किन्धाकाण्डे सर्गे 3 श्लोकः 29

"गीतासारमिदं शास्त्रं गीतासारसमुद्भवम् ।
अत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसमुच्चयम् ।।
अष्टादश पुराणानि नवव्याकरणानि च ।
निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम् ।।[1] इति

श्रीतत्त्वविध नामक ग्रन्थेपि नवव्याकरणानामुल्लेख:-

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।। इति

प्रक्कालादेवाद्यावधि:यानि-यानि व्याकरणानि निर्मितानि तानि त्रिधा विभाजयामो वयम् ।

1. छान्दसमात्रम् (प्रातिशाख्यादीनि)
2. लौकिकमात्रम् (कातन्त्रादीनि)
3. लौकिकवैदिकोभयविधमापिशलि पाणिनयादीनि ।

व्याकरण प्रवक्तृणां द्वौ विभागौ संजातौ
1. पाणिने: प्राक् , 2. पाणिनेरर्वाचीनश्च।

---

1. भण्डारकर रिसर्च पूनाया: संग्रहालये गीतासार ग्रन्थे हस्तलेखे श्लोक सं० व्याकरणशास्त्र का इतिहास (यु०मी०) (प्रथमे भागे 70पृष्ठे 55/57 टिप्पण्याम् ।

पाणिनेर्प्राचीनाचार्या:

मुनि पाणिनिना पि स्वाष्टाध्याय्याम् -काश्यप:,गार्ग्य:, गालव:,चाक्रवर्मण:भारद्वाज:,शाकटायन:,शाकल्य:,सेनकानाञ्च शाब्दिकानामुल्लेखो कृत: । एतदतिरिक्ते पि माहेश्वर:,वृहस्पति:इन्द्र वायु भरद्वाज भागुरि,पौष्करसादि:चारायण काशकृत्स्न:,शन्तनु वैयाघ्रपद: माध्यन्दिनि:रौढि: शौनकि:,गौतम:,व्याडिनाञ्च षोडशाचार्याणामुल्लेखो न्यत्रापि प्राप्नोति ।[1]

प्रातिशाख्यादि ग्रन्थेषु वैदिकव्याकरणप्रवक्तार:

प्रातिशाख्य:यद्यपि तत्तच्चरणानां व्याकरणमस्ति ।तथापि तेषु मन्त्राणां संहितापाठे मुख्यतया उल्लेखो वर्तते । आचार्य यास्कमतानुसारन्तु संहिताया: मूलपदपाठ्याधारभूतं मत्वा सर्वेषां चरणानां प्रातिशाख्यानां प्रकृतित्तरभूत् ।यथा- "पदप्रकृतीनि सर्वचरणानां पार्षदानि"[2] इति । प्रकृति -प्रत्ययविभाग द्वारा पदसाधुत्वानुशासनस्य तेषु आवश्यकता नास्ति । अत एव तेषां गणना प्रधानतया शब्दानुशासनग्रन्थेषु नहि क्रियते । सम्प्रति तु कतिपय प्रातिशाख्य ग्रन्था:उपलब्धा: तेषां किञ्चिन्नामुल्लेखयामि-

---

1. संस्कृत व्याकरण शा० का इतिहास ग्रन्थे पृ०सं०71,72

2. निरुक्ते 1/17

1. ऋक्प्रातिशाख्यम् (शौनककृतम्)

2. वाजसनेयप्रातिशाख्यम् (कात्यायनकृतम्)

3. सामप्रातिशाख्यम् (वररुचिकृतम्)

4. अथर्वप्रातिशाख्यम् --------

5. तैत्तिरीय प्रातिशाख्यम्-----

6. मैत्रायणी प्रातिशाख्यम्"[1] इति

एषु ग्रन्थेषु ऋक्प्रातिशाख्यम् पाणिनेःप्राचीनतरमस्तीति मे सत्यं प्रतिभाति । अन्येषां प्रातिशाख्यानां विषये चापि स्पष्टं नास्ति । यत् पाणिनेः प्रागर्वाक् वा ।

प्रातिशाख्यातिरिक्तं तत्सदृशानि अन्यानि निम्ननिर्दिष्टानि वैदिकव्याकरणानि उपलब्धानि -

1. ऋक्तन्त्रम् -

ऋक्तन्त्रस्य सम्बन्धःसामवेदीय राणायनीयःशाखयास्ति । उक्तञ्च "राणायनीयानामृक्तन्त्रे प्रसिद्धा विसर्जनीयस्य अभिनिष्ठाख्या इति ।"[2]

2. लघुऋक्तन्त्रम् -

3. अथर्वचतुरध्यायी- शौनक अथवा कौत्सप्रणीतः"इत्यथर्ववेदे कौत्सव्याकरणे चतुरध्यायिकायां-------इयमुक्तः"वालशास्त्री मदरे"

---

1. सं० व्या० शास्त्र का इतिहास (यु०मी०) कृत पृ० 72

2. गोभिल गृह्यसूत्रे भट्टनारायण भाष्ये 2/8/14

नामके विदुषा संगृहीते चतुरध्यायी नामकस्य ग्रन्थस्य प्रत्येकमध्यायान्ते प्राप्नोति ।[1]

4· प्रतिज्ञासूत्रम् - कात्यायनकृतम् ।

5· भाषिक सूत्रम् - "

6· सामतन्त्रम् - औदव्रजि गार्ग्य प्रणीतम् । यथोक्तम् -

"सामतन्त्रं प्रवक्ष्यामि सुखार्थं सामवेदिनाम् ।
औदव्रजिकृतं सूक्ष्मं सामगानां सुखावहम् ।।[2] इति

अन्यच्च -

"सामतन्त्रन्तु गार्ग्येणेत्येवं समुपदिष्टा:प्रामाणिकैरिति सत्यव्रत:।।[3] इति ।

7· अक्षरतन्त्रम् (आपिशलि कृतम्) इति ।

पाणिनेरर्वाचीनाचार्याणां सङ्केत:

पाणिनेरर्वाचीना:अनेका:आचार्या: व्याकरणसूत्राणरचयन् । तेषां नामानि -

1· कातन्त्र:	(2000वि०पू०)
2· चन्द्रगोमी:- चान्द्रम्	(1000वि०पू०)
3· क्षपणक: (क्षपणकम्)	(वि० प्रथम शताब्दी)

1· सं०व्या०शास्त्र का इतिहास (यु०मी०) मूल पृ०73 टिप्पण्यां7

2· हरदत्तविरचितायां सामवेदसर्वानुक्रमण्यां पृ० 4

3· अक्षरतन्त्र भूमिकायां पृ० 2

4· देवनन्दी: जैनेन्द्रम् ॥ सं० 5000 से पूर्व

5· वामन: -विश्रान्तविद्याधर: ॥सं०4000 से 600पू० ॥

6· पाल्यकीर्ति:जैनशाकटायनम् ॥सं० 871 से 924 ॥

7· शिवस्वामी ॥ सं०914 से 940 ॥

8· भोजदेव: सरस्वतीकण्ठाभरणम् ॥सं०1075 से 1110 ॥

9· बुद्धिसागर: - बुद्धिसागरम् ॥ सं० 1080 ॥

10· भद्रेश्वरसूरि: - दीपकम् ॥ सं० 1200 से पूर्व ॥

11· वर्धमान: ॥सं० 1150 से 1225 ॥

12· हेमचन्द्र: - हैमव्याकरणम् ॥सं० 1145 से 1229 ॥

13· मलयगिरि - शब्दानुशासनम् ॥सं०1188 से 1250 ॥

14· क्रमदीश्वर: जौभरम् ॥वि० 1300 त: प्राक् ॥

15· अनुभूतिस्वरूप: सारस्वतम् ॥ सं० 1350 ॥

16· वोपदेव: मुग्धबोधम् ॥ सं० 1350 ॥[1]

17 पद्मनाभ: - सुपद्मम ॥वि०14 वी० शताब्दयाम् ॥

एषामतिरिक्तमन्यै: कतिपयैअर्वाचीनै:व्याकरणकर्तार: प्रभवन्ति तेषां ग्रन्थं व्याकरणं वा नाम मात्रमेवाहोस्विदप्रसिद्ध एव तेषां नामोल्लेखन्च सम्प्रति नाप्नोति ।

पाणिनीयाष्टके नुल्लिखिता :प्राचीनाचार्या:

महर्षि पाणिनि कृताष्टाध्याय्यां मनुल्लिखिता :कतिपये प्राचीनाचार्या:आसन् । तेषां व्याकरणप्रवक्तृत्वं निर्विवाद एव सिद्धयति। यथा-

---

1· सं० व्याकरणशास्त्र का इतिहास ॥यु०मी० 2 अध्याये पृ० 78

1· शिवमहेश्वर: [ई० 1500 वि०पा०] [1]

महेश्वर प्रोक्त व्याकरणस्योल्लेखो नैकेषु ग्रन्थेषु विद्यते । यथा पाणिनीय शिक्षायाम् -

"येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नम: ।। [2] इति

श्लोकमेतमाधारं मत्वा चतुर्दश प्रत्याहारसूत्रम् माहेश्वर-सूत्रम्, शिवसूत्रं वेति नामाभिधानं व्यवह्रियते । अन्यच्च -

"ब्राह्ममैशानमैन्द्रन्व प्राजापत्यं वृहस्पतिम् ।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम् ।। [3] इति

अस्यां कारिकायां "ईशान" पदेन शिवप्रोक्त व्याकरणस्योल्लेखआभाति ।

ऋग्वेदकल्पद्रुमग्रन्थकर्ता पण्डितकेशवेन यमलाष्टक तन्त्रस्योपशास्त्रनिर्देशतत्वेन कतिपये श्लोका: उद्धृता: । तथा चोक्तम् -

यस्मिन् व्याकरणान्यष्टौ निरूप्यन्ते महान्ति च ।
तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते ।
वायव्यं पन्चमं प्रोक्तं षष्ठं वारुणमुच्यते ।।
सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा ।। [4] इति

1· सं०व्याकरणशास्त्र का इतिहास [यु०मी०] [3] अध्याये पृष्ठे -79
2· पाणिनीय शिक्षायां श्लोक सं०-
3· हैमवृहत्सवचूर्णिकायां पृष्ठे- 3
4· परिभाषावृत्तौ राजशाही संस्करणे अनुबन्धे 3 पृष्ठे 126

अत्रापि रौद्रपदेन शिवप्रोक्त व्याकरणस्य निर्देशोभवति ।

अन्यच्च -

समुद्रवद् व्याकरणं महेश्वरे,

ततो म्बुकुम्भोद्धरणं वृहस्पतौ ।

तद्भागभागाच्च शतं पुरन्दरे,

कुशाग्रविन्दुग्रथितं हि पाणिनौ ।।[1] इति

अस्यां कारिकायामपि शिवप्रोक्त व्याकरणस्य व्यापकता स्पष्टतां याति । एभिर्प्रमाणै:सुविज्ञातं यद् शिवेनापि केनचित् व्याकरणस्य प्रवचनं कृतम् ।

<u>वृहस्पति:</u> - {10000 वि0पू0}[2]

देवगुरुणा वृहस्पतिना पि अनेकानि शास्त्राणि प्रथितानि येषु यानि-यानि शास्त्राण्युल्लेखो प्राचीन वाङ्मयोक्तानि तानि सामगान । अर्थशास्त्र इतिहास-पुराण वेदाङ्गानान्च वृहस्पतिस्तु इन्द्रायचं शास्त्रं प्रवाचयामास तस्य नाम "शब्दपारायण"मासीत् । महाभाष्य व्याख्याता भर्तृहरिणा पि तथा कैयटेनापि सम्मतम्, "शब्द-पारायणमिति रूढ़िशब्दो यं कस्यचित् ग्रन्थस्य वाचक:"[3] इति शब्द-पारायण शब्दो योगरूढ़: शास्त्र विशेषस्य"[4] इति ।

---

1. यामलाष्टकतन्त्रे श्लोक 10/11, 12
2. सं0व्याकरणशास्त्र का इतिहास प्रथमभागे {यु0मी0} पृष्ठे-84
3. भर्तृहरिविरचित महाभाष्यदीपिकायां पूना संस्करणे पृष्ठे 17
4. कैयट विरचित भाष्यप्रदीपे नवा0 पृ0 5।

इन्द्रः (9500 वि०पू०)[1]

"बृहस्पतिरिन्द्राय दिव्यं वर्ष सहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच "[2] इति महाभाष्य वचनानुसारं बृहस्पतिरिन्द्राय शब्दपारायणं प्रोवाच" तामखण्डां वाचं मध्ये विच्छिद्यप्रकृति प्रत्ययविभागं समकरोत्"[3] इति वचनानुसार (भिण्डेण सर्वप्रथम् :प्रकृति प्रत्ययानां विभागं कृत्वा शब्दोपदेशस्य प्रक्रिया संचालिता ।

इन्द्र प्रणीतं ऐन्द्र व्याकरणं सम्प्रति नोपलब्धम् । परन्तु अस्योल्लेखो धुना पि प्राप्नोति । लङ्कावतारसूत्रे ऐन्द्र शब्दशास्त्रस्योल्लेखेन "इन्द्रो पि महामते अनेकशास्त्रविदग्ध बुद्धिःस्वशास्त्रप्रणेता--- ।[4] इति । अन्यच्च -

"ऐन्द्रिशानादिषु व्याकरणेषु वाजस्लादिरपस्यासिद्धे"[5] इति महापण्डितेन देववोधेना पि महाभारतटीकाया रम्भे- "माहेन्द्र"नामाभिधानेन ऐन्द्र व्याकरणस्योल्लेख प्राप्नोति । यथा -

"यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् ।
पदरत्नानि किं तानि सन्ति पाणिनिगोस्पदे ।।[6] इति

संस्कृत व्याकरण शा० का इतिहास ग्रन्थे प्र०भागे पृ० 87
1. महाभाष्ये पस्पशान्हिके नवाहि० पृ० -
2. ऋग्वेदभाष्ये उपोद्घाते पूना संस्करणे भाग-1 पृ० 26
3. टेक्निकल टर्म्स आफ संस्कृत ग्रामर पृष्ठे 280
5. यशस्तिलकचम्पो पृ० 10
6. महाभारते ज्ञानदीपिकाटीकायामारम्भे -

एभि: वचनै: ऐन्द्र तन्त्रस्य विस्तारतायाः कल्पना स्वाभाविकी । तिब्बतीय ग्रन्थानुसारं ऐन्द्र व्याकरणं पञ्चविंशतिसहस्त्रात्मक परिगितानि श्लोक संख्या बवासीत् ।

वायु: [8500 वि०पू०][1]

तैत्तिरीय संहितायामुल्लेखो विद्यते यत् इन्द्र: वाचं व्याकृते वायोर्साहाय्यमवाप्तवान् । "वाग्वैपराच्यव्याकृतावदत् ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सो ब्रवीद्वरं वृणै मह्यं चैव वायवे च सह गृह्णता"[2] इति । अतएव स्पष्टं भवति यदिन्द्रस्य व्याकरणरचनायां साहाय्यं पदाता वायुरपि निस्सन्देहमेव ऐतिह्यव्यक्तिरासीत् । इन्द्र: वायने: साहाय्येन देववाङ् व्याकरणस्य रचनां कृतवान् ।अनेन कारणेन कतिपयस्थानेषु वाचि" वाग् वा ऐन्द्रवायव:"[3] इति प्रयोगो प्युपलभ्यते वायुपुराणे तु वायुं "शब्दशास्त्रविशारद कथितम् ।यमलाष्टक तन्त्रे पि "वायव्य"व्याकरणस्योल्लेख: वर्तते ।

"लाघवं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते ।
तृतीयं याम्यमाख्यातं चतुर्थं रौद्रमुच्यते ।।
वायव्यं पञ्चमं प्रोक्तं षष्ठं वारुणमुच्यते ।
सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा ।।[4]

1· सं०व्या०शा० का इतिहासे प्रथमभागे पृ० 97 तमे
2· तैत्तिरीय संहितायाम् अध्याये 6 पादे 4 मन्त्र 6
3· मैत्रेयी संहितायाम् " 5 " 4 " 8
4· यमलाष्टकतन्त्रे श्लोकौ 11, 12

वायो: पुत्र: महाबली परमब्रह्मष्ठ:हनुमान्नासीत् । तस्य माता "अञ्जनीति । हनुमान्नपि स्वीपित्रा समंशब्दशास्त्रस्य महान् ज्ञाता सीत् । उक्तञ्च "नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहुव्याहरतानेन न किञ्चिदपभाषितम् ।। इति[1]

एभिरुक्तैप्रमाणैर्सिद्ध्यति यत् वायुरपि व्याकरणशास्त्रस्य महान् प्रवक्ता सीत् ।

भरद्वाज: (3300 वि०पू०)[2]

व्याकरणशास्त्रस्य तृतीया:प्रवक्ता चार्यो भरद्वाज: । यद्यपि भरद्वाज तन्त्रं व्याकरणं वृति सम्प्रति नोपलब्धं, तथापि ऋक्तन्त्रवचनानुसारमाचार्यो भरद्वाज:व्याकरणशास्त्रस्य तृतीय:प्रवक्ता-

"ब्रह्मा वृहस्पतये प्रोवाच वृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य: ऋषयो ब्राह्मणेभ्य"[3] इति ऐतरेय आरण्यक ग्रन्थानुसारमपि इन्द्रो भरद्वाजाय घोषवदुष्म वर्णानाम्वोपदेशोपदेशित: । उक्तम् -

तस्य यानि व्यञ्जनानि तच्छरीरम्, योघोष:स आत्मा च उष्माण:स प्राण:--एतदुहैवेन्द्रो भरद्वाजाय प्रोवाच।।[4] इति

वाल० रामा०किष्किन्धाकाण्डे 3 सर्ग श्लोक: 29

2· सं०व्या०शा० का इति० (यु०मी०कृत: (प्रथमभागे पृ 98

3· ऋक्तन्त्रे 1/4

4· ऐतरेय आरण्यके 2/2/4

सम्प्रति भरद्वाजव्याकरणमनुपलब्धम् । तस्य किञ्चिन्मात्रमपि वचनं प्रमाणं वा प्राचीनार्वाचीनेषु ग्रन्थेषु नावाप्यते, परन्तु परमवैयाकरणेन कात्यायनेन यजुः प्रातिशाख्ये आख्यात क्रियां भरद्वाज दृष्टः इत्युक्तम् यथा -

भरद्वाजकमाख्यातम्" इत्यनेन स्पष्टं यत् महर्षि :[1]
भरद्वाजः स्वव्याकरणे आख्यातं विशेषरूपेणाख्यातमिति ।।

भागुरिः [4000 वि०पू०][2]

यद्यप्याचार्यो भागुरेरुल्लेखो ष्टाध्याय्यां नास्ति, तथापि भागुरि विषये प्रक्रियाकौमुद्याम् -

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपन्चैव हलन्तानां यथा वाचा निशादिशा"।।[3] इति भागुरेः व्याकरणसम्बन्धि यानि-यानि मतानि प्राप्तानि तान्येव प्रतिभाति मे यत् भागुरेर्व्याकरणं सुष्ठुप्रकारेण विशुद्धं सुपरिष्कृतन्चासीत् । श्रीजगदीश तर्कालङ्कारेणापि स्वग्रन्थे भागुरे मतं प्रदर्शितम् -

"मुण्डादेस्तत् करोत्यर्थे गृह्णात्यर्थे कृतादितः ।
वक्तीत्यर्थे च सत्योदरङ्गादेस्तन्निरस्यति।।इति भागुरिस्मृतेः ।[4] अन्यच्च

---

1. यजुः प्रातिशाख्ये अ० 8 पृ० 327 मद्रास संस्करणे ।
2. सं०व्या०शा० का इति०ग्रन्थे प्रथमभागे पृ० 104
3. प्रक्रियाकौमुद्याम् भागे । पृष्ठे 182
4. शब्दशक्तिप्रकाशिकायाम् पृ० 444 काशी संस्करणे ।

तूस्तात् विधाते संछादेवस्मात् पुच्छादिपस्तथा ।
उत्क्षेपादौ, कर्णाणो णिस्तदव्ययपूर्वत: ।।इति भागुरिस्मृते:[1]

तथा च -

वीणात् उपगाने स्यात् हस्ततो तिक्षौ तथा ।
सेनालस्याभियानेणि:श्लोकादेरप्युपस्तुतौ ।।"इतिभागुरिस्मृते: ।।[2]

अन्यदपि -

गुपूधूपविच्छिपणिपनेराप:कमेस्तु णिङ्· ।
ऋतेरियङ्· चतुर्थेषु नित्यं स्वार्थे परत्र वा ।। इति भागुरिस्मृते: ।।[3]

आचार्य भागुरेर्व्याकरणविषयकमतनिदर्शक द्वौ मते प्रसिद्धे।

यथा -

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो: ।
आपन्चैव हलन्तानां यथा वाचा निशादिशा।।इति[4]

सिध्यतिसिव्योर्ल्युट् परयोदीर्घत्वं वष्टि भागुरि: ।
करोति कर्तृभावे च सौनागा:प्रचक्षते ।।इति[5]

1· शब्दशक्तिप्रकाशिकायाम् पृ0 445 काशी संस्करणे ।
2· " " 446 "
3· " " 447 "
4· प्रक्रियाकौमुद्याम् भागे । पृष्ठे 182 काशी संस्करणे
5· द्वादशारनयचक्रे सिंहसूरिगणि कृतटीकायां तडीदासंस्करणे भागे ।पृ04।

पौष्करसादि: [3100 वि०पू०][1]

पौष्करसादि:आचार्यस्य नाम तु पाणिनीयाष्टाध्याय्यां नावाप्यते, परन्तु वार्तिकपाठे तस्योल्लेखो वर्तते महाभाष्ये यथा- "चयो: द्वितीयाशरि पौष्करसादेरिति वाच्यम्" इति ।[2] श्री यशेश्वर भट्टेन स्वग्रन्थे पौष्करसादि शब्दस्य निर्वचनं कृतम् - उक्तन्च -

"पुष्करे तीर्थ विशेषे सीदतीति पुष्करसत् तस्यापत्यं पौष्करसादि"[3] इति ।

चारायण: [3100 वि०पू०][4]

आचार्य चारायणेन कस्य व्याकरणस्य प्रवचनं कृतम् तस्य स्पष्टोल्लेखो न ज्ञायते । किन्तु लौगाक्षिगृह्यसूत्रस्य व्याख्याता पण्डित देवपालेन स्वटीकायां चारायणस्यापरनाम "चारायणि:"इति तस्य सूत्रव्याख्यानन्च कृतम् । तथा च -

"तथा च चारायणिसूत्रम्- "पुरुकृतेच्छदयो:"इति । पुरुशब्द: कृतशब्दश्च लुप्यते यथासंख्यं छे छे पुरल: पुरुच्छदनं पुच्छम् कृतस्य छदनं विनाशनं कृच्छम्"इति ।।[5]

---

1. सं०सा० शा० का इति० ग्रन्थे प्र०भा० पृ० 110
2. महाभाष्ये अ०8 पादे 4 सं०48
3. गणरत्नावल्यां 4/1/96 युगमी० इस्तलेख पृ० 179
4. सं०व्या०शा० का इति० ग्रन्थे प्र०भागे पृ० 113
5. " " " 113

महाभाष्ये पि -

"कम्बलचारायणीया:ओदनपाणिनीया:घृतरौढ़ीया:"[1] इति कैयटेनापि महाभाष्य व्याख्यां लिखितम् -"कम्बलप्रियस्य चारायणस्य"[2] इति । उक्तैरुदाहरणैर्ज्ञायते यदाचार्यचारायणो पि वैयाकरणा सीत् ।।

काशकृत्स्न: [3100 वि०पू०][3]

यद्यपि पाणिनीय शब्दशास्त्रे चार्य काशकृत्स्नस्य नामोल्लेख: नोपलब्ध: तथापि वैयाकरण निकाये चार्यकाशकृत्स्नस्य व्याकरणप्रवक्तृत्वेन प्रसिद्धिरस्ति । आचार्य पतञ्जलिस्तु महाभाष्ये उक्तवान् -

"पाणिनिना प्रोक्तं पाणिनीयम्,आपिशलम्,काशकृत्स्नमिति"[4] क्षीरस्वामिना पि स्वग्रन्थे काशकृत्स्नीय मतं निर्दिष्टम् -

"काशकृत्स्ना अस्य निष्ठायामनिट्त्वमाहु:-आश्वस्त विश्वस्त:"[5] इति । ज्ञायते नेन यत् काशकृत्स्नो पि महान् वैयाकरणा सीत् ।

शन्तनु: [3100 वि०पू०][6]

आचार्य शन्तनुरपि कस्यचिद् व्याकरणस्य प्रवचनं कृतम् । अधुना उपलभ्यमानं फिट् सूत्रं तस्यैव कृतिरस्ति । उक्तन्च -

---

1. महाभाष्ये अ० १० । सू० 73
2. " प्रदीपे 1/1/73
3. सं०व्या०शा० का इति० ग्रन्थे प्र०भागे पृ० 115
4. महाभाष्ये पस्पशान्हिकान्ते -
5. क्षीरतरंगिण्याम् - 165

"स पुनः सन्तनुप्रणीतः फिष इत्यादिकम्"[1] इति

अन्यच्च -

"अथ यत् फिट् सूत्राभिख्युदितं शन्तनुमहर्षिणा शास्त्रम्"[2] इति

उपलब्ध मानैरुद्धरणै ज्ञायते यत् आचार्य शन्तनुरपि फिट् सूत्राणां प्रवक्तासीदिति ।।

वैयाघ्रपद्यः (3100 वि०पू०)[3]

आचार्य वैयाघ्रपद्यस्य नाम पाणिनीय शब्दशास्त्रे नहि दृश्यते,परन्तु काशिकायां "गुणं त्वमन्ते नपुंसके व्याघ्रपदां वरिष्ठः"[4] इति । अन्यच्च काशिकायामेव "दशकाः वैयाघ्रपदीयाः"[5] इति । पुनरपि काशिकायाम् "- दशकं वैयाघ्रपदीयम्"[6] इति।। अपरन्च पदमञ्जर्याम्- "वैयाघ्रपादपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्यआचार्यः"[7] इति । सम्प्रति प्राप्त ग्रन्थोपलब्धप्रमाणैः सिद्ध्यति यत् वैयाघ्रपद्यनामको कश्चिदाचार्यो वैयाघ्रपद्यव्याकरणं व्यरचयत् कस्मिन्नेव व्याकरणे दशाध्याया आसन् ।।

1· पदमञ्जर्याम् 7/3/4 पृ० 824

2· स्वरसिद्धान्तचन्द्रिकायां पृ० 259

3· सं० व्या० शा० का इति० ग्रन्थे प्र० भागे पृ० 134

4 काशिकायाम् 7/1/94

5· " 4/2/65

6· " 5/1/52

7· पदमञ्जर्याम् 7/1/94

माध्यन्दिनि: (3000 वि०पू०)[1]

पाणिनितन्त्रे माध्यन्दिनि नामाभिधानं क्वापि नोपलभ्यते,परन्तु काशिकायां स्पष्टमेव प्रतिभाति यत् माध्यन्दिनि: व्याकरणशास्त्रस्य प्रवक्ता सीत् । तथोक्तम् "सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् । माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठ: ।।[2] इति प्रक्रियाकौमुद्यामेव तस्य नामोल्लेखो विद्यते । तथोक्तम् -

"इक: पठे पि सम्बुद्धौ गुणो माध्यन्दिनेर्मतम्" ।।[3] इति

प्राप्तद्वयोरुद्धरणयो स्पष्टमेव प्रतिभाति यत् प्राक्काले आचार्य "माध्यन्दिनिना" पि कश्चिद् व्याकरणस्यावश्यमेव प्रवचनं कृतम् ।।

रौढि: (3000 वि० पू०)[4]

रौढिराचार्यस्य निर्देशं: पाणिनीयव्याकरणे नोपलभ्यते, किन्तु वामनकृतकाशिकायां तस्य निर्देशं प्राप्नोति ।

"आपिशलि पाणिनीयरौढीया:, रौढीयकाशकृत्स्ना"[5] इति आचार्य वामनमतानुसारं रौढि:वैयाकरणआसीदिति ।

---

1. व्या० शा० का इति० ग्रन्थे प्रथमभागे पृ० 136
2. काशिकायाम् 7/1/94
3. प्रक्रियाकौमुद्यां भूमिकायां पृ० 33
4. व्या०शा० का इति० ग्रन्थे प्र०भा० पृ० 139
5. काशिकायाम् 6/2/26

शौनकि: (3000 वि०पू०)[1]

चरक संहिताया: टीकाकार: "जज्जटेन" स्वग्रन्थे आचार्य शौनके मतं स्थापितम् "कारणशब्दस्तु व्युत्पादितम् - "करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकि:"[2] इति ।भट्टिकाव्ये जयमङ्गला टीकायामेव तस्य व्याकरणकर्तृत्वं स्पष्टं प्रतिभाति । तथोक्तम् -

"धाञ् कृञो स्तम्भियोश्च बहुलत्वेन शौनकि:"[2] इति।।

वस्तुतस्तु आचार्य शौनकि वैयाकरण आसीत् तेन कस्यचिद् व्याकरणस्य निर्वचनं कृतम् ।

गौतम: (3000 वि०पू०)[3]

महाभाष्ये "आपिशलिपाणिनीयव्याडीयगौतमीया:"[4] इति वाक्यमुद्धृतम् । महाभाष्य वचनानुसारं गौतमा चार्यो पि पाणिन्यापिशलिव्याडिभि:सम वैयाकरणासीत् ।अन्यदपि तैत्तिरीय प्रातिशाख्ये उक्तम् -

"प्रथमपूर्वो हकारश्चतुर्थ तस्य संस्थानं प्लाक्षिकौण्डिन्यगौतम पौष्करसादीनाम्" इति प्रयोगेणापि गौतमस्य व्याकरणत्वं स्पष्टमेव प्रतिभाति ।

1• व्याशा० का इति० ग्रन्थे प०भा० पृ० 14।

2· जज्जटकृतचिकित्सा स्थानस्यव्याख्यायाम् 2/27

3• भट्टिकाव्ये जयमङ्गलाटीकायाम् 3/47

4• सं० व्या० [illegible]

5• महाभाष्ये 6/2/36

व्याडि: [2900 वि०पू०][1]

आचार्य व्याडेरपर नाम "दाक्षायण:" तेन संग्रह नामकं ग्रन्थं व्यरचयत् । महाभाष्ये उक्तम् - "संग्रहो व्याडिकृतो लक्षसंख्योग्रन्थ:"[2] इति ।आचार्य पुरुषोत्तमदेवो पि आचार्य मालवेन समं व्याडेरपि मतमुद्धृतम् "इकां यण्भि-र्व्यवधानं व्याडिमालवयोरिति वक्तव्यमिति वचनेन व्याडे व्याकरण प्रवक्तृत्वं प्रस्फुटति । आचार्य व्याडिकृत संग्रह ग्रन्थ: पाणिनीय व्याकरणोपरि आसीदिति केचन वैयाकरणानां धारणा ।तथोक्तम् -

"संग्रहो प्यस्यैव शास्त्रस्यैकदेश:"[3] इति । आचार्य व्याडेरुल्लेख: महाभाष्ये पतञ्जलिना पि कृतम् । यथा-

"आपिशलिपाणिनीयव्याडीयगौतमीया:"[4] इति । महाराजासमुद्गुप्तेना पि व्याडे:प्रशंसायां स्वमतमुद्धृतम् । तथोक्तम् -

"रसाचार्य कविर्व्याडि:शब्दब्रह्मैकवाङ्•मुनि: ।
दाक्षिपुत्रवचो व्याख्या पटुर्मीमांसकाग्रणी: ।।
बलचरितं कृत्वा यो जिगाय भारतं व्यासं च ।
महाकाव्यविनिर्माणे तन्मार्गस्य प्रदीपमिव ।।[5] इति

1• सं०व्या०शा०का इति० ग्रन्थे प्र०भागे पृ० 143

2• महाभाष्ये प्रदीपोद्योते निर्णयसागर संस्करणे पृ० 55तमे

3• भाषावृत्ती- 6/1/77

4• पुण्यराजकृतव्याक्यपदीयटीकायां काशी सं०पृ० 383 तमे ।

5• महाभाष्ये 6/2/36

उक्तैः प्रमाणैरेव सिध्यति यत् व्याडिः संग्रहकर्ता, दाक्षीपुत्रस्य पाणिनेः अष्टाध्याय्याः व्याख्याता, रसाचार्यः श्रेष्ठमीमांसकश्चासीदिति ।[1]

पाणिनीयाष्टाध्याय्यामुक्ता आचार्याः (4000-3000 वि०पू०)

महर्षिपाणिनिना पि स्वशब्दानुशासने दशव्याकरणप्रवक्तृणामुल्लेखो कृतम् ।

आपिशलिः (3000 वि०पू०)[2]

आपिशलिराचार्यस्योल्लेखो ष्टाध्याय्यामेकैव सूत्रे प्राप्यते । तथोक्तम् - "वा सुप्यापिशलेः"[3] इति । तस्य नाममहाभाष्ये पि प्रमाणरूपेणोल्लेखः । "एवञ्च कृत्वा पिशलेराचार्यस्य विधिरुपपन्नो भवति -धेनुरनञिकमुत्पादयति ।"[4] उक्त महाभाष्यकालेन कात्यायनपतञ्जलेश्च काले पिशलिव्याकरणस्य प्रचारो सीत् । तस्मिन्नेव काले बालिका अपि आपिशलि व्याकरणस्याध्ययनमकार्षुः । तथोक्तम् -

"आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी"[5] इति वचोभिः निस्सन्देह एवोक्त व्याकरणं पाणिनीय व्याकरणसमं सर्वाङ्गपूर्णसुव्यवस्थितन्चासीत् ।

---

1. कृष्णचरितस्य प्रस्तावनायां 16-17 श्लोकौ
2. सं०व्या०शा०का इति० प्र०भागे पृ० 146
3. " " " 146
4. अष्टाध्याय्याम् 6/1/92
5. महाभाष्ये 4/2/45
6. महाभाष्ये 4/1/14

काश्यप: [3000 वि०पू०][1]

महर्षि: पाणिनि: स्वशब्दशास्त्रे काश्यपस्य नामसुद्धृतम् । "तृषि-मृषिकृषे:काश्यपस्य "[2] इति । अन्यदपि -

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् "[3] इति म वाजसनेय प्रातिशाख्ये पि शाकटायनेन काश्यपस्योल्लेखो कृतवान् "लोपं काश्यपशाकटायनौ "इत्यष्टाध्याय्यां तथा प्रातिशाख्ये प्युद्धृत:काश्यप:निस्सन्देह एकैव व्यक्ति आसीत् । काश्यपशब्द: गोत्रप्रत्ययान्त: । पाणिनीय शब्दानुशासने काश्यपस्योल्लेखनेन सत्यं प्रतिभाति यत् काश्यप:पाणिने: पूर्ववर्तिरस्ति ।

गार्ग्य: [3100 वि०पू०][4]

आचार्य पाणिनि: स्वशब्दशास्त्रे महर्षि गार्ग्यस्य नामोल्लेख:त्रिषु स्थानेषु करोति । तथोक्तमष्टाध्याय्याम् -

1. अङ्गार्ग्यगालवयो: "[5] इति । 2. "ओतो गार्ग्यस्य "[6] इति

3. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् "[7] इति ।

ऋक्प्रातिशाख्ये पि गार्ग्यमतं प्राप्नोति । तथोक्तम् -

व्याडिशाकल्यगार्ग्या: "[8] इति । गार्ग्याचार्यो पि महान् वैयाकरण आसीदिति ।

---

1. सं०व्या०शा०का इति०ग्रन्थे पृ० 158
2. अष्टाध्याय्याम् 1/2/25
3. " " 8/4/67
4. वाजसनेय प्रातिशाख्ये 4/5
5. सं०व्या०शा०का इति०ग्रन्थे प्र०भागे पृ० 161
6. अष्टाध्याय्याम् 7/3/99
7. " 8/3/20
8. " 8/4/67
9. ऋक्प्रातिशाख्ये 13/31

गालव: [3100 वि०पू०][1]

अष्टाध्याय्यां पाणिनि: गालवस्य चतुर्षुस्थानेषु नामोल्लेखो-ल्लेखित: । तथोक्तमष्टाध्याय्याम् -

1• इको ह्रस्वो ङ्यो गालवस्य"[2] इति

2• तृतीयादिषु भाषित पुस्कं पुंवद्गालवस्य"[3] इति

3• अड् गार्ग्य गालवयो:"[4] इति ।

4• नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"[5] इति ।

यत: परंपुरुषोत्तमदेवेनापि भाषावृत्तिग्रन्थे आचार्य गालवस्य मतमुद्धृतम् ।"इकां यणभिर्व्यवधानंव्याडिगालवयोरिति वक्तव्यम्"[6] इति । अनेन विस्पष्टं यत् गालवो पि वैयाकरणआसीत् । अष्टाध्याय्यां गालवस्यो-ल्लेखेत्व स्पष्टं भवति यत् गालव:पाणिनेप्राचीन: ।

चाक्रवर्मण: [3000 वि०पू०][7]

चाक्रवर्मणाचार्यस्य नामाष्टाध्याय्यां कतिपय स्थलेषूलभ्यन्ते। ईचाक्रवर्मण:"[8] इत्यादय: । सूत्रेणानेन "चाक्रवर्मणाचार्यस्य व्याकरणप्रवक्तृत्वं स्पष्टमेव प्रतिभाति । चाक्रवर्मण पदमपत्यप्रत्ययान्तं तदनुसारं तस्यपिता चाक्रवर्मा"इति सिद्धयति । वैयाकरणो यं पाणिनेप्राचीन:इति मे प्रतिभात्य-ष्टाध्याय्यामुल्लेखेन ।

1• सं०व्या०शा०का इति०ग्रन्थे पृ० 165
2•अष्टाध्याय्याम् 6/3/61
3• अष्टाध्याय्याम् 7/1/74
4• " 7/3/99
5• " 8/4/67
6• भाषावृत्तौ 6/1/77
7• सं०व्या०शा०का इति०ग्र०पृ० 168
8• अष्टाध्याय्याम् 6/1/130

भारद्वाजः [3000 वि॰पू॰][1]

पाणिनि व्याकरणतन्त्रे भारद्वाज मतं प्राप्नोति" ऋतोभारद्वाजस्य इति ।[2] परन्तु काशिकाकाराभिमतेन "भारद्वाज"पदं देशवाची न त्वाचार्यपदवाची । भारद्वाज शब्दो ऽपि देशवचन एव, न गोत्रशब्द" इति काशिकायाम् । भारद्वाजस्य व्याकरणविषयकं मतं तैत्तिरीयप्रातिशाख्ये ऽपि प्रस्फुटति -[3] अनुस्वारे णिवति भारद्वाजः इति । भारद्वाजस्य पिता भरद्वाज इति । सम्भवतः स एव भरद्वाजः य इन्द्रस्य शिष्यः दीर्घजीवी अनूचानम् भरद्वाजः आसीत् ।

शाकटायनः [3000 वि॰पू॰][4]

आचार्य शाकटायनस्य नामाष्टाध्याय्यां [illegible] -

1. लङः शाकटायनस्यैव इति ।[5]

2. त्रिप्रभृतिषु शाकटायनस्य" ।[6] इत्यादयः सूत्राणि [illegible] ऽपि तस्य निर्देशं प्राप्यते । आचार्य-यास्केनापि निरुक्ते शाकटायनस्योल्लेखः 'सर्व नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च' इति । महाभाष्ये शाकटायनस्य पितृनाम 'शकट' इति निर्दिष्टम् । यथोक्तम् 'व्याकरणे शकटस्य च तोकम्'[7] इति । अनेन निश्चप्रचं यत् पाणिनेर्प्राचीन शाकटायनो वैयाकरणआसीत् ।

---

1. संस्कृत व्याकरण इति॰ ग्रन्थे पृ॰ 172
2. अष्टाध्याय्याम् 6/2/6
3. " 7/1/74
4. " 7/3/99
5. " 3/4/67
6. अष्टाध्यायी 8/1/77
7. [illegible] पृ॰ 188

शाकल्य: (3100 वि०पू०)[1]

शाकल्याचार्यस्य मतं महर्षि:पाणिनि:स्वशब्दानुशासने चतुर्षुस्थानेषूदाहरति । तथोक्तम् -

1. सम्बुद्धौ शाकल्येस्येतावनार्षे[2]
2. इको सवर्णे शाकल्यस्य ह्रस्वश्च"[3]
3. लोप:शाकल्यस्य[4]
4. सर्वत्र शाकल्यस्य"[5] इत्यादयते । महाभाष्ये शाकल्प विषये उक्तम् -" सन्नित्यसमासयो:शाकलप्रतिषेधो वक्तव्य:"[6] इति । शाकल्यस्य" शाकल:"इत्यपरनामस्योल्लेख:अन्यत्रापि प्राप्यते । यथोक्तम् कात्यायन प्रातिशाख्ये-"पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकल:"[7] इत्यभिर्भिरेवसिद्धयति यद् शाकल्यो पि महान् वैयाकरण आसीत् ।

सेनक: (2950 वि०पू०)[8]

आचार्य सेनकस्योल्लेखो ष्टाध्याय्यामेकैव सूत्रे दृश्यते "गिरेश्च सेनकस्य"[9] इति पाणिनितन्त्रातिरिक्तमन्यत्रक्वाप्यस्याचार्यस्य उल्लेखो नास्ति ।

---

1. सं०व्या०शा०का इति० पृ० 183
2. अष्टाध्यायाम् 1/1/16
3. " 6/1/27
4. " 8/3/19
5. 8/4/51
6. " 6/1/127
7. कात्यायन प्रातिशाख्यो 4/177

8. सं०व्या०शा०का इति० ग्रन्थ० पृ०188

स्फोटायन: [2950 वि०पू०][1]

स्फोटायनाचार्यस्य नाम पाणिन्यष्टाध्याय्यामेकैव स्थले विलसति - "अवङ्‌ स्फोटायनस्य"[2] इति सूत्रातिरिक्तं स्फोटायनस्योल्लेखो पाणिनीय-तन्त्रे नोपलभ्यते अनेन क्रमेण पाणिनीयाष्टाध्याय्यामुद्धृताचार्याणां तेषां व्याकरणानाञ्च परिचयं संक्षेपेण निवेदयितुमिच्छामि । तदन्तरं मुनित्रयस्य किञ्चिद् परिचयं दत्त्वा पाणिनेरर्वाचीनाचार्याणां विषये संक्षेपेण एतद् विषये मया किञ्चिद् विविच्यते ।

पाणिनि: [2900 वि०पू०][3]

सुरभारत्या:खलु व्याकरणानि निर्मितानि तेषु साङ्गोपाङ्गं त्रिमुनि विलसितं महाभाषा वैज्ञानिकञ्च पाणिनीयमेव व्याकरणं साम्प्रतं याथातथ्येनोपलभ्यते । व्याकरणेनानेन देवभाषाया:प्राचीनार्वाचीनसमस्तं वाङ्मयं परिच्छिन्नं सत् नितरां राजते । विश्वेऽस्मिन् प्राचीनार्वाचीनाश्च कामपि भाषाया: सुव्यवस्थितं सुपरिष्कृतमिदृशं व्याकरणमद्यापि नावलोक्यते ।

महाभाष्ये पाणिनिं दाक्षीपुत्रमभिहितम् । सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिने:"[4] इति तस्य माता दाक्षीति । महर्षि पाणिनेर्कतिपय-नामानि प्रसिद्धानि तेषु - 1.पाणिन:,पाणिनि:,दाक्षीपुत्र:,शालङ्क:,शालातुरीय:

1.अष्टाध्याय्याम् 5/4/112

2. सं०व्या०शा०का इति० ग्रन्थे पृ० 189

3. अष्टाध्यायाम् 6/1/123

4. सं०व्या०शा०का०इति०ग्रन्थे प्र०भागे पृ० 193

5. महाभाष्ये 1/1/20

अहिकश्चेति । पण्डित हरदत्तेन पाणिनेर्विषये पाणिनिशब्दस्य एवं प्रकारेण व्युत्पत्तिःप्रदर्शिता - "पणो स्यास्तीति पणी पणिनो पत्यमित्यण्, पाणिनः पाणिनस्यापत्यं पणिनो युवेति इञ् पाणिनिः" इति[1]

महर्षि पाणिनिः स्वशब्दशास्त्रे द्वयोरेव स्थलयोःबहुवचनान्तरूपेणाचार्यपदं व्यवहरति । हरदत्त पण्डितेन पदमञ्जर्यां पाणिनि प्रोक्त बहुवचनान्तपदं स्वगुरुत्वेशोल्लिखितम् । यथा- "आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः, गुरुत्वाद् बहुवचनम्"[2] इति ।कथासरित्सागरानुसारं पाणिनेर्गुरोर्नाम "वर्ष" इति । यथोक्तम् -

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जड्बुद्धितरो भवेत् ।।[3] इति

वर्षाचार्यस्यानुजः "उपवर्ष"इत्यासीत् । धर्मशास्त्रं ग्रन्थे पि "उपवर्षाचार्यस्य"नामोल्लेखेदृश्यते ।

"शुङ्गाङ्गिरो गर्गमये ह्यपयः पठिता अपि ।
आचार्यस्तूपवर्षाद्यैर्भरद्वाजाः स्युरेव ते ।।
द्विविधानपि गर्गास्तानुपवर्षो महामुनिः ।
अनुक्रम्य त्ववैवाङ्ग्यान् भरद्वाजतया जगौ "।।[4] इति

वस्तुतस्तु पाणिनेगुरुः"वर्षः" इति तस्यैव नाम उपवर्ष इति ।

---

1. पदमञ्जर्याम् 1/1/73 पृ० 144
2. " 7/3/49 द्वितीयभागे पृ० 821
3. कथासरित्सागरे लम्बके । तरङ्गे । श्लोक सं० 20
4. वीरमित्रोदये संस्कारप्रकाशे पृ० 613-14 तमे ।

पाणिनिर्शब्दानुशासनस्य यदि सूक्ष्मतया पर्यवेक्षणं भवेत् तर्हीदं सुनिश्चितं भवेत् यत् पाणिनिः केवलं शब्दशास्त्रस्यैव ज्ञाता नास्ति, अपितु प्राचीने वाङ्मये तस्याप्रतिहतगतिरस्ति । वैदिक वाङ्मये पि "शाकल्यःपाणिनिर्यास्क इति ऋथं परास्मयः"[1] इत्युक्त्या वैदिके पिवाङ्मयपि व्याकरणमिदं यथायथं विलसति - अस्यातिरिक्तं भूगोलमितिहासं, मुद्राशास्त्राणां तथा लोकव्यवहरादिकानां शास्त्राणाञ्च निर्वचनमपि व्याकरणानेन जायते । तस्य शब्दानुशासनं न केवलं शब्द-ज्ञानायापितु प्राचीनेतिहासभूगोलयोर्परिज्ञानाय च प्रकाशस्तम्भ इव भाति । महाभाष्यकारेण पतञ्जलिना पि स्वयमेवोक्तम्- "प्रमाणभूत आचार्यो दर्भपवित्रपाणिःशुचावकाशे प्राङ्मुखेपविश्य महता प्रयत्नेन सूत्राणिप्रणयतिस्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनीरयता सूत्रेण"[2] इति ।

पाणिनीय व्याकरणस्य सम्बन्धो :माहेश्वरसम्प्रदायव्याकरण-तरत्वेन सहैवा स्ति । इदन्तु प्रत्याहारसूत्राणां माहेश्वरत्वेन सिद्ध्यति ।

आचार्यपाणिनिः सम्पूर्णाष्टाध्यायीं संहिता पाठ स्पा-त्मिकां व्यरचयत् । महाभाष्ये उल्लिखितम् -

"यथा पुनरियमन्तरतमनिर्वृत्तिः सा किं प्रकृतिते ।

भवति-स्थानिन्यन्तरतमे षष्ठीति । आहोस्विदादेशतः-स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति । कुतः पुनरियं विचारणा ? उभयथा-

---

1· ऋग्वेदभाष्यस्य मन्त्रानुक्रमण्याम् 7/1स्यारम्भे ।

2· महाभाष्ये 1/1/1 पृ0 39

हि तुल्या संहिता "स्थाने न्तरतम उरण् रपर:"[1] इति महाभाष्यकारेण कतिपयस्थानेषु प्राचीनानां वृत्तिकाराणां सूत्रविच्छेदं कृतम् । यथोक्तम्- "नैवं विज्ञायते - क्वुब्वरपो यजश्चेति । कथन्तर्हि ? क्वुब्वरपो यजश्चेति"[2] इति प्रमाणेर्ज्ञातं यत् सम्पूर्णाष्टाध्यायीं पाणिनि: संहितारूपेण व्यरचयत् । यद्यपि महर्षिपाणिनिप्रवचनकाले तस्या: सूत्रविच्छेदमवश्यमेव कृतवान्ना सीदिति । तथापि महाभाष्यकारेण तस्य संहितापाठं हि प्रामाणिकं स्वीकरोति । पाणिनेर्प्राक् को पि समस्तं व्याकरणं सम्प्रति नोपलभ्यते, किन्तु प्रातिशाख्य ,श्रौतसूत्राणान्चानेकैर्सूत्रै: तेषां समत्वं याति । इदमेव स्पष्टं प्रतिभाति यद् महर्षिपाणिनिना स्वग्रन्थे प्राचीन ग्रन्थकाराणां व्याकरणकर्तृणान्च सूत्राणामुल्लेख: कृतम् ।

वस्तुतस्तु यद्यपि पाणिनि स्वशास्त्रप्रवचने सर्वेषां प्राचीन व्याकरणकर्त्तृस्यां तथा तेषां व्याकरणपरकसूत्राणान्चोल्लेख: कृतवान् तथापि तस्य प्रधानमुपजीव्य व्याकरणं "आपिशलि" "कृत"आपिशल" व्याकरणमस्ति । यथोक्तं पदमञ्जर्याम्- "पाणिनिरपि स्वकाले शब्दान् प्रत्यक्षयन्नापिशलादीनां पूर्वस्मिन्नपि काले सत्तामनुसन्धत्ते, एवमापिशलि:[3] इति । धातुपाठं,गणपाठमुणादिसूत्रं,लिङ्गानुशासनन्च पाणिनि:स्वशब्दानुशासनग्रन्थस्य पूर्णतायै प्रवाचितवान् । उक्ता:चत्वारो ग्रन्था:पाणिनीय शब्दानुशासनस्य परिशिष्टा:सन्ति । अत: प्राचीनग्रन्थकारान्च "खिल" शब्देन व्यवहरन्तीति ।

1· महाभाष्ये 1-1-50

2· " 4-1-16

3· पदमञ्जर्याम् {अथशब्दानुशासनम्} भागे । पृ०-6

किन्चाधुनिकं भाषाविज्ञानशास्त्रं पाणिनीय व्याकरणमाश्रित्यैव नित-
समुपजृम्भतेतराम् । भाषाविज्ञान परीक्षणाय समस्तं जगत् भाषैकसूत्र
ग्रन्थनाय च यो हि प्रयास: साम्प्रतं भाषावैज्ञानिकै: साम्प्रतमनुष्ठित:
तद्द्वारा कम्प्यूटर यन्त्रं पाणिनि व्याकरणमाधृत्य संस्कृतभाषामूलकमेवेति
नूनं पाणिनि व्याकरणस्य महते ज्यैष्ठ्याय लोक कल्याणाय भारतवर्षस्य
गौरवाय वानुशिष्यते । मन्ये पाणिनीयं व्याकरणं कियद् भाषावैज्ञानिक-
मिति स्वराणां "टित" "डि•त्" "कित्" इत्यादीनां प्रत्याहाराणाञ्चानु-
कल्पेन भारतीयं वैज्ञानिकं भाषाविज्ञानं नूनंमचिरमेव महाल्लोकमङ्•गला-
नुशंसकं भविष्यतीति, धन्या भारतभूमि:, धन्यो महामुनि:पाणिनिश्चेति
दिक् ।

अष्टाध्यायीग्रन्थस्य वार्तिककाराः

पाणिनीयाष्टाध्याय्यामुपर्यनेके चार्याः वार्तिकसूत्रपाठं व्यरचयन् । तेषां ग्रन्थाः इदानीमनुपलब्धाः । महाभाष्ये अनेके ज्ञातनामाचार्याणां वचनं "अपर आह" इति निर्देशपूर्वकमुल्लिखितम् । आचार्य पतञ्जलिना तु यत्र कुत्रापि वार्तिककाराणां नाममपि निर्दिष्टं । महाभाष्ये निम्न वार्तिककाराणां नामोल्लेखोऽस्ति । यथोक्तम्- कात्यायनः, भारद्वाजः, सुनागः, क्रोष्टाः, वाडवः, व्याघ्रभूतिः, वैयाघ्रपद इति । वार्तिकानां कृते शब्दशास्त्रे वाक्यं, व्याख्यानसूत्रं, भाष्यसूत्रं, अनुतन्त्रं अनुस्मृति नान्व शब्दानां व्यवहारो भवति ।

कात्यायनः

पाणिनीय व्याकरणमाश्रित्य ये ये वार्तिककाराः वार्तिकमरचयन् तेषु कात्यायन एव प्रसिद्धः । महाभाष्ये मुख्यरूपेण कात्यायनस्यैव वार्तिकाणामुल्लेखो दृश्यते । भगवान् पतञ्जलिर्महाभाष्ये कात्यायनं स्पष्टरूपेण वार्तिककार पदेनाभिहितवान् । यथोक्तम् -

"न स्म पुराद्यतन इति ब्रुवता कात्यायनेनेह । स्मादिविधिः पुरान्तो यद्यविशेषेण भवति, किं वार्तिककारः प्रतिषेधेन करोति - न स्म पुराद्यतन इति"।[1] अन्यदपि - "सिद्धत्येवं यत्त्वदं वार्तिककारः पठति विप्रतिषेधात्तु बलीयस्त्वम्" इति एतद्संगृहीतं भवति[2]" इति।

आचार्यपुरुषोत्तमदेवेन कात्यायनस्य कतिपय-[illegible] नामान्युद्धृतानि । यथा मेधाजित् कात्यायनश्च सः । पुर्नसुर्वररुचिः[3] "इति

---

1. महाभाष्ये 3/2/118
2. " 7/1/1
3. त्रिकाण्ड शेष कोषे -

वस्तुतस्तु कात्यायनस्यापरनाम-मेधाजित्, कात्यायन, कात्य, पुनर्वसु, वररुचिरिति प्रसिद्धिः ।

प्राचीन वाङ्मये नानाविध कात्यायन पदानामुल्लेखो विद्यते, प्रथमो कात्यायनः कौशिक पदवाची । द्वितीयः आङ्गिरसः। तृतीयः भार्गवः । चतुर्थः द्व्यामुष्यायणः इति । स्कन्दपुराणानुसारं कात्यायनः याज्ञवल्क्यस्य पुत्रआसीत् । यो हि वेदसूत्रमरचयत् । स्कन्दपुराणे -
"कात्यायनसुतं प्राप्य वेदसूत्रस्य कारणम्"[1] इति । कात्यायनमेवं हि विद्याविचक्षण"पदेनाभिहितम् । यथोक्तम् स्कन्दे -

कात्यायनाभिधं च यज्ञविद्याविचक्षणम् ।
पुत्रो वररुचिर्यस्य वभूव गुणसागरः ।।[2]

इत्यनेन कात्यायनस्य वररुचिर्नामको पुत्रस्योल्लेख प्राप्नोति । युधिष्ठिर मीमांसक मतेन कात्यायनपुत्रःवररुचिः कात्यायनःअष्टाध्यायी सूत्राणां वार्तिककारः । यथोक्तम् - हमारा विचार है कि याज्ञवल्क्य का पौत्र, कात्यायन का पुत्र वररुचि कात्यायन अष्टाध्यायी कावार्तिककार है।[3]"इति

पण्डितराज नागेशेन लघुशब्देन्दुशेखरे कात्यायनं पाणिनि शिष्यम् । यथोक्तम् अव्ययीभावप्रकरणे "संख्यावश्येन"सूत्रस्य व्याख्याने उक्तम् -

वस्तुतस्तु कात्यायनः पाणिनेर्शिष्यः ।

---

1. स्कन्दपुराणे नागरखण्डे अध्याये 130 श्लोके 7।
2. " " 131 " 48
3. सं०व्या०शा० का इति०ग्रन्थे प्र०भागे पृ० 324 तमे ।

महाभाष्ये पस्पशाह्निके "यथा लौकिकवैदिकेषु"वार्तिक व्याख्यायामुक्तम् - "प्रियतद्धिता:दाक्षिणात्या:। यथा लोके वेदे च प्रयोक्तारो यथा लौकिकवैदिकेषु प्रयुञ्जन्ते"[1] इति । अनेन विस्पष्टं यत् "कात्यायन:"दाक्षिणात्यआसीदिति ।

स्कन्दपुराणानुसारं महर्षि याज्ञवल्क्यस्याश्रम:आनर्त"=साम्प्रतं गुजरात देशे सीत् ।

सम्भवमिदं यत् याज्ञवल्क्यस्य मिथिलागमनानन्तरं तस्य पुत्र: कात्यायन: महाराष्ट्रम्प्रतिगच्छति, तस्य पौत्र:वार्तिककार वररुचिकात्यायनस्य तत्र दाक्षिणैव निवसतिस्म ।

महर्षि पतञ्जलिर्महाभाष्ये कात्यायन कृते"भगवान्"पदं व्यवहृत्य कात्यायनस्य श्रेष्ठतां प्रामाणिकतान्व निर्दिशति । उक्तम् - "प्रोवाच भगवान् कात्य:"[2] इति ।वस्तु तस्तु कात्यायनस्य वार्तिकपाठं पाणिनीयव्याकरणस्यात्यन्तं महत्वपूर्णतमास्ति, तेन विना पाणिनीयव्याकरणमपूर्णं प्रतिभाति । पतञ्जलिरपि कात्यायनीय वार्तिकानामाधारं मत्वा स्वमहाभाष्यमलिखत् । महाभाष्ये पि वार्तिकाणां संख्या स्पष्ट एव न प्रतिभाति ।

भरद्वाज:

भगवता पतञ्जलिना भारद्वाजीय वार्तिकानामुल्लेखो महाभाष्ये नेकेषु स्थलेषु कृत: । वार्तिकानीमानि पाणिनीयप्रोक्ताष्टाध्याय्यामुपरि निर्मितानि । इमानि तु महाभाष्ये उद्घृतानि भारद्वाजीयानां वार्तिकाणां सूक्ष्म पर्यवेक्षणेन स्पष्टं भवति । यथोक्तम् - "भारद्वाजीया:पठन्ति-नित्यप्रकित्वमिद्वाधो:कृत्वाग्रहणमुत्तरार्थम् ।[3] इति । भारद्वाजीया:वार्तिका:कात्यायनीया: वार्तिकेभ्यो विस्तृता: । तेषां स्वरूपम् -

---

1. महाभाष्ये 3/2/3   2. महाभाष्ये 1/2/33

कात्यायनीय	- पुसंज्ञायां प्रकृतिग्रहणं शिद्वर्थम् ।
भार:	- पु संज्ञायां प्रकृतिग्रहणं शिद्विक्लार्थम् ।
कात्या०	- यश्चिणो:प्रतिषेधे हेतुमण्णिश्रिबूञामुपसंख्यानम् ।
भार०	- यश्चिणो:प्रतिषेधे णिश्रिग्रन्थिग्रन्थिबूञात्मने पदाकर्मकाणामुपसंख्यानम्"।[1] इति । एभिर्प्रमाणै सिद्ध्यति यत् भारद्वाजीयापि वार्तिकानिपाणिनीय व्याकरणोपरिनिर्मितानि विस्तृतानि सन्ति ।

सुनाग:

पण्डित हरदत्त: पदमञ्जर्यां वार्तिकाणां रचयिता "सुनाग:" इति स्वीकरोति । यथोक्तम् -

"सुनागस्याचार्यस्य शिष्या:सौनागा:"इति ।[2]

कैयट विरचितमहाभाष्य प्रदीपे सुनागाचार्य: कात्यायनाचार्यादर्वाचीन: । यथोक्तम् -"कात्यायनाभिप्रायमेव पदर्शयितुं सौनागैरतिविस्तरेण पठित-मित्यर्थ:"इति ।[3] वस्तुतस्तु सौनाग वार्तिका:पाणिनीयाष्टक एव निगदिता यथोक्तम् - "इह हि सौनागा:पठन्ति-वुञ्श्चाणूकृतप्रसंग:"[4] इति ।

1· सं०व्या०शा० का इति०ग्रन्थे पभागे पृ० 240

2· पदमञ्जर्याम् 7/2/17 भागे पृष्ठे 76। तत्रे ।

3· महाभाष्ये पदीपे 2/2/18 तत्रे व्याख्यानम् ।

4· " 4/3/155

क्रोष्टा

आचार्य क्रोष्टु: वार्तिकस्योल्लेख: महाभाष्ये एकैव स्थले प्राप्नोति । यथोक्तं महाभाष्ये -

"परिभाषान्तरमिति च कृत्वा क्रोष्ट्रीया:पठन्ति -नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन"इति।वस्तुतस्तु क्रोष्ट्रीय वार्तिकानि पाणिनीय व्याकरणमधिकृत्य विहितानि ।

बाडव:

बाडवाचार्यस्य विषये भगवान् पतञ्जलिर्महाभाष्ये उक्तम् -

"अनिष्टिज्ञो बाडव: पठति"[2] इत्यस्मिन् वाक्य व्याख्यायां भट्ट नागेशेन महाभाष्यप्रदीपोद्योते "सिद्धं त्विदितोरिति वार्तिकं बाडवस्य"[3] इति महाभाष्य प्रमाणाभ्यां सिद्ध्यति यत् बाडव नामक: को पि वैयाकरणोय: पुरा पाणिनीय व्याकरणोपरि वार्तिकं कृतम् ।

व्याघ्रभूति:

महाभाष्ये "व्याघ्रभूति" आचार्यस्य क्वापि साक्षादुल्लेखो नास्ति परन्तु कैयट मतानुसारं इदमेव वार्तिकं व्याघ्र भूति विरचितमेवास्ति । यथोक्तं- "आयमेवार्थो व्याघ्रभूतिनायुक्त इत्याह -। काशिकायामेवैक-श्लोकेन प्रमाणमुद्धृतम् - "सम्बोधनेतूशनशस्त्रिरूपं सान्तं तथा नान्तमथाप्य-दन्तम् ।माध्यन्दिनिर्वष्टिगुणंत्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठ :।।[4] इति

1• महाभाष्ये 1/1/3 2• महाभाष्ये 8/2/106सूत्रव्याख्याने ।

3• " 106सूत्रव्याख्याने 4• काशिकायाम् 7/1/94

अत: व्याघ्रभूत: वार्तिकं सम्प्रति प्रचुरमात्रायां नोपलब्धं तथापि व्ययमाचार्य: वार्तिककार एवास्तीति प्रसिद्धि: ।

वैयाघ्रपद्य:

आचार्य वैयाघ्रपद्यस्य नाम पाणिनीय व्याकरणे नहि दृश्यते । परन्त्वस्या: प्रमाणं काशिकायाम् -

गुणं त्वकारान्ते नपुंसकेव्याघ्रपदां वरिष्ठ:"इति । पदमञ्जर्यामपि वैयाघ्रपद्यस्य व्याकरणप्रवक्तृत्वं प्रस्फुटति - "व्याघ्रपादपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्य आचार्य:"[2] इति । काशिकायामेव अस्याचार्यस्य वार्तिकप्रवक्तृत्वं स्पष्टमेव प्रतिभाति -

"शुण्डिकका शुष्काजङ्घान्वा च"[3] इति । आचार्य भट्टोजिदीक्षितेन वार्तिकेदं वैयाघ्रपद्यविरचितं स्वीकरोति । यथोक्तम् - अतएव शुष्किका------इति वैयाघ्रपदीयवार्तिके णिशब्द एव पठ्यते"।[4] वस्तुतस्त्वार्था वैयाघ्रपद्य: वार्तिकार:स्पष्टएव प्रतिभाति ।

---

1. पदमञ्जर्याम् 7/1/94 भागे 2 पृष्ठे 7/3/9
2. काशिकायाम् 8/2/1 तमे ।
3. शब्दकौस्तुभे 1/1/56

हेलाराज:

पण्डित हेलाराजेन व्याकरण वार्तिकोपर्येका "वार्तिकोन्मेष" नाम्नी टीका कृता । यथोक्तं वाक्यपदीयटीकायाम्-

"वाक्यकारस्यापि तदेव दर्शनमिति वार्तिकोन्मेषे कथित मस्माभि:"[1] इति । अपरन्च -"वार्तिकोन्मेषे विस्तरेण यथा-तत्त्वमस्माभिर्व्याख्यातमिति तत एवावधार्य्यम्"इति[2] ।सम्प्रति "वार्तिकोन्मेष"ग्रन्थ: नोपलभ्यते ।

राघवसूरी

परमवैयाकरण राघवसूरी वार्तिकाणामर्थप्रकाशिका "नाम्नी व्याख्या कृतवान् ।"अर्थप्रकाशिका" ग्रन्थस्य हस्तलेखं मदासस्य राजकीय हस्तलेख संग्रहालये विद्यते । इदन्तु पं० युधिष्ठिर मीमांसकमहोदयमतम् ।

राजरुद्र:

पण्डितराजरुद्रेण काशिकावृत्तौ श्लोकवार्तिकाणां व्याख्या कृतम् । राजरुद्रस्य पिता "गन्नण"इत्यासीत् । अस्य वार्तिकस्य हस्तलेखं मदासस्य राजकीय हस्तलेख संग्रहालये विद्यते । युधिष्ठिरमीमांसकमतमिदम्

1· वाक्यपदीये तृतीयकाण्डे टीकायां पृष्ठे 443 काशी सं०

2· " " " 444 " "

महाभाष्यकार: पतञ्जलि: {2000 वि.पू.}[1]

महामुनि पतञ्जलिपाणिनीय व्याकरणोपरि का महती व्याख्या प्रस्तुतवान् । इयं व्याख्या संस्कृत वाङ्मये महाभाष्यनामाभिहितम् । अस्मिन् ग्रन्थे भगवता पतञ्जलिना व्याकरणस्य काठिन्यं शुष्कत्वञ्च विषयं येन क्रमेण सरसं सारल्येन च जनेभ्योहृदयङ्गमं कारयति स एव प्रशंसाया: विषयम् । महाभाष्यं पाणिनीय व्याकरणस्य प्रामाणिकं प्रतिष्ठाविधायकं साङ्गोपाङ्गं व्याख्यानमस्ति । सर्वे वैयाकरणा: इमं दृष्ट्वा प्रणमन्ति । अर्वाचीना:वैयाकरणा: यत्र यत्र सूत्रवार्तिकयोर्मध्ये विरोधं मनुभवन्ति तत्र तत्र महाभाष्यमतमेव प्रमाणत्वेन मनन्ति । यथोक्तम् - "यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्"[2] यथोत्तरं मुनीनां प्रामाण्यम्"[3] इति । महाभाष्य प्रमाणपाठे व्यवस्था संजाता । भर्तृहरि, कैयट, नागेशाख्य कतिपय स्थानेषु पाठान्तराणामुद्धृत: स्थानेष्वनेकेषु पाठ:पूर्वापर व्यस्तो वर्तते । टीकाकारैस्तत्र तत्र निर्देशित: । एवं प्रकारेणानेकेषु स्थलेषु महाभाष्यस्य पाठ अपि लुप्तप्रायो भवति । यथोक्तम् -"अस्य च्वौ अव्ययप्रतिषेध-श्चोद्यते, दोषाभूतमहर्दिवा भूता रात्रिरित्येत्यर्थम् । स इहापि प्राप्नोति उपकुम्भीभूतम्, उपमणिकीभूतम्"[4] इति महाभाष्यकार: "अस्य च्वौ" सूत्र-विषये अव्ययप्रतिषेधश्चोद्यते" इति व्यवहितम् । अधुना महाभाष्ये "अस्य च्वौ" सूत्रस्य भाष्यं नावाप्यते । सम्पूर्णे महाभाष्ये अन्यत्र कुत्रापि "अस्य च्वौ" इति विषये "अव्ययप्रतिषेध:इति विधानं नास्ति । अत:स्पष्ट-मेव प्रतिभाति यत् "अस्य च्वौ" सूत्रस्य भाष्यं नष्टमिति ।

---

1. सं०व्या०शा०का इति०ग्रन्थे पृ० 356 तमे ।
2. महाभाष्ये कैयटकृत प्रदीपव्याख्याम् -1/1/29
3. " नागेशकृत उद्योते 3/1/87
4. " 1/1/41

विभिन्न प्राचीन ग्रन्थेषु भगवन्तं पतञ्जलिं गोनर्दीय:, गोणिकापुत्र:, नागनाग:, चूर्णिकार: फणिभृत्, शेषराज: शेषाहि: चूर्णिकार:, पदकारश्चेति अपरापर नामधेयेनाभिहितम् । महाभाष्यकार:पतञ्जलि: "विभाषा साकाङ्क्षे"सूत्रस्य भाष्ये कश्मीरं प्रत्युत्सुक:[1]"अभिजानासि देवदत्त कश्मीरान् गमिष्याम: तत्र सक्तून पास्याम:" इति वत्युदाहरणे-नेदृशं प्रतिभाति यत् पतञ्जलेर्जन्मभूमि: कश्मीरमेवास्ति । किन्तु भगवान् पतञ्जलि: पाटलिपुत्र एव वासं चकार । महाभाष्ये नेकविध निर्देशै: व्यक्तं यत् पतञ्जलि: मथुरा, साकेत, कौशाम्बी, पाटलिपुत्र च विषये सुष्ठु जानातिस्म । अत एवोक्तोदरणेन पतञ्जले: [illegible] सम्बन्ध कश्मीरेणाधिक: आसींदिति ।

भर्तृहरि:

प्रसिद्ध चीनदेश यात्री इत्सिंग:स्वग्रन्थे उल्लेखयति । यथोक्तम् हिन्दी भाषायाम्" वाक्यपदीय कार और महाभाष्यव्याख्या का रचयिता आचार्य भर्तृहरि बौद्धमतानुयायी था । उसने सात बार प्रव्रज्या ग्रहण की थी"।[2] इति ।वस्तुतस्तु वाक्यपदीय महाभाष्यदीपनाम्नी टीकायाञ्च पर्यनुशीलनेन विस्पष्टं यत् भर्तृहरि:वैदिकधर्मावलम्बी एव सिद्धति । स एवाचार्य:वाक्यपदीये-" न दागमादृते धर्मस्तर्केण व्यवतिष्ठते ।[3] इति । पुनरपि-"वेदशास्त्र विरोधी च तर्कश्चक्षुरपश्यताम्"[4] इति ।

1· महाभाष्ये 3/2/14 तमे

2· इत्सिंग की भारत यात्रा पुस्तके पृ0 274 तमे

3· वाक्यपदीये ब्रह्मकाण्डे कारिकांशा: 30 -

4· महाभाष्ये दीपिका टीकायां 1/136 तमे सूत्रे ।

वेदस्य विषये इदृशमुद्गारं वेदविरोधी बौद्धविद्वान् कथापि न प्रकाशयेत् ।
अत: आचार्य: भर्तृहरि वैदिक धर्मावलम्बी नास्ति बौद्ध: इति ।

आचार्य भर्तृहरि विरचिता: ग्रन्था:

1· महाभाष्य दीपिका । 2· वाक्यपदीयम् । 3· वाक्यपदीय ग्रन्थस्य, 1, 2 काण्डस्य स्वोपज्ञटीका । 4· भट्टिकाव्यम् ।5· भागवृत्ति: । 6· शतकत्रयम् {नीति, श्रृंगार, वैराग्यम्} 7· मीमांसाभाष्यम् । 8· वेदान्तसूत्रवृत्ति: । 9· शब्दधातुसमीक्षा, 8· वेदान्तसूत्रवृत्ति: 10· षष्ठी धावी भर्तृहरिवृत्ति: । एतानि दश पुस्तकानि सम्प्रत्युपलब्धानि सन्ति ।।[1]

आचार्य भर्तृहरि विरचित महाभाष्य टीकाया: यांशमुपलब्धो वर्तते तेनावलोकनेन विस्पष्टं यत् तत: प्रागेव ग्रन्थे नेके टीकाकारा: तेषां टीकाश्चासन् । भर्तृहरि:स्वटीकायां "अन्ये, अपरे केचित्"इत्युक्त्वा प्राचीनटीकाया: पाठएव मङ्गीकरोति । भर्तृहरि विरचित महाभाष्य टीकाया: अवलोकनेन निश्चितमिदं यत् महाभाष्योपरि न्यूनातिन्यून तिस्र: एव टीकाउल्लिखिता: । महाभाष्ये उपलब्ध टीकायां भर्तृहरे: "दीपिका"टीका प्राचीना प्रामाणिकाचास्ति । वैयाकरणनिकाये पतञ्जले-रनन्तरं "आचार्य भर्तृहरि:"एवैवास्तियं सर्वेवैयाकरणा:प्रमाणमिति मत्वा-तत्सिद्धान्तमङ्गीकुर्वन्ति ।

1· सं0 व्या0 शा0 का इति0 ग्रन्थे प्र0भागे पृ0 395 तमे ।
2· " " " पृ0 418 तमे ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अज्ञातकर्तृक: [सं0680 वि0पूर्व][1]

ऋग्वेद भाष्यकर्ता स्कन्दस्वामी । स एव निरुक्तोपरि टीका कृतवान् । स आचार्य: स्वटीकायांलिखति यथा-" अन्ये वर्णयन्ति भावशब्द:शब्द पर्याय: । तथा च प्रयोग: - यदा सर्वे भावा:स्वेन भावेन भवन्ति स तेषां भाव:"इति सर्वे शब्दा:स्वेनार्थेनार्थभूता:संबदा भवन्ति स तेषां स्वभाव:"इति तत्र व्याख्यायते"[2] इति । विस्पष्टमनेन वाक्येन यत् स्कन्दस्वामी महाभाष्य को पि अधिकृत्य टीकामलीखत् ।

कैयट: [सं0।।00विक्रमात् प्राक्][3]

महावैयाकरण कैयटेनापि महाभाष्यस्यैकां प्रदीप "नाम्नी टीका कृता । महाभाष्योपलब्ध टीकासु भर्तृहरिविरचित महाभाष्यदीपिकाया-रनन्तरमेव प्राचीना टीका । कैयटेन सम्पूर्ण प्रदीपे एकैव स्थले महाभाष्य-दीपिकायासल्लेखो कृत/: यथोक्तम् -" विस्तरेण भर्तृहरिणा प्रदर्शित: ऊह"[4] इति सम्प्रति महाभाष्य ग्रन्थस्य काठिन्य ज्ञानाय कैयट प्रणीत प्रदीप टीका एवं साहाय्यं करोति विदुषाम् । अत: पाणिनीय सम्प्रदाये कैयट कृत महाभाष्यप्रदीपस्य महत्वपूर्णं स्थानमस्ति ।

1•निरुक्ते ।/2 टीकायां

2• सं0व्या0शा0 का इति0ग्रन्थे भागे पृ0 418

3• महाभा0नवा0निर्णयसागर संस्क0 पृ0 20

4• महाभा0 प्रदीपे प्रति अध्यायान्ते -

महावैयाकरण कैयट विरचितस्य महाभाष्य-पदीपस्य पत्य-ध्यायान्ते उक्तम् -" इत्युपाध्याय जैयटपुत्र कैयट कृते महाभाष्य प्रदीपे इति वाक्यानुसारं कैयटस्य पिता जैयट उपाध्यायेत्यासीत् । कैयटेन निस्सन्देह एव शिष्येभ्य: महाभाष्यस्य पवचनं कृतम् । परन्तु तेष्वेकैव शिष्यस्य नाम सम्प्रति प्राप्तं "स: उद्योतकार:"इति कैयट-शिष्येणो उद्योतकरेणापि पाणिनीय व्याकरणोपरि कमपि ग्रन्थं व्यरचयत् ।तस्योदरणं चन्दसागर-सूरिणा च स्वग्रन्थे उद्धृतम् । यथोक्तम् - "स्वगुरुमतमुपदर्शयन्नुद्योतकार आह - यथात्र भवानुस्मदुपाध्यायो व्याकरणरत्नाकारपूर्णचन्दमा:कैयटाख्य: शिष्यसार्थमिदमवोचत् - भृत्यापेक्षायात्र षष्ठी कृता,साध्यापेक्षया इति।[1] वैयाकरण कैयटस्योत्पत्ति: कस्मिन् देशे कदा भवतीति मया याथलंध्येन न ज्ञायते परन्तु कैयट मम्मट,रुद्रट,उद्भट्" इत्यादिभि नामानिसादृश्यं दृश्यते । सादृश्येन प्रतिभाति यत् कैयट: कश्मीरदेशस्य निवासी ।महाभाष्ये सरूपाणामेक शेष एक विभक्तौ " सूत्रे भाष्ये उक्तम् -"वृक्षस्या तानो वृक्षे छिन्ने पि न नश्यति"[2] इति कैयटेन स्वटीकायामुक्तम्"यथा वृक्षोपरि द्राक्षादि लता दलिता----इत्यादय: । अनेव दृष्टान्तेन कैयटस्य काश्मीर-देशीत्वं सिद्यति । यत् पुराकाले द्राक्षालता भारतवर्षे कश्मीर प्रान्ते एव पाप्नोतीति ।

ज्येष्ठकलश:[सं0 1085-1135वि0][3]

आचार्य ज्येष्ठकलश महोदयेन महाभाष्यग्रन्थस्य टीकाकृतं सन्दिग्ध मस्मिन् विषये । महाकवि बिल्हणेनोद्धृतम्-महाभाष्यव्याख्यामखिलजनवन्द्यां-विदधत: ।

1• हैमबृहद् वृत्तौ भागे । पृष्ठे 210

2• महाभाष्ये पृ0

3• सं0व्या0शा0 का इति0ग्रन्थे पृ0 425

सदा यस्यच्छात्रैस्तिलकितमभूत् पाङ्गणमपि [1] इति ब्राह्मण-वंशोद्भव कौशिक गोत्रस्याचार्य ज्येष्ठकलशस्य पिता "राजकलश:" पितामह: "मुक्तिकलशश्चासीदिति । "नागदेवी" तस्य भार्या । त्रयो पुत्रा: ज्येष्ठ-कलशाचार्यस्याभवन् , बिल्हण , इष्टराम, आनन्दनामाभिधानम्, । ज्येष्ठ कलश: मूलत: मध्यदेशीय ब्राह्मणासीदिति ।

मैत्रेय रक्षित: (सं0 1145-1175 वि0)[2]

बौद्धवैयाकरणेषु मैत्रेय रक्षितस्य नाम महत्त्वपूर्णरूपेण गृह्यते । वैयाकरणो यं वस्तुत: बङ्गदेश निवासी । मैत्रेय रक्षितेन "न्यास" ग्रन्थस्य तन्त्र पदीप नाम्नी महती टीका कृतम् । तथा च - धातुपदीप: दुर्घटवृत्तिश्च इति द्वौ ग्रन्थौ लिखितवान् ।

पुरुषोत्तमदेव: (सं0 1200 वि0)[3]

आचार्य पुरुषोत्तम देवेन "महाभाष्य ग्रन्थोपरि "प्राणपणा" नाम्नि लघुवृत्ति पकाशितम् । भाषावृत्तिग्रन्थस्य व्याख्याता सृष्टिधराचार्य स्यैवाशक्ति: । यतराजा लक्ष्मणसेनस्याज्ञया श्रीपुरुषोत्तमदेवेन "भाषावृत्ति" "ग्रन्थं रचितम् । यथोक्तं भाषावृत्ती वैदिकप्रयोगानर्थिनो लक्ष्मणसेनस्य राज्ञ आज्ञया पकृते कर्मणि पसजन्" इति । वैयाकरणपुरुषोत्तमदेवेनान्ये-

---

1. विक्रमाङ्कदेवचरिते सर्गे 182 श्लोक- 79
2. सं0 व्या0 शा0 का इति0 ग्रन्थे पृ0 426 तमे
3. " " पृ0 428 तमे
4. " " पृ0 431 तमे

ग्रन्था:रचितानि यथा- कुण्डणी व्याख्यानम्, कारक-कारिका, भाषावृत्ति: दुर्घटवृत्ति:, परिभाषावृत्ति: ज्ञापकसमुच्चय: उणादिवृत्ति:कारकचक्रमित्यादय: तथा च त्रिकाण्डशेष (अमरकोष परिशिष्टम्) हारावलीकोष: वर्णदेशना चेत्यादय:।[1]

धनेश्वर: (सं० 1250-1300वि०)[2]

वैयाकरण "धनेश्वर"पण्डितेन महाभाष्यस्य "चिन्तामणि"नाम्नी टीका कृता । धनेश्वर विरचित" प्रक्रिया रत्नमणि"नामकं ग्रन्थ:अड्यार पुस्तकालये विद्यते ।

शेषनारायण: (वि० 1500 वि०)[3]

शेषवंशावतंस श्रीशेषनारायणेन महाभाष्यस्य सूक्तिरत्नावली"नाम्नी प्रौढ़ा व्याख्या कृतम् । वैयाकरणेनानेन श्रौतसर्वग्रन्थस्यान्ते स्वपरिचयं दत्तम् । यथोक्तम् -"श्रीमद् बोधायनमार्गप्रवर्तकाचार्य श्रीशेष अनन्तदीक्षितसुतश्रीशेषवासुदेवदीक्षिततनूद्भवमहामीमांसकदीक्षितशेष नारायणनिर्णीते श्रौतसर्वस्वे व्यङ्गादि विचारो नामद्वितीय: इत्यादय: ।

विष्णुमिश्र: (सं० 1600 वि०)[4]

विष्णुमिश्र नाम्न: केनापि वैयाकरणेन महाभाष्यग्रन्थोपरि "क्षीरोद्" नामाभिधानं टिप्पणं कृतम् । भट्टोजिदीक्षितकृत शब्दकौस्तुभ"ग्रन्थे[5] तस्योल्लेखो विद्यते यथोक्तम् - "हयवरट् सूत्रे क्षीरोदकारोप्याह"इति।

1• सं०व्या०शा०का इति० ग्रन्थे पृ0434 तमे
2• " " पृ0434 तमे
3• " " पृ0440 तमे
4• शब्दकौस्तुभे 1/1/8 पृ0 144
5• सं०व्या०शा०

नीलकण्ठ वाजपेयी (सं० 1600-1675 वि०)[1]

"नीलकण्ठ वाजपेयी" पण्डितेन "सिद्धान्तकौमुदीग्रन्थारम्भे "सुखबोधिनी व्याख्यायां "स्वपरिचयं दत्तम् -

"रामचन्द्र महेन्द्राख्यं पितामहमहं भजे ।
आत्रेयाब्धिकलानिधिःकविबुधालङ्कार चूडामणिः।।
तातः श्रीवरदेश्वरो मखिवरो यो यस्य देवान् मखैः।
अध्यैष्ट अप्पयदीक्षितार्थतनयात् तन्त्राणि काश्यां पुनः ।
षड्वर्गाणि त्यजेष्टशिवतां प्राणनसौ बलात् ।
श्रीवाजपेयिना नीलकण्ठेन विदुषां मुदे ।
सिद्धान्त कौमुदी व्याख्या क्रियते सुखबोधिनीम् ।।इति

वैयाकरण नीलकण्ठेन व्याकरणविषयकानिपुस्तकानि रचितानि -यथोक्तम् - पाणिनीय शिक्षा, परिभाषावृत्तिः, सिद्धान्तकौमुद्याः सुखबोधिनी टीका, तत्त्वबोधिनी टीकायाःगूढार्थदीपिका "इति।

शेषविष्णुः (सं० 160 -1650 वि०)[2]

शेषविष्णु विरचितं महाभाष्यप्रकाशिका "टीकाविद्यते । महाभाष्ये प्रथमाह्निकान्ते महाभाष्यप्रकाशिकाटीकायांमिदं पाठं विद्यते -"इति श्रीमन्महादेवसूरिसुतशेषविष्णुविरचितायां महाभाष्यप्रकाशिकायां प्रथमाध्यायस्य प्रथमाह्निकम् "इति ।

---

1. सं०व्या०शा०का इति० ग्रन्थे पृ० 44।
2. " " 442

तिरुमल यज्वा (सं0 1550 वि0)[1]

तिरुमल यज्वा पण्डितेन महाभाष्यस्य "अनुपदा" नाम्नी व्याख्या कृता । अस्य पिता मलय यज्वा" इत्यासीत् । अनेन स्वपरिचयं दर्शपौर्णमासमन्त्रभाष्ये "उक्तम्- इति श्रीमद्राघवसोमयाजिकुलावतंसचतुर्दशविद्यावल्लभमल्लयसूनुना तिरुमलयज्वसोमयाजिना महाभाष्यानुपदटीकाकृता रचितं दर्शपौर्णमासमन्त्रभाष्यं सम्पूर्णम् "।इति ।

शिवरामेन्द्र सरस्वती (सं0 1675-1750वि0)[2]

शिवरामेन्द्र सरस्वती महाभाष्यग्रन्थस्य सिद्धान्तरत्नप्रकाश" नाम्नी व्याख्या कृतवान् । पण्डितो यं सिद्धान्तरत्नप्रकाशस्यान्ते निर्दिशति -

> "श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्य श्रीशिवरामेन्द्रसरस्वती योगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे ----------इति ।

नागेशभट्ट: (सं0 1730 - 1810 वि0)[3]

पण्डितनागेशभट्टेन "महाभाष्यप्रदीपस्य" उद्योताख्यं विवरणं प्रस्तुतम् । नागेशभट्ट: महाराष्ट्रीयोब्राह्मण: ।तस्यापरनाम "नागोजिभट्ट" इति । नागोजिभट्टस्य पिता शिवभट्ट:माता च

---

1. सं0 व्या0शा0 का इति0 ग्रन्थे पृ0 443
2. " " पृ0 444
3. " " पृ0 467

सती देवीति । यथोक्तम् लघुशब्देन्दुशेखरे- "इति श्रीमदुपाध्यायोप-
नामकशिवभट्टसुतसतीगर्भजनागेशभट्टविरचितलघुशब्देन्दुशेखरे--इति ।
तस्य ो पि सन्ततिनास्ति । यथोक्तं लघुशब्देन्दुशेखरस्यान्ते -

"लघुशब्देन्दुशेखर:पुत्रो मञ्जूषा चैव कन्यका ।
स्वमतौ सम्प्रसुत्याच शिवयोरर्पितौमुदा ।।इति

पण्डितराज नागेश:भट्टोजि दीक्षितस्य पौत्रेण हरिदीक्षितेन व्याकरणशास्त्रस्याध्ययनं कृतम् । वैद्यनाथपायगुण्डे: तस्य मुख्यो शिष्य: । वैया रण भाट नागेश:व्याकरण,साहित्य, अलंकार, धर्मशास्त्र सांख्ययोग,पूर्वोत्तर,मीमांसा, ज्योतिषादि विषयानाञ्च ज्ञाता । वैयाकरणनिकाये चार्यभर्तृहरेरनन्तरं स एकेव प्रामाणिको विद्वान् मन्यते । विदुषां मध्ये किंवदन्तीरियं यत् नागेशेन गुरुमुखाद्ष्टादश वारं महाभाष्यस्याध्ययनं कृतम् ।

प्रयाग समीपे श्रृङ्गवेरपुरनगरस्य राजा रामसिंह: नागेशभट्टस्यान्नदाता सीत् । नागेशभट्टस्येतिवृत्ते जश्रुतिरियं प्रसिद्धिर्यत् सं0 1772 तमे विक्रमे ब्दे जयपुराधीशेन स्वाश्वमेधयज्ञे पण्डितं नागेशमप्यामन्त्रयामास ।परं नागेशेन स्वक्षेत्रसन्यासवतेन निमन्त्रणमस्वीकृतम् । जनश्रुत्याबलेन नागेशस्य कार्यस्थितिकालसमय एव समीचीनम् ।

1· सं0 व्या0शा0 का इति0 ग्रन्थे पृ0467 तमे ।

नागोजिभट्टेन "महाभाष्यप्रदीपोद्योतानन्तरं व्याकरणशास्त्रस्य कतिपये ग्रन्था: विरचिता: -

1· लघुशब्देन्दुशेखर: 2· बृहच्छब्देन्दुशेखर:
3· परिभाषेन्दुशेखर: 4· लघुमञ्जूषा
5· परमलघुमञ्जूषा 6· स्फोटवाद:
7· महाभाष्यप्रत्याख्यानसंग्रह: । इत्यादय: ।[1]

जयादित्यवामनौ च (सं0650-700वि0)

जयादित्य वामनाभ्यां विरचिता काशिका वृत्ति:साम्प्रमुपलब्धा: । सम्प्रत्युपलभ्यमान पाणिनीयव्याकरणग्रन्थेषु महाभाष्यभर्तृहरि विरचित ग्रन्थेष्वनन्तरमियंवृत्ति: सर्वातिप्राचीना:महत्वपूर्णाचास्ति।

प्रसिद्धचीनी यात्रीत्सिंग:स्व ग्रत्यानप्रसंगे जयादित्यं काशिकाप्रारचयिता उक्तम् । श्रीसृष्टिधराचार्येणापि भाषावृत्त्यर्थं विवृत्ति "ग्रन्थे"काशिका ग्रन्थस्य रचयिता जयादित्य इति स्वीकृतम् । यथोक्तम् -"काशयति प्रकाशयति सूत्रार्थमिति काशिका जयादित्यविरचितावृत्ति:"[2] इति परं तस्या:अष्टमो ऽध्याय:वामनविरचित एव । पण्डित बालशास्त्रिणा प्रकाशित काशिकायांमादौ चतुरध्यायान्ते चाय "जयादित्यस्य"नाम मुद्रितं शेषेषु चतुर्ष्वध्यायेषु वामनस्य नामाङ्कितम् । पंण्डित हरिदीक्षितेन प्रौढमनोरमाया: "शब्दरत्न"टीकायां प्रथम,द्वितीय पञ्चम,षष्ठाध्यायानाञ्च जयादित्यविरचितं तथा शेषाध्यायानां रचयित वामन इति । यथोक्तम्- "प्रथमद्वितीयपञ्चमषष्ठा :जयादित्यवृत्तय:इतरे

1· सं0व्या0शा0 का इति0 ग्रन्थे प0मी0पृ0 50।

2· भाषावृत्त्यर्थं वृत्तौ 8/4/68

वामनकृतवृत्त्य: इत्यभियुक्ता: इति । उक्तोदाहरणयो: विस्पष्टं यत् "काशिका "ग्रन्थं जयादित्यवामनाभ्यां मिश्रिता:।

भट्टोजिदीक्षित: [सं० 1570-1650वि०][2]

आचार्यभट्टोजि दीक्षितेन "अष्टाध्यायी"ग्रन्थस्य "शब्दकौस्तुभ" नाम्नी वृत्तिं लिखितम् । वृत्तिरियं सम्प्रति सम्पूर्णं नोपलब्धं परं प्रारम्भे सार्धद्वयाध्यौ तथा चतुर्थो ध्यायश्च समुपलब्ध: ।

महाराष्ट्रीय ब्राह्मणेस्य भट्टोजिदीक्षितस्य पितु:र्नाम लक्ष्मीधर तथा लघुभ्राता रंगोजिभट्ट आसीत् । पण्डितराजजगन्नाथकृत मनोरमाखण्डनेन प्रतीयते यत् भट्टोजिदीक्षितेन नृसिंहस्य पुत्र:शेषकृष्णात् व्याकरणशास्त्रस्याध्ययनं कृतम् । यथोक्तम् - इह केचित [भट्टोजिदीक्षिता:]शेषवंशावतंसानां श्रीकृष्णपण्डितानां चिरायार्चितयो:पादुकयो: प्रसादादासादितशब्दानुशासनास्तेषु च पारमेश्वरपदं पयातेषु तत्रभवद्भि रुल्लासितं प्रक्रियाप्रकारां ----दूषणै: स्वनिर्मितायां मनोरमायामाकुल्यमकार्षु:"[3]इति ।

प्रसिद्ध वैयाकरणस्य भट्टोजिदीक्षितस्य काल:विवादास्पदम् । कालस्य परिज्ञानाय कतिपयविदुषां मतमुद्धृत । यथोक्तम् -

---

1• प्रौढ़मनोरमाया: शब्दरत्नटीकायाम् ।

2• सं०व्या०शा०का इति०ग्रन्थे प्र०भागे पृ०530 तमे ।

3• चौखम्बा सं०सीरीज काशीत: सं० 1991 तमे पुस्तकाकारे प्रकाशितम् मनोरमाया: भागे 3 अन्ते मुद्रितम् ।

1• डा0वेल्वेल्कर :सम्वत् 1657-1707विक्रमे ब्दे ।
2• " लालात्लीर: " 1575-1625 "
3• " डा0राव: " 1570-1635 "
4• " कीथ:विक्रम सप्तदश शताब्दप्राग् ।
5• " विण्टरनित्ज:सम्वत् 1625 तमे प्रादुर्भाव:
6• " ब्र0पी0चतुर्वेदी " 1600 तमे प्रादुर्भाव:
7• " वी0पी0काणे " 1580-1630 विक्रमे ब्दे।"इति।[1]

आचार्यभट्टोजिदीक्षितेन सिद्धान्त कौमुद्या: प्रागेव शब्दकौस्तुभं विरचितं यथोक्तं सिद्धान्तकौमुद्यामुत्तरकृदन्ते -

"इत्थं लौकिकशब्दानां दिङ्•मात्रमिह दर्शितम् ।
विस्तरस्तु यथा शास्त्रं दर्शिता शब्द कौस्तुभे ।।इति ।

श्लोकेनानेन महदाश्चर्यं यत् सिद्धान्त कौमुदी ग्रन्थ:दिङ्•मात्रमिह दर्शित: पाणिनीय व्याकरणस्य सर्वश्रेष्ठा रचना तत्कम्मुखे विस्तृत शब्दकौस्तुभ इति नाम्नी रचना विलुप्ता भट्टोजिदीक्षितेन स्वयमेव लिखिताया:सिद्धान्तकौमुद्या: "प्रौढ़मनोरमा"नाम्नी टीका कृता । ग्रन्थे स्मिन् प्रक्रियाकौमुद्यादिप्राचीनग्रन्थाणां यथा-यथा स्थाने खण्डनमपि वर्तते । तेन "यथोत्तरं मुनीनां वचनं प्रामाण्यमिति निर्दिष्टम् ।प्राचीन ग्रन्थकाराणामितर वैयाकरणानामपि मतं तेन स्वग्रन्थेगृहीतम् ।

पण्डितराज जगन्नाथ:

पण्डितराज जगन्नाथेन "प्रौढ़मनोरमाया:"खण्डने मनोरमाकुचमर्दन" नामकं ग्रन्थ व्यरचयत् । यथोक्तं मनोरमा कुचमर्दन टीकायाम्- "इत्थं च

1• सं0व्या0शा0का इति0ग्रन्थे प्र0भा0पृ0 532 तके उद्धृतम् ।

ओत सूत्रगतकौस्तुभग्रन्थ:सर्वो प्यसंगत इति बोध्यम् । अधिकं शब्दकौस्तुभखण्डनादवसेयम् । वस्तुतस्तु पण्डितराजशब्दकौस्तुभस्यापि खण्डने अन्य: को पि ग्रन्थे लिखित: तं सम्प्रतिनोपलब्धमिति । पण्डितराज जगन्नाथस्य केनापि कारणेनाहिनकुलवद्वैर:समजनीत्यनेन पंण्डितराज सर्वत्रैव युक्तायुक्तत्वविचारमपहा भट्टोजिदीक्षितस्य खण्डनमकरोदिति प्रसिद्धियं कथा ।

दृष्यद् द्राविडदुर्ग्रहवंशाम्लिष्टं गुरुद्रोहिणा
यन्म्लेच्छेति वचो विचिन्त्य सदसि प्रौढ़े पि भट्टोजिना ।
तत्सत्यापितमेव धैर्यविधिना यत्ल व्यमृदनात् कुचम् ।
निर्वध्यास्य मनोरमावशनयन्नप्ययादान् स्थितान् ।।इति

तैलङ्गब्राह्मणो यं पण्डितराज: । तस्यापरनामवेल्लनाडु त्रिशूलीरपि । तस्य पिता पेरुभट्ट माता च लक्ष्मीति प्रसिद्धा । पण्डितराज: सम्राट शाहजहां दाराशिकोहयो प्रियधातमासीत् । शाहजहा राजा तं "पण्डितराज"इत्युपाधिना विभूषित: ।ससम्मानं पदव्या समलंकृतमिति ।

अप्पयदीक्षित: [1575-1650][2]

अप्पय दीक्षितेन पाणिनीय सूत्राणां सूत्रप्रकाश"नाम्नी व्याख्या कृत । अप्पय दीक्षितस्य पितु:नाम "रङ्गराज अध्वरीति पितामहश्च आचार्य दीक्षितेति । स:भारद्वाजगोत्रीय: । अप्पय दीक्षितस्य कनिष्ठो भ्राता अय्यान दीक्षितेति । अच्यानदीक्षितस्य पौत्र: श्रीनीलकण्ठ-

---

1. रसगङ्गाधरे हिन्दी टीकायाम् ।
2. सं०व्या०शा० का इति०ग्र०प्रभा०पृ० 536 तमे ।

दीक्षित विरचित सिवलीलार्णव काव्यस्याध्ययनेन ज्ञातं यत् अप्पयदीक्षितस्यायु: द्विसप्ततिर्वर्षतमा । अस्मिन्नेव काले नुमानत: शतपुस्तकानि विरचितानि । यथोक्तमायुर्विषये - कालेन शम्भु:किल तावतापि, कलाश्चतुष्षष्टिमिता:प्रणिन्ये । द्वासप्ततिं प्राप्य समा: प्रबन्धान्छतं व्यदधादप्पयदीक्षितेन्द्र: इति ।[1]

वरदराजाचार्य:

आचार्यवरदराज: दाक्षिणात्य ब्राह्मण सीत् । तस्य पूज्य पिता "दुर्गातनय:"भट्टोजिदीक्षित: गुरुश्चासीदिति । स्वगुरोराज्ञया सिद्धान्तकौमुधा:"पथप्रदर्शक:"लघुसिद्धान्तकौमुदी "नामकं ग्रन्थमरचयत् । लघुसिद्धान्तकौमुधा: रचनानन्तरं वि०सं० 1550तमेचार्य: वरदराजेन सिद्धान्तकौमुदीं लघुरूपात्मिकां मध्यकौमुदी" रचितम् ।

विश्वेश्वर सूरि: [1600-1650वि0][2]

आचार्य "विश्वेश्वरसूरि "महोदयेन "भट्टोजिदीक्षित विरचित "शब्दकौस्तुभ"ग्रन्थस्यातिविस्तृता व्याख्या व्यवस्थापितम् । स: "व्याकरण सिद्धान्त सुधानिधि"रूपेणाध्यायत्रयात्मकेन मुद्रितम् । तस्य पिता "लक्ष्मीधर" इति । अयं पर्वतीयदेश वासीति प्रतिभाति । आचार्येण स्वग्रन्थे कतिपयस्थलेषु "भट्टोजि दीक्षितस्य"नाममभिहितं परं कुत्रापि शब्दरत्नस्योल्लेखं स्वग्रन्थे न कृतम् । अत: आचार्यस्य

---

1. शिवलीलार्णवकाले । सर्गे ।
2. व्या०शा० का इतिहास ग्रन्थे [यु०मी०कृते][पृ० 540 तमे ।

कालानुमानत: {सं० 1600त: 1650 वि० }मध्य एव मे प्रतिभाति। अनेन उक्त ग्रन्थानन्तरं कतिपय ग्रन्थं निर्मितम् । तेषां नामानि - क्रमेण -

1. तर्क कौतूहलम् ,2. अलङ्कार कौस्तुभम् । 3. रुक्मिणीपरिणय: 4. आर्यासप्तशती: , 5. अलङ्कारकुलप्रदीप:,6. रसमंजरी टीका चैते षट् ग्रन्था: विरचिता: ।[1]

आेरम्भट्ट: {सं0 1900 वि० }

ओरम्भट्टस्यापर नाम "वैद्यनाथभट्टविश्वरूप" इति तेन "व्याकरणदीपिका" नाम्नी वृत्तिं कृत । वृत्तावस्यामुदाहरण- मान्या:पङ्क्तेरपि सिद्धान्तकौमुद्या एवोद्धृतम् । ओरम्भट्ट: काशीनिवासी महाराष्ट्रीय:पण्डित: इति । पण्डितो यं प्रसिद्ध- विद्वान् "बालशास्त्रि: "गुरु पं०काशीनाथ शास्त्रि:समकालिकैव ।

स्वामी दयानन्द सरस्वती {1881-1904 वि० }[2]

स्वामी दयानन्द सरस्वती पण्डितेन "अष्टाध्यायी भाष्य" नाम्नी विस्तृतैका व्याख्या प्रस्तुत: । अस्य विदुष:जन्म काठिया- वाड़ प्रान्तस्य टङ्कारा नगरस्य औदीच्य ब्राह्मणकुले भूत् । तस्य पिता सामवेदीयो ब्राह्मण सीत् । तस्य पितृनाम "कर्शनजी- तिवाडी ति प्रसिद्धम् । बाल्यकाले सं मूलजी मूलशङ्करो वा नाम्ना

---

1. सं०व्या०शा० का इति०ग्रन्थे {यु०मी०कृते} पृ० 543
2. " " " " पृ० 544

जना: सम्बोध्यन्तेस्म । तस्य पिता "कर्शनजी तिवारी" शैवमतावलम्बी ।

तस्य पञ्चवर्ष एवावस्थायां विद्यारम्भ: तथा चाष्टवर्षान्ते उपनयनसंस्कारमभूत् । सामवेदीयो पि तस्य पिता तं स्वपुत्रं मूलजीनामकं रुद्राध्यायं तथा समग्रं यजुर्वेदं कण्ठाग्रमकारयत् । स: द्वाविंशति तवर्षे एव गृहं त्यक्त्वा सन्यासमग्रहीत् ।

तेन नर्बदा तदीय "चाणोदकन्याली" स्थले "स्वामी पूर्णानन्द सरस्वती" गुरुणा सन्यासमगृह्णात् । तदा दयानन्द सरस्वती तस्य नामकरणमभिहितम् । स्वामी विरजानन्द द्वारा तेन व्याकरणशास्त्रस्याध्ययनं कृतम् । तदानीं नव्यवैयारणेषु "स्वामी विरजानन्द:" व्याकरणस्य सूर्य इव कथ्यतेस्म ।

आर्यसमाज प्रवर्तक: "स्वामी दयानन्द सरस्वती:" अष्टाध्यायीं भाष्य" ग्रन्थानन्तरं कतिपय ग्रन्थानां रचनां कृतवान् । तेषु - 1-सत्यार्थप्रकाश:, 2· संस्कारविधि:, 3· ऋग्वेदादिभाष्यभूमिका 4· ऋग्वेदभाष्य ।5· यजुर्वेदभाष्य । 5· चतुर्वेदविषयसूचीत्यादि मुख्या: ग्रन्था:सन्ति ।

देवदत्त शास्त्री: [1943 वि0][1]

हरिद्वार वास्तव्येन पं0 देवदत्तशास्त्रिणा संस्कृतभाषायां संक्षिप्ता वृत्तिरलिखत् । अस्या:प्रथमो ऽध्याय:"अष्टाध्यायी"शीर्षकेन 1943 वैक्रमे ब्दे लखनऊ कान्यकुब्जयन्त्रालये उपलब्धम् ।

भीमसेन शर्मा [सं0 1911-1974वि0][2]

पं0 भीमसेन शर्म विदुषा पाणिनीयाष्टके संस्कृते हिन्दी भाषायान्वैका वृत्तिं कृतम् । अस्यां वृत्तौ सूत्राणां पदच्छेदं विभक्ति-निर्देश पूर्वकं संस्कृते हिन्द्यान्व वृत्तेरुदाहरणंप्रदर्शितम् ।

गङ्गादत्त शर्मा [सं0 1923-1990वि0][3]

पं0गङ्गादत्त शर्मणा गुरुकुल कांगडी हरिद्वारे ऽध्यापनं कुर्वन्न-ष्टाऽध्याय्या: संस्कृतभाषायां मध्यम मार्गीये का तत्त्वप्रकाशिका"नभी नाम्नी वृत्ति: प्रणीता ।

पं0गङ्गादत्त शर्मण: जन्म बुलन्दशहरनगरे सनाढ्य ब्राह्मण कुले भूत् । भवत:पिता हेमराजवैद्य"इति । भवतामथुरायां पं0उदयप्रकाशेन अष्टाऽध्याय्या:अध्ययनं कृतम् । अन्ते सन्यासस्य दीक्षां गृहीत्वा "स्वामी शुद्धबोध तीर्थ"नाम्ना प्रसिद्धिमवाप ।।

---

1. सं0व्या0शा0का इति0 ग्रन्थे [यू0पी0 कृते] पृ0 553
2. " " पृ0556 तमें ।
3. " " पृ0 556 तके ।

काशिकाया: व्याख्याता

आचार्य जिनेन्द्र बुद्धि:-

काशिका ग्रन्थमधिकृत्य ये हि व्याख्या ग्रन्था: सम्प्रत्युपलब्ध: तेषु बोधिसत्त्वदेशीय: आचार्यजिनेन्द्रबुद्धि विरचित । काशिकाविवरण पञ्जिका "अपरनाम न्यास" इति सर्वातिप्राचीनम् ।

न्यासकारेण स्वकिंचिन्मात्रमपि परिचयं न दत्तम् ।अत: सर्वथा तस्येति वृत्तविषये न्धकारमेव । किन्तु महाभाष्यव्याख्याता- कैयट:हरदत्तात् पौर्वकालिक: इति तु विस्पष्टम् । कैयटस्य जिनेन्द्र- बुद्धेरनेकानेक वाक्यानां परस्परं दरीदृश्यते । यथा -

1· न्यासकारेण- "द्वयोरिकारयो: प्रश्लेषनिर्देश: । तत्र यो द्वितीय इवर्ण: स ये {विभाषा} इत्यात्त्वबाधा यथा स्यादित्येवमर्थ:इति।[1]

प्रदीपकारेण :-

"दीर्घोच्चारणे भाष्यकारेण प्रत्याख्याते केचित् प्रश्लेषनिर्देशेन इकारो ये विभाषा {6/4/43} इत्यात्त्वस्य पक्षे परत्वात् प्राप्तस्य बाधनार्थ इत्याहु:[2] । तदयुक्तम् । क्यप्सन्नियोगेन विधीयमानस्येत्त्व- स्यान्तरङ्गत्वात्"इति ।

2· न्यासकारेण :-

अनित्यता पुनरागमशासनस्य घोर्लोपो लेटि वा {7/3/70} इत्यत्र वाग्रहणाल्लिङ्गाद् विज्ञायते ।तद्धि ददत् ददात् इत्यत्र नित्यं

1· न्यासे -3/1/111

2· महाभाष्ये प्रदीपे 3/1/114

धोर्लोपो मा भूदित्येवमर्थं क्रियते । यदि च नित्यमागमशासनं स्याद् वाग्रहणमनर्थकं स्यात् । भवतु नित्यो लोपः ।लत्यपितस्मिन् लेटो ऽाटौ {3/4/95} इत्यटि कृते ददत् ददादिति सिद्धत्येव । अनित्यत्वे त्वागमशासनस्याडागमाभावान्न, सिद्ध्यति, ततो वा वचनमर्थवद् भवति।।[1] इति । पदीपकारकैयटेन - केचित्वनित्यमागमशासनमित्यस्य ज्ञापकं वा ग्रहणं वर्णयन्ति । अनित्यत्वात्तस्यादयसति ददादिति न स्यादिति। तत्सिद्ध्यै वा ग्रहणं क्रियमाणमेनां परिभाषां ज्ञापयति[2] ।इति । उक्तोदाहरणानां पर्यालोचनेन द्वयो:पूर्ण साम्यं सिद्ध्यति । अत:न्यासकार: निश्चयेन वि०सं० ।070त: पूर्ववर्ती एव मे पतिभाति ।

इन्दुमित्र: {सं० ।150 वि०त:पूर्ववर्ती}[3]

इन्दुमित्र नाम्ना वैयाकरणेन काशिकाया: एका "अनुन्यास" नाम्नी व्याख्या कृता । तेनाष्टाध्यायी ग्रन्थमधिकृत्य "इन्दुमती" नाम्नी वृत्तिरपि निर्मितम् । आचार्य सीरदेवेन परिभाषावृत्तौ कथितम् -

"यत्तु तत्र स्वातिमहिमप्रागल्भ्यादनुन्यासकारो व्याजहार यत् सामर्थ्यप्राप्त्युभयोरुपादानं स उभयर्थप्राप्तौकर्मणीत्यस्य विषय:। ---तदयुक्तम्--।[4] इति

1· न्यासे 8/1/1

2· महाभाष्ये पदीपे 7/3/70

3· सं०व्या०शा०का इति० ग्रन्थे {यु०मी०कृते}पृ०570तमे ।

4· परिभाषावृत्तौ पृ०-5

महान्यासकार: (सं० 1215 त: पूर्ववर्ती)[1]

केनचिद् वैयाकरणेन "काशिका"ग्रन्थमधिकृत्यैव "महान्यास" नाम्नी टीका कृता । अस्या: कतिपय उद्धरणं प्रस्तुतम् -

यथा - 1. टित्त्वमभ्युपगम्य गौरादित्वात् सूचीति महान्यासे[2] ।

2. ब्रह्लते: घञ् ततष्ठन् इति महान्यास:[3] ।

3. चुल्लीति महान्यास इति उपाध्यायसर्वस्वम्[4] ।इति ।

महान्यासग्रन्थस्य कर्तु: नामाज्ञात एव । सर्वानन्देन अमरटीका-सर्वस्वग्रन्थस्य रचना वि०सं० 1216 तमे कृतमिति तु स्पष्टम् । अत: महान्यासकारस्य स्थिति: सं० 1216 त:प्राचीन: । अत एव महान्यास ग्रन्थ: न्यास,अनुन्यास ग्रन्थाभ्यांमर्वाचीन:प्रतीयते ।

विद्यासागर मुनि: (1115 वि०त:प्राक्)[5]

विद्यासागर मुनि: काशिकाया: "प्रक्रियामञ्जरी"नाम्नी टीका प्रकाशितवान् । ग्रन्थारम्भे स्वयमेवोक्तम् -

---

1. सं०व्या०शा०का इति० ग्रन्थे(यु०मी०कृते) पृ० 572 तमे ।
2. उज्ज्वलदत्त विरचित गुणादिवृत्तौ पृ० 165 तमे ।
3. अमरटीकासर्वस्व ग्रन्थे भागे 2 पृ० 379 तमे ।
4. " " " 3 " 277 तमे ।
5. सं०व्या०शा० का इति० ग्रन्थे (यु०मी०कृते) पृ० 573 तमे ।

वन्दे मुनीन्द्रान् मुनिवृन्दवन्द्यान्

श्रीमद्गुरून् श्वेतगिरीन् वरिष्ठान् ।

न्यासकरवव:पद्मनिकरोद्गीर्णाम्बरे,

गृहणामि मधुप्रीतो विद्यासागरषट्पद:।।इति।[1]

उक्तोदरणेन स्पष्टं यत् विद्यासागरस्य गुरु:श्वेतगिरि: । ग्रन्थान्ते च परमहंस परिव्राजकाचार्य निर्देशो वर्तते । यथा -

"इति श्रीमत्परमहंसपरिव्राजकाचार्यविद्यासागरमुनीन्द्रविरचितायां इति।[2] अनेन प्रतीयते यत् विद्यासागर: वैदिक मतावलम्बी एव किन्च तस्य गुरोर्नाम श्वेतगिरि इति । गिरी,पुरी,सरस्वतीत्यादय:नाम वैदिक सन्यासीनां कृत एव ।

हरदत्तमिश्र: {लं० ।।5वि० }[3]

पं० हरदत्तमिश्र:"काशिकाया:"पदमञ्जरी नाम्नी व्याख्यां कृतवान् अस्या:व्याख्याया: अवलोकनेन तस्य पाण्डित्यं पदिरूपेण विस्पष्टं पतिभाति । पं० मिश्र: पण्डितराज जगन्नाथसदृशं स्वपशंसां स्वयमेव करोति । उक्तन्च -

"पक्रियातर्क गहनप्रविष्टो दृष्टमानव: ।

हरदत्तहरि: स्वैरं विहरन् केन वार्यते ।।"[4] इति।

1• प्रक्रियामञ्जर्याम् पारम्भे -

2• " " अन्ते -

3• सं०व्या०शां०का इति० {यु०मी०कृते} पृ० 574 तमे ।

4• पदमञ्जर्यां पृ० भागे पृ० 49 तमे ।

पं० मिश्र स्वयमेव स्वग्रन्थारम्भे स्वपरिचयं दत्तम् । यथा -

"तातं पद्मकुमाराख्यं पणम्याम्बां श्रियं तथा ।
ज्येष्ठं चाग्निकुमाराख्यमाचार्यमपराजितम् ।।इति ।[1]

स: द्रविड़देश वास्तव्य: इदं तु स्वयमेवोक्तम् - मेट्शब्दस्तु वृत्तिकार-देशे जुगुप्सित: यथात्र द्रविड़देशे निविशब्द:"[2] इति । श्रीमिश्रेण पद-मञ्जरी" ग्रन्थातिरिक्तं महापदमञ्जरी "नाम्नी काशिकाया:टीका कृतम् । उक्तञ्च -

"भाष्यवार्तिककारविरोधस्तु महापदमञ्जर्यामस्माभि:प्रपञ्चित:"[3] इति परिभाषा प्रकरण ग्रन्थमपि श्रीमिश्रद्वारा प्रतिपादितम् । यथोक्तं पदमञ्जर्याम् "एतच्चास्माभि:परिभाषाप्रकरणाख्ये ग्रन्थे उपपादितम्।।[4] इति एतदतिरिक्तमपि ग्रन्था विरचिता आचार्य हरदत्तमिश्रेण -

1. आश्वलायन गृह्यव्याख्या -अनाविला ।
2. गौतमधर्मसूत्र व्याख्या - मिताक्षरा ।
3. आपस्तम्ब गृह्यव्याख्या -अनाकुला ।
4. आपस्तम्बधर्मसूत्र व्याख्या- उज्ज्वला ।

---

1. पदमञ्जरी ग्रन्थस्यारम्भे -
2. पदमञ्जर्यां द्वि०भा०पृ० 519 तमे उद्धृतम् ।
3. पदमञ्जर्यां 1/1/2० पृ० 72 तमे
4. " 1/1/2० पृ० 437 तमे ।

5. आपस्तम्ब गृह्यमन्त्र व्याख्या ।

6. आपस्तम्ब परिभाषा व्याख्या ।

7. एकाग्निकाण्ड व्याख्या ।

8. श्रुतिसूक्तिमाला । इति ।

श्रीरामदेव मिश्रः (सं० 1115-1370 वि० मध्ये)[1]

काशिकायाः "वृत्तिप्रदीप" नाम्नी व्याख्या श्री पं० "रामदेव-मिश्रेण" प्रतिपादिता । आचार्य सायणः "धातुवृत्ति" ग्रन्थे स्मरति -

"हरदत्तानुयायी राममिश्रो ऽपि"[2] इत्यादिना वाक्येन स्पष्ट विदधाति यत् रामदेवः हरदत्तस्योत्तरवर्ती एव ।

---

1. सं० व्या० शा० का इति० ग्रन्थे (यु० मी० कृते 580 पृष्ठे

2. धातुवृत्तौ 50 पृष्ठे उद्धृतम् ।

पाणिनीय व्याकरणस्य प्रक्रिया ग्रन्थकारा:

धर्मकीर्ति:- (सं० ।140 विक्रम)[1]

अष्टाध्यायी ग्रन्थोपरि बहव: प्रक्रियानुसारि ग्रन्था: विलिखिता:तेषु "रूपावतार:" सम्प्रत्युपलब्ध: । अयं ग्रन्थ: बौद्ध विद्वान् धर्मकीर्ति द्वारा विरचिता । पण्डित हेमचन्द्रेण लिङ्गानुशासनस्य स्वोपज्ञ विवरणे धर्मकीर्ति द्वारा विरचितस्य रूपावतार "ग्रन्थस्य च नामोल्लेख कृत: । यथा -

" वा: वारि रूपावतारे तु धर्मकीर्तिनास्य नपुंसकत्वमुक्तम्[2] ।

इति । अन्यच्च मैत्रेयेण -

"रूपावतारे तु णिलोपे प्रत्ययोत्पत्ते:प्रागेव कृते सत्येकारत्वाद् यङ्,दाधृतश्चोचूर्यत[3] इति ।

धर्मकीर्तिस्तु स्वग्रन्थे पदमञ्जरीकारस्य हरदत्तस्योल्लेखं कृतवान् । यथोक्तम् -

"दीर्घान्त एवायं हरदत्ताभिमत:"[4] इति । हरदत्तस्य समय: सं० ।।5 तमे समीपे । अत: धर्मकीर्ति: काल: अनुमानत: सम्वत् ।।4 त: समीपे मन्तव्यम् इति ।

1• सं०व्या०शा०का इतिग्रन्थे पृ० 585

2• लिङ्गानुशासने स्वोपज्ञ विवरणे पृ० 7। तमे ।

3• धातुप्रदीपे ।3। पृ०

4• रूपावतारे 2 भागे पृ० ।57 तमे ।

प्रक्रियारत्नकार: {सं0 1300 वि0त: पूर्वं}[1]

पण्डितसायणेन धातुवृत्तिग्रन्थे "प्रक्रियारत्न" ग्रन्थं बहुवारमुद्धृतम् । कृष्णलीलाशुक मुनि विरचित पुरुषकार व्याख्यायामुक्तम् -

"प्रपञ्चितं चैतत् प्रक्रियारत्ने"[2] इति । ग्रन्थकारस्य नामदेशकालादि विषये इतिहास: मौनमवलम्ब्यते । परं पुरुषकारग्रन्थे उद्धृतत्वेन ग्रन्थकारस्य काल: सं0 1300 त: पूर्वभावीविद्यते । यत: लीलाशुकमुने: काल: विक्रमस्य 1250-1350 त: मध्यपाती एव ।।

विमल सरस्वती {सं0 1400 वि0त: प्राक्}[3]

"विमलसरस्वती" पण्डितेन पाणिनीयसूत्राणां प्रयोगानुसारी "रूपमाला" नाम्नी व्याख्या कृता । ग्रन्थेऽस्मिन् समस्त पाणिनीय सूत्राणां व्याख्यानं नास्ति ।

रामचन्द्र: {सं0 145 पार्श्ववर्ती}[4]

पण्डित रामचन्द्राचार्येण पाणिनीय व्याकरणोपरि "प्रक्रिया-कौमुदी" ग्रन्थं लिखितम् । ग्रन्थोऽयं रूपावतार "ग्रन्थाद् विस्तृत: परन्त्व-स्मिनपि ग्रन्थे ष्टाध्याया: समस्त सूत्राणां व्याख्यानं नास्ति ।

---

1. सं0 व्या0 शा0 का इति0 ग्रन्थे 588 पृष्ठे ।
2. पुरुषकार व्याख्यायां पृ0 110 तमे ।
3. सं0 व्या0 शा0 का इति0 ग्रन्थे पृ0 589 तमे ।
4. " " पृ0 589 तमे ।

शेषवंशोत्पन्नो यं रामचन्द्राचार्यः । रामचन्द्रस्य पिता "कृष्णाचार्य" इति रामचन्द्रस्य पुत्रेण नृसिंहेण स्वपिता "धर्मतत्त्वालोक" ग्रन्थे अष्ट व्याकरणानां ज्ञाता, साहित्यरत्नाकरश्च इति रामचन्द्रः भिहितम् ।

नारायणभट्टः सं० 1617-1733 वि० ॥

केरलदेश वास्तव्येन नारायणभट्टेन "प्रक्रियासर्वस्वं" इतिनाम विरचितम् । ग्रन्थे स्मिन् विंशतिःप्रकरणं सन्ति । तदुक्तम् -

"इह संज्ञा परिभाषा सन्धिः कृत्तद्धिताःसमासाश्च । स्त्रीप्रत्यया: सुवर्थाः सुपां विधिश्चात्मनेपदविभागः तिङापि च लार्थ-विशेषा:सन्नन्तयङ्यङ्लुकश्च सुब्धातुः ।व्यायुयो धातुरुणादिश्छान्द-समिति सन्तु विंशतिखण्डाः । इति[2] । अस्मिन् ग्रन्थे पाणिनि प्रोक्तं समस्त सूत्राणि यथायथं व्याख्यातानि । प्रकरणानां विभागः क्रमश्च सिद्धान्तकौमुद्याः "सर्वथा भिन्नैव विद्यते ।ग्रन्थकारेण भोजस्य" "सरस्वतीकण्ठाभरणद्वारा महत् साहाय्यं गृहीतम् ।

---

1. सं०व्या०शा०का इति० ग्रन्थे पृ० 605 तमे ।

2. प्रक्रियासर्वस्व ग्रन्थे । भागे पृ० 3 तमे ।

पाणिनिमुनेरर्वाचीना: वैयाकरणा:

महर्षि पाणिनेरनन्तरमनेके वैयाकरणा: व्याकरणशास्त्रान्वाख्यानप्रवृत्ता: । तेषां व्याकरणानामुपजीव्यं पाणिनीयव्याकरणमेव। तत्र कातन्त्रमेव व्याकरणमेतादृशं यदस्ति सर्वथा नवीन । अर्वाचीन समस्तोपलब्धव्याकरणेषु केवलं लौकिक-संस्कृत शब्दानामन्वाख्यानमेव दरीदृश्यते । अर्वाचीन व्याकरणानामधोलिखिता: व्याकरणकर्त्तार: मुख्या: । तेषां नामानि -

1. कातन्त्रकार:, 2. चन्द्रगोमी:, 3. क्षपणक:, 4. देवनन्दी 5. वामन:, 6. पाल्यकीर्ति:, 7. शिवस्वामी: 8. भोजदेव: 9. बुद्धिसागर:, 10. भद्रेश्वर सूरि:, 11. वर्धमान:, 12. हेमचन्द्र: 13. मलयगिरि: 14. क्रमदीश्वर:, 15. सारस्वतव्याकरणकार: 16. रामाश्रय: सिद्धान्तचन्द्रिकाकार: 17. वोपदेव: 18. पद्मनाभ: 19. विनयसागर: इत्यादय: एतेषामतिरिक्तेन द्रुतबोध:, शीघ्रबोध:, शब्दबोध:, हरिनामामृतादिव्याकरणानां कर्त्तार: अनेके वैयाकरणा: बभूवु: ।

पण्डित गुरुपद हालदारेण "व्याकरण दर्शनेर इतिहास" ग्रन्थे पाणिनि परवर्ति वैयाकरणानां तेषां कृतीनाञ्चोल्लेखो कृत: । यथोक्तम् -

व्याघ्रपाद द्वितीय कृत:	दशपादी वैयाघ्रपदव्याकरणम्
यशोभद्र "	जैनव्याकरणम्
आर्यवज्रस्वामी "	" "
भूतवलि: "	" "
इन्द्रगोमि(बौद्ध)कृत:	ऐन्द्र व्याकरणम्
वाग्भट्ट	" "
श्रीदत्त "	जैन "

चन्द्रकीर्तिः	कृत:	समन्तभद्र व्याकरणम्
प्रभाचन्द्र	"	जैन "
अमरसिंह:	"	बौद्ध व्याकरणम्
सिद्धनन्दि	"	जैन व्याकरणम्
भद्रेश्वरसूरि:	"	दीपक "
श्रुतपाल:	"	"
शिवस्वामी वा शिवयोगी	"	"
बुद्धिसागर:	"	बुद्धिसागर "
केशव	"	केशवी "
वाग्भट्टद्वितीय:	"	"
विनीतकीर्ति:	"	"
विद्यानन्द:		विद्यानन्द "
		यम "
		वरुण "
		सौम्य " इत्यादय:।[1]

1· सं० व्या० शा० का इति० ग्रन्थे (यु० मी० कृते) 17 व पृ० 608 तमे ।

2· व्याकरण दर्शनेर इति० ग्रन्थे पृ० 449 तमे उद्धृतम् ।

कातन्त्रकार: व्याकरणकार: [2000 वि०पू०]

व्याकरण वाङ्‌मये "कातन्त्र "व्याकरणं महत्त्वपूर्णं स्थानं लभते । अस्य प्रवक्तार: उमास्वामी कलापक: कौमारन्च यस्य नामान्तरमपि दृश्यते । श्रीसाधुचरित्रसिंहेन "कातन्त्रविभ्रमावचूर्णि" ग्रन्थस्यारम्भे "सारस्वतसूत्रयुक्त्या "इत्यभिहितम् । अनेन "सारस्वत मप्यपरं नाम ज्ञायते । अर्वाचीना: वैयाकरणा: "कलाप "शब्देन तं व्यवहरन्ति । तदुक्तं भट्टिकाव्ये जयमङ्‌गलायाम् - "कालापिकास्ततो न्यत्रापि पठन्ति---इति ।[2] व्याकरणे स्मिन् द्वौ भागौ प्रदर्शितौ -1•आख्यातान्तम् ,2• कृदन्तश्च ।

कातन्त्रव्याकरणे देवेभि:पितरस्तर्पयाम:,अर्वन्तौ अर्वन्त:, मघवन्तौ मघवन्त:" तथा दीधीङ्• वेवीङ्•तथा च इन्धी धातोनिष्पन्न प्रयोगाणां सिद्धिप्रदर्शित: ।कातन्त्र व्याकरणं विशुद्ध लौकिक संस्कृत भाषाया: व्याकरणं सो पि सूक्ष्मतम एव । महाभाष्यानुसारं "अर्वन्" मघवन् "प्रातिपदिकं तथा च दीधीङ्• वेवीङ्•तथा इन्धी धातवश्च छान्दस एव । परं महर्षि: पाणिनि त छान्दसं नस्वीकरोति। अत: स्पष्टैव प्रतीयते यत् "कातन्त्र "व्याकरणस्य रचना तदा संजाता यदा उपयुक्ता: शब्दा: लौकिक भाषायां प्रयुक्ता:। अत: स काल: महाभाष्यात् प्राचीन एव प्रतिभाति । यदि कातन्त्रस्य रचना महाभाष्यादनन्तरमेव मन्यते तदा तु महाभाष्ये यान् प्रातिपदिकान् धातुन्च छान्दसमुक्तं तस्योल्लेखं तं ग्रन्थे कदापि न भवेत् । अत: "कातन्त्रं "महाभाष्यात् प्राचीनम् ।

1• सं०व्या०शा०का इति०ग्रन्थे पृ० 61। तमे ।

2• भट्टिकाव्ये जयमङ्‌गलाटीकायां 3/9

चन्द्रगोमी : ईसं0 10 शि0पू ?[1]

पाणिनीय व्याकरणस्याधारगत्वा आचार्यप्रवरेण चन्द्र-गोमिना तु नवीनं "व्याकरणं"चान्द्र "व्याकरणं विरचितम् । अस्य निर्माणे पातञ्जल महाभाष्यस्य महती सहायता प्राप्ता: ।

चान्द्रव्याकरणस्यारम्भस्य श्लोकेन स: बौद्धमतावलम्बी प्रतिभाति । यथोक्तम् -

"सिद्धं प्रणम्य सर्वज्ञं सर्वीयं जगतो गुरुम्" इति।[2]

महान्नैतिहासिक: "कल्हण"लेखानुसारं- चन्द्राचार्य: कश्मीर राजा अभिमन्यो:समकालिक एव । तस्याज्ञया चन्द्राचार्य: नष्टप्राय महाभाष्यस्य पुन:प्रचारमपि कृतवान् तथा च चान्द्रव्याकरणस्य रचना पि कृतम् ।

वामनीय लिङ्गानुशासन वृत्तौ चान्द्रव्याकरणस्य वैशिष्ट्यं विद्यते - यथोक्तम् - "चन्द्रोपसंज्ञकं व्याकरणम्" इति वस्तुतस्तु चान्द्रव्याकरणे काचिदपि पारिभाषिक संज्ञाया:विधानं तस्य विशेषता चन्द्राचार्येण स्वोपज्ञवृत्तिग्रन्थस्यारम्भे स्वव्याकरणस्य वैशिष्ट्यं प्रदर्शितम् - यथा -

"लघुविस्पष्ट सम्पूर्ण मुच्यते शब्दलक्षणम्" इति ।[3]

---

1. सं0व्या0शा0 का इति0 ग्रन्थे पृ0 646 तमे ।
2. चान्द्रव्याकरणस्यारम्भे ।
3. स्वोपज्ञवृत्ति ग्रन्थस्यारम्भे ।

क्षपणक: [वि०पू०शताब्दयाम्][1]

व्याकरणस्य कतिपय ग्रन्थेषु किमपीदृशमुदाहरणं समुपलभ्यम् । येन क्षपणकस्य व्याकरण पवक्तृत्वं प्रस्फुटति यथोक्तम् -

"अत एव नावमात्मानं मन्यते इति विगृह्य परत्वादनेन ह्रस्वत्वं बाधित्वा आगमे सति नावं मन्यो क्षपणकव्याकरणे दर्शितम् ।[2] इति अन्यत्र तन्त्र पदीपे -

"क्षपणकव्याकरणे महान्यासे"[3] इति निर्देशेन स्पष्टं यत् क्षपणक नामक: को पि वैयाकरण:शब्दानुशासनं व्यरचयत् ।

आचार्य क्षपणकस्य नाम कविकुलगुरु:कालिदासेन उद्धृतम् । यथोक्तम् -

"धन्वन्तरि:क्षपणको मरसिंहशङ्कु,
वेतालभट्टघटखर्परकालिदासा:।
ख्यातो वराहमिहिरो नृपते: सभायां,
रत्नानि वै वररुचिनव विक्रमस्य ।।[4] इति

अनेन क्षपणकस्य काल: महाराजाधिराज विक्रमस्य समकालिकैव पतीयते । पाचीन वैयाकरणानामनुकरणं कृत्वा आचार्य क्षपणको पि शब्दानुशासनस्य धातुपाठगुणादिसूत्रादि अवश्यमेव विरचितम् । परन्तु तस्योल्लेख:स्पष्ट

1· सं०व्या०शा०का इति०ग्रा०पृ० 656 तो उद्धृतम् ।

2· भारतकौमुद्यां 2 भागे पृ० 893 तो उद्धृतम् ।

3· तन्त्रपदीपे धातुप्रदीपस्य भूमिकायां 4/1/155

4· ज्योतिर्विदाभरणे 20/10

रूपेण न प्राप्नोति । किन्तूणादिवृत्त्यादि ग्रन्थे क्षपणकस्य पाठं प्राप्नोति । यदुक्तम् -

"क्षपणकवृत्तौ अत्र "इति" शब्द आद्यर्थे व्याख्यात:"इति ।[1] अनेनोद्धरणेन विस्पष्टं यत् क्षपणकेनोणादि सूत्राणां मपि व्याख्या सम्पादिता ।

देवनन्दी (वि०सं० 500 वि०पू०)[2]

आचार्य देवनन्दी तस्यापर नाम "पूज्यपाद "इत्यनेन जैनेन्द्रसंज्ञक"एकं शब्दानुशासनं रचितम् । वस्तुतस्तु - जैनेन्द्र शब्दस्यार्थ जिनेन्द्रेण प्रोक्तम्" अर्थात् जिनेन्द्रद्वारा कथितम् । अत एव जैनेन्द्र व्याकरणं देवनन्दी प्रोक्तमिदं तु प्रामाणिकम् । अनेन स्पष्टं यदाचार्य देवनन्देरपर नाम पूज्यपाद: तस्यैवैक नाम जिनेन्द्रमित्यासीत् ।

जैनेन्द्र व्याकरणस्य सम्प्रति द्वौ संस्करणौ प्राप्तौ । एक: औदीच्य: अपर: दाक्षिणात्य: । औदीच्य संस्करणे नुमानत:त्रिसहस्र सूत्राणि सन्ति तथा च दाक्षिणात्य संस्करणे सप्तशतोत्तरत्रिसहस्र परिमितानि सूत्राणि प्राप्तानि । दाक्षिणात्य संस्करणे सूत्रेषु परिवर्धनं परिवर्तनञ्चोपलभ्यते । औदीच्य संस्करणस्थाभयनन्दी "कृत महावृत्त्यां बहूवर्ग वार्तिका नि प्राप्नुवन्ति,परन्तु दाक्षिणात्य संस्करणे ते वार्तिका:

---

1. उणादिवृत्ति ग्रन्थे पृ० 60 तो उद्धृतम् ।
2. सं०व्या०शा० का इति ग्रन्थे पृ० 657 तमे ।

सूत्रान्तर्गतैव दृश्यते । अत: विचारणीयो यं प्रश्न: यत् किदृशं जैनेन्द्र-व्याकरणं पूज्यपादे प्रोक्तमिति ।

वामन: [सं० 35 वा 600 त: पूर्व][1]

विश्रान्तविद्याधर" नाम व्याकरणस्य रचयिता "वामन:"इति। वर्धमानेन"गणरत्नमहोदधि"ग्रन्थे स्य व्याकरणस्यानेके सूत्राणि उक्तानि तथा च वामनं "सहृदयचक्रवर्ती"उपाधिना विभूषितम् । उक्तञ्च -

"सहृदयचक्रवर्तिना वामनेन तु हेम्न: इतिसूत्रेण ---।[2]इति आचार्य वामनस्य स्थितिर्विषये आचार्य वर्धमान:स्वग्रन्थे स्मरति ।

भोजमतमाश्रित्य वामनोक्त:कापिशब्दपाठ्यादिविशेषो नाखिल: ।[3]इत्यनुसारं वामन: सरस्वतीकण्ठाभरणादुत्तर-कालिक एव प्रतीयते । इति ।।

पाल्यकीर्ति: [सं०871-924वि०][3]

व्याकरण निकाये पाल्यकीर्ति:शाकटायन नामाभ्यां द्वौ व्याकरणकर्तारौ प्रसिद्धौस्त: । एको प्राचीन: आर्ष: द्वितीयो वार्चीन: जैनव्याकरणम् । अर्वाचीन जैन शाकटायन व्याकरणस्य कर्ता आचार्यपाल्य-

---

1· सं०व्या०शा०का इति० ग्रन्थे [यु०मी०] पृ० 670 तमे ।

2· गणरत्नमहोदधौ पृ० 168 तमे उद्धृतम् ।

3· गणरत्नमहोदधौ पृ० 182 तमे ।

कीर्तिरस्ति । अस्मिन् विषये वादिराजसूरिणा प्रोक्तं पार्श्वनाथचरिते -

कुतस्त्या तस्य सा शक्ति:पाल्यकीर्तेर्महौजस: ।
श्रीपदश्रवणं यस्य शाब्दिकान् कुरुते जनान् ।।इति[1]

आचार्यं कतिपय विद्वांस: श्वेताम्बर सम्प्रदायस्य स्वीकुर्वन्ति कतिचिदेव तु दिगम्बर सम्प्रदायस्य परन्तु पाल्यकीर्ति: यापनीय साम्प्रदायिक: एव । यथोक्तम्-

"यापनीययतिग्रामाग्रणी:"[2] इति । यापनीय सम्प्रदायस्य नष्टे जाते साम्प्रदायिका: तमेव स्वसम्प्रदायस्याचार्यं मन्यन्ते ।

शिवस्वामी (सं० ९१४-९४० वि०)[3]

आचार्य शिवस्वामी महाकविरूपेण संस्कृत साहित्ये प्रसिद्ध:। अनेन विरचितं "कप्फणाभ्युदय"महाकाव्योऽविरचितम् । वैयाकरण रूपेण शिवस्वामिनोल्लेख: क्षीरतरङ्गिण्यां, गणरत्नमहोदधौ, कातन्त्रधातुवृत्तौ तथा च माधवीया धातुवृत्त्यादिषु ग्रन्थेषु विलसति । उक्तञ्च -

"अत्र वृत्तिकारशिवस्वामिभ्यां भाष्योक्तमस्वस्य स्वत्वेन करणं प्रतिहिकशात् पाणिग्रहणविषय उपसंहृतम् "इति[4] । आचार्य वर्धमान:पतञ्जलि: कात्यायनाभ्यां सह शिवस्वामि:निर्दिशति । यथोक्तम् -

---

1. पार्श्वनाथ चरिते ।
2. मलयगिरि कृत नान्दीसूत्रस्य टीकायां पृ० 15 तमे ।
3. संख्याशाका इति० ग्रन्थे 68 तमे उद्धृतम् ।
4. धातुवृत्तौ पृ० 196 तमे ।

"मुख्यशब्दस्यादिवचनत्वात् शिवस्वामिपतञ्जलिकात्यायन प्रभृतयो लभ्यन्ते"इति ।[1] अपरञ्च -

"पर: पाणिनि .अपर:शिवस्वामीति"[2] वचनेन प्रतीयते यच्छिवस्वामी पाणिनि सदृशमेव वैयाकरण आसीदिति । आचार्य कल्हणेन राजतरङ्गिण्यां लिखति -

"मुक्ताकण: शिवस्वामी कविरानन्द वर्धन: ।
प्रथां रत्नाकरश्चागात् साम्राज्ये वन्तिवर्मण: "इति।[3]

अनेन शिवस्वामी कश्मीराधिपति अवन्तिवर्मण:राज्यकाले विद्यमानासीत् । अवन्तिवर्मण: राज्यकालं सं० 914-940 तमे आसीत् । अत: स एवकाल: आचार्य शिवस्वामेरपि ।

महाराज भोजदेव: ‖ सं० 1075-1110 वि० ‖[4]

महाराज भोजदेवेन "सरस्वतीकण्ठाभरण"नामकं बृहच्छब्दानुशासनं विरचितम् । तेन योगसूत्रवृत्त्यान्थारम्भे स्वयमेव स्मरति -

"शब्दानामनुशासने विदधता पातञ्जले कुर्वता ।
वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके ।
वाक्चेतोवपुषां मल:फणिभृतां भर्त्रेव येनोद्धृत-
स्तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वला: ।।इति[5]

---

1. धातुवृत्तौ पृ० 398 तमे ।
2. गणरत्नमहोदधौ पृ० 2
3. " " 29
4. राजतरङ्गिण्यां 5/34
5. सं०व्या०शा०का इति० ग्रन्थे ‖प्र०भा० पृ०684 तमे ।

अस्य श्लोकानुसारं सरस्वतीकण्ठाभरणं, योगसूत्रवृत्ति:, राजमृगाङ्कग्रन्थानां रचयिता एकैव विद्वान्नासीत् ।

भोजदेव नाम्नेन प्रसिद्ध: अनेके राजानो भवत् किन्तु सरस्वती कण्ठाभरणादीनां ग्रन्थानां रचयिता विदुषामाश्रयदाता परमारवंशीय: धाराधीश्वर एव प्रसिद्ध: । अयं महाराज: सिन्धुलस्य पुत्र:राजाजयसिंह स्य पिता चासीत् ।

संस्कृतभाषाया:पुनरूद्धारक:भोजदेव:

महाराज भोजदेव: स्वयं विद्वान् विचाररसिक:विदुषामाश्रय-दाता सीत् । तेन लुप्तप्राय संस्कृतभाषाया:पुनरुद्धारप्रयत्न: कृत: यथोक्तम् -

"चाण्डालो पि भवेद् विद्वान् य: स तिष्ठतु मे पुरि ।
विप्रो पि यो भवेन्मूर्ख: स पुरात् वहिरस्तु मे ।।इति।

महाराज भोजस्येदृशमौदार्य कारणेन तस्मिन् काले तन्तुवाय: तथा च काष्ठभारवाहको पि संस्कृतभाषाया: मर्मज्ञ: । अस्मिन्नेव प्रसङ्गे भोजप्रबन्धे उल्लेखो वर्तते यदेकस्मिन् काले धारानगर्यां को पि विद्वान्नायाति तस्य निवासार्थं तस्मिन्नगरे को पि रिक्तं गृहं नास्ति । एवं भृत्यै: एकं तन्तुवाय गृहं गत्वा उक्तम् , त्वं स्वगृहं रिक्तं कुरु गृहे स्मि-न्नेक: विद्वान् स्थास्यति । तन्तुवाय:राजानं प्राप्य चमत्कारपूर्णशब्दै: स्वदु:खनिवेदनं कृतम् । स एव दर्शनयोग्यम् -

---

1• योगसूत्रवृत्ति ग्रन्थस्यारम्भे -

2• भोजप्रबन्ध काव्ये ।

तन्तुवायेनोक्तम् -

काव्यं करोमि न हि चारुतरं करोमि,
यत्नात् करोमि यदि चारुतरं करोमि,
भूपालमौलिमणिमण्डितपादपीठ ?

हे साहसाङ्क कवयामि वयामि यामि।।[1] इत्यनेन भोजदेव राज्यकालस्य संस्कृत गौरवं स्फुटतरं प्रतिभाति ।

महाराज भोजदेवेन "सरस्वती कण्ठाभरण " नाम्नो द्वयो:ग्रन्थयो: निर्मितम् । एक: व्याकरण परक: द्वितीय अलङ्कारपरकश्च । सरस्वती कण्ठाभरण नाम्नि शब्दानुशासने अष्टाध्याया: सन्ति । तत् प्रत्येकं चतुर्षु पादेषु विभक्तम् । अस्य समस्त सूत्राणां संख्या 64।। परिमितं सन्ति ।

बुद्धिसागरसूरि: [सं० 108० वि०][2]

"बुद्धिसागर:" अपर नाम पञ्चग्रन्थी "व्याकरणस्य रचयिता आचार्य बुद्धिसागर सूरिरस्ति । आचार्य हेमचन्द्रेण लिङ्गानुशासन विवरणे बुद्धिसागर सूरिराचार्यस्योल्लेखोल्लेखित: । यथा -

"उदरम् जाठरव्याधिकुक्षानि । जठरे त्रिलिङ्गमिति बुद्धिसागर:" इति बुद्धिसागर:श्वेताम्बर सम्प्रदायस्याचार्यो सीत् । अयं चन्द्रकुलोत्पन्न: वर्धमान सूरे: शिष्य: । बुद्धिसागर व्याकरणस्यान्ते उक्तम् -

---

1• भोजप्रबन्धकाव्ये -

2• सं०व्या०शा०का इतिहास पृ० 692 तो उद्धृतम् ।

श्री विक्रमादित्यनरेन्द्रकालात् साशीतिके याति समासहस्रे ।
सश्रीकजावालिपुरे तदाद्यं दृब्धं मया सप्तसहस्त्रकल्पम् ॥इति

उक्तश्लोकेन बुद्धिसागर व्याकरणस्य परिमाणं सप्तसहस्र श्लोक परिमितम् । प्रतीयते नेनोक्त व्याकरणस्य खिलपाठं तस्य वृत्यादि सहितं वर्तते ।

भद्रेश्वर सूरि: [सं० 1200 विक्रमत:पूर्वं][2]

भद्रेश्वर सूरिराचार्येण "दीपक"व्याकरणस्य रचनाकृत ।इदं सम्प्रत्यनुपलब्धम् । गणरत्नमहोदधिकार: वर्धमान: स्वयमेव लिखति-

मेधाविन:प्रवर दीपककर्तृयुक्ता: इति ।[3] अस्या:व्याख्यायां स्वयमेव लिखति -

"दीपककर्ता भद्रेश्वरसूरि: । प्रवरश्चासौ दीपककर्ता च प्रवर-दीपककर्त्ता । प्राधान्यं चास्याधुनिकवैयाकरणापेक्षया"[4] अस्या:व्याख्यायां स्वयमेव लिखति -

दीपककर्ता भद्रेश्वरसूरि:। प्रवरश्चासौ दीपककर्ता च प्रवरदीपक कर्त्ता । प्राधान्यं चास्याधुनिकवैयाकरणापेक्षया "इत्युक्तोद्धरणै:विस्पष्टं यत् भद्रेश्वरेण को पि "शब्दानुशासनं"व्यरचयत् । तस्य दीपक"इति नाम इति ।

---

1. लिङ्गानुशासन विवरणे पृ० 100 ततो ।
2. चन्द्रसागरसूरि सम्पादित "सिद्धहैमशब्दानुशासन बृहद्वृत्तौ प्रस्तावनायां
3. सं०व्या०शा०का इति० ग्रन्थे पृ० 693
4. गणरत्नमहोदधौ पृ० ।

वर्धमान: [सं0 1150-1225] [1]

आचार्य वर्धमान: "गणरत्नमहोदधि"ग्रन्थं रचित्वा वैयाकरण निकाये प्रसिद्धिमवाप । संक्षिप्तसारस्य गोपीचन्द्र टीकायामुक्तम् -

"चन्द्रो नित्यां वृद्धिमाह । भागवृत्तिकारस्तु नित्यंवृद्ध्यभावम् । वो भ्रमेर्वा" इति वर्धमान:"[2] इत्युक्तया स्पष्टं यद् वर्धमानेन को पि शब्दानुशासनं"निर्मितं तस्यानुरूपं तस्यैव गणपाठं श्लोकं बद्ध्वा तस्या व्याख्या कृतम् ।

हेमचन्द्र सूरि: [सं0 1145-1229 वि] [3]

प्रसिद्ध जैनाचार्य हेमचन्द्रेण "सिद्धहैमशब्दानुशासनं"नामकमेदं साङ्गो-पाङ्गरूपेण वृहद् व्याकरणं व्याकृतम् । ऐतिहासिक विदुषां मतेन "हेमचन्द्रस्य" जन्मस्थानं "धुन्धुक" [धुन्धुका [अहमदाबाद जनपदे भूत् । हेमचन्द्रस्य गुरु: चन्द्रदेवसूरि:"अपर नाम "देवचन्द्रसूरि:"अयं श्वेताम्बर सम्प्रदायान्तर्गत वज्र-शाखायाराचार्यो सीदिति ।

हेमचन्द्र विरचित "हैमशब्दानुशासनं"संस्कृतप्राकृतयोर्भाषयोर्व्याकरणम् । पारम्भिकानां सप्ताध्यायानामष्टाविंशतिपादेषु संस्कृत भाषाया:व्याकरणम् । व्याकरणे स्मिन् 3566 सूत्राणि सन्ति । अष्टमाध्याये प्राकृत,शौरसेनी, मागधी पैशाची,चूलिका पैशाची अपभ्रंशानां शब्दानामनुशासनं विद्यते ।अस्मि-न्नध्याये 1119 सूत्रापि सन्ति । जैनप्रसिद्धयनुसारं हैमशब्दानुशासनस्य रचनायां

---

1. सं0व्या0शा0का इति ग्रन्थे पृ0 694 तमे ।
2. संक्षिप्तसारस्य गोपीचन्द्र कृत टीकायाम् सन्धि,प0सू06
3. सं0व्या0शा0का इति0 पृ0 695 तमे उद्धृतम् ।

एकस्मिन्नेव वर्षे भूदिति । यथोक्तम् -

"श्रीहेमचन्द्राचार्यैः श्रीसिद्धहेमाभिधानमभिनवं व्याकरणं सपाद-लक्षप्रमाणं संवत्सरेण रचयान्चक्रे"[1] इति ।

मलयगिरिः {सं० 1188-1250 वि०}[2]

जैनाचार्य मलयगिरिः "शब्दानुशासन" नामाभिहितेन साङ्गोपाङ्ग रूपेण व्याकरणं निर्मितम् । सम्भवतः आचार्य मलयगिरिः वैदिकमतानुयायी ब्राह्मणकुलोत्पन्नो सीत् । सः द्वादशवर्षावस्थायामेव सन्यासमगृह्णात् । सन्यास ग्रहणाच्छप्तवर्षानन्तरमेव मलयगिरिः जैनो भूत् ।

आचार्यमलयगिरिः स्वशब्दानुशासनं प्रक्रियाक्रमानुसारं सन्धि नाम-आख्यात-कृदन्त-तद्धितेषु पन्चसु भागेषुप्रविभाजितवान् ।

क्रमदीश्वरः {सं० 13०० वि०पू०}[3]

आचार्य क्रमदीश्वरेण "संक्षिप्तसार" व्याकरणस्य रचनाकृतम् । इदं सम्प्रति तस्य परिष्कर्ता जुमरनन्दे: "परिष्कारेण जौमर" नामेन प्रसिद्धम् । क्रमदीश्वरेण स्वीय व्याकरणोपरि "रसवती" नाम्नी वृत्तिमपि कृत ।

---

1. प्रबन्धचिन्तामणौ पृ० 60 तमे उद्धृतम् ।
2. सं०व्या०शा० का इति०ग्रन्थे पृ० 700 तमे उद्धृतम् ।
3. " " " 704 " "

सारस्वतव्याकरणकार: (सं० 1250 वि० पार्श्वे)[1]

सारस्वत-व्याकरणस्य विषये किंवदन्तीरियं यत् अनुभूति-स्वरूपाचार्यस्य मुखात् वृद्धावस्थया दन्तविहीनेन कश्चिद् विद्वत्सभायां "पुंसु" शब्दस्थाने "पुक्षु" अपशब्दम् नि:सृत: । अपशब्दप्रयोगे विद्वद्भिरुप हसितं अनुभूतिस्वरूपाचार्य उक्त अपशब्दस्य साधुत्वस्थापनाय गृहमागत्य सरस्वती देवी राधयाञ्चक्रे । देवी प्रसन्नो भूत्वा तस्मै 700 सप्तशतं सूत्राणि दत्तम् । तान्नाधारीकृत्य अनुभूतिस्वरूपाचार्येणायं व्याकरणं रचयामास । केषाञ्चिन्मतेन सरस्वत्या: प्रादुर्भूतत्वेनास्य नाम "सारस्वत" इति ।

यद्यपि सारस्वत व्याकरणस्यान्ते प्राय:" अनुभूतिस्वरूपाचार्यविरचिते "इदृशं पाठं प्राप्नोति तथापि तस्यैव प्रारम्भे-

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सरस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तरम् ।।[2] इत्युक्तया अनुभूतिस्वरूपाचार्य अस्य व्याकरणस्य कर्ता नास्ति ,अपितु तस्य प्रक्रियाया: सुबोधकर्ता इति ।

उक्तञ्च क्षेमेन्द्रेण-

"इति श्रीनरेन्द्राचार्य कृते सारस्वते क्षेमेन्द्र टिप्पणं समाप्तम्"[3] इति। अनेनोद्धरणेन प्रतीयते यद् सारस्वत सूत्राणां रचयिता "नरेन्द्राचार्य नामाभिधान: वैयाकरण आसीत् । वर्तमान सारस्वत व्याकरणस्य प्रथम वृत्तौ तद्धित-भाग पर्यन्तमस्मिन् व्याकरणे उक्त प्रसिद्ध्यनुसारं सप्तशत संख्यापि पूर्णनामवाप्नोत् । अतएव सप्तशत सूत्राणां रचयिता नरेन्द्राचार्य एव । सारस्वत

---

1. सं० व्या० शा० का० इति० ग्रन्थे पृ० 706 तमे उद्धृतम् ।
2. सारस्वत व्याकरणस्यारम्भे 3. सारस्वतप्रक्रियाया:अन्ते ।

व्याकरणस्य प्रथम वृत्तावन्ते नुभूतिस्वरूपाचार्यस्य नाम न प्राप्नोति परन्तु द्वितीय तृतीय वृत्तावन्ते -"इति । ।·अनुभूतिस्वरूपाचार्यविरचितानां समाप्त:"[1] पाठं प्राप्नोति ।

वस्तुतस्तु सारस्वत व्याकरणस्य सप्तशतसूत्रात्मकस्य प्रथमो-भाग:"नरेन्द्राचार्यविरचितं शेषभागमनुभूतिस्वरूपाचार्येण निर्मितम् । संस्कृत वाङ्·मये इदृशं विद्यते यदेकस्यैव ग्रन्थस्य द्वयो: कर्ता, किन्तु सम्पूर्ण ग्रन्थं तयोर्मध्ये केनापि नाम्नैव प्रसिद्धतां याति । यथा- स्कन्दमहेश्वराभ्यो-र्विरचितं निरुक्त टीका स्कन्द नाम्ना महाकवि बाण तस्य पुत्र संयुक्त विरचित "बाण" नाम्ना शर्ववर्मा वररुचि विरचितं कालन्त्रं "शर्व वर्मा" नाम्ना प्रसिद्धिं याति ।

बोपदेव: [सं० 1287-1350वि०][2]

आचार्य बोपदेव:"मुग्धबोध" नामकं लघुव्याकरणं व्याकृतम् । व्याकरणस्यास्य प्रचार वङ्·गदेशे एव जातम् । तथापि वैयाकरणनिकाये महती प्रतिष्ठामवाप ।

बोपदेवस्य पिता "केशव" इति पितामहश्च महादेव: । बोपदेवस्य गुरु: धनेश: इत्यपर नाम धनेश्वरेण महाभाष्यस्य "चिन्तामणि" नाम्नी व्याख्या व्याख्यापिता । बोपदेवेन "कविकल्पद्रुम" नाम्ना "धातुपाठस्य"संग्रहं कृतं तस्य च "कामधेनु" नाम्नी संक्षिप्ता व्याख्या कृत ।

1· सारस्वतव्याकरणस्य द्वितीयवृत्तावन्ते ।

2· सं०व्या०शा० का ०इति० ग्रन्थे पृ० 715 तो उद्धृतम् ।

व्याकरणशास्त्रं पन्चाङ्गं मन्यते, सूत्रपाठातिरिक्तं, धातुपाठं, गणपाठं, उणादिपाठं, लिङ्गानुशासनन्च नाम पन्चाङ्गपदेनाभिहितम् । वोपदेवः सूत्रपाठंधातुपाठमपि हि प्रवचनं कृतम् । शेषाङ्गानां पूर्ति विद्वद्भिः कृतम् ।

पद्मनाभदत्तः (सं0 1400 वि0)[1]

आचार्य पद्मनाभदत्तेन "सुपद्म"नामकमेकं संक्षिप्त व्याकरणं व्याकृतम् । अस्योणादि वृत्तौ "सुपद्मनाभ"इति नाम प्राप्नोति ।यथा-

"सुपद्मनाभेन सुपद्मसम्मतं, विधःसमग्रःसुगमं समस्यते"[2]इति ।

पद्मनाभस्य पिता "दामोदरदत्त" पितामहश्च "श्रीदत्त"इत्यासीत्। श्रीपद्मनाभेन स्वीयं परिभाषावृत्तौ निम्न ग्रंथानामुल्लेखो कृतम् ।

1• सुपद्मपञ्जिका 2• प्रयोगदीपिका 3•उणादिवृत्तिः
4• धातुकौमुदी 5• यङ्लुग्वृत्तिः 6• गोपालचरितम्
7• आनन्दलहरीटीका 8• छन्दोरत्नः 9• आचारचन्द्रिका
10• भूरिप्रयोग कोशः 11• परिभाषावृत्तिः[3]इति।

विनयसागर उपाध्याय (सं0 1650-1700)[4]

अंचलगच्छाधिराज कल्याणसागर सूरीश्वरस्य शिष्येणा विनयसागर उपाध्यायेन "स्वाश्रयदाता भुजनगरस्य स्वामी भारमल्लस्य पुत्रःभोजस्य तुष्ट्यर्थं भोज व्याकरण"नाम्नी एव संस्कृत भाषायाःव्याकरणं लिखितम् ।यथोक्तम् -

1• व्या0 शा0का इति0 द्रा0पृ0 720
2•सं0 " " " टिप्पणी ।
3• " " " 721 तत्रै।
4• " " " 721 "

श्रीधारमल्ल तनयो भुवि भोजराजो,
राज्यं प्रशस्ति रिपुवर्जितमिन्द्रवन्ध: ।
तस्याज्ञया विनयसागर पाठकेन
सत्प्रबन्धरचिता सुकृतीय वृत्ति: "।[1] इति ।

आचार्य पाणिनेरर्वाचीनोपर्युक्त वैयाकरणानामतिरिक्तं कतिपय अन्य वैयाकरणाअप्यभवन् । येन स्व-स्व व्याकरणं व्याकरोत् । तेषु अधोलिखितानां वैयाकरणानां व्याकरणानि सम्प्रत्युपलब्धानि- यथा -

1.	शुभचन्द्र:	चिन्तामणि व्याकरणम्
2.	भरतसेन:	द्रुतबोध: व्याकरणम्
3.	रामकिंकर:	आशुबोध व्याकरणम्
4.	रामेश्वर:	शुद्धाशुबोध व्याकरणम्
5.	शिवप्रसाद:	शीघ्रबोध व्याकरणम्
6.	काशीश्वर:	ज्ञानामृत व्याकरणम्
7.	रूपगोस्वामी	हरिनामामृत व्याकरणम्
8.	जीव गोस्वामी	हरिनामामृत व्याकरणम्
9.		चैतन्यामृत व्याकरणम्
10.	बालरामपन्चानन:	प्रबोधप्रकाश व्याकरणम्
11.	विज्जलभूपति:	प्रबोधचन्द्रिका व्याकरणम्
12.	विनयसुन्दर	भोज व्याकरणम्
13.	विनायक:	भानसिंह प्रक्रिया व्याकरणम्
14.	चिदरूपाश्रम:	दीप व्याकरणम्
15.	नारायणसुरन्द:	कारिकावली व्याकरणम्
16.	नरहरि:	बालबोधव्याकरणम् ।[2]

1. सं० व्या० शा० का इति० प्र० पृ० 722 तो ।
2. " " 723 तम उद्धृतम् ।

एवं हि मया महता सेन व्याकरणेतिहासं यथोपलब्धं सम्यगवगाह्य किन्चिद्दलं विद्भिरुपायनी कृतम् । तत्र सुधियस्तु जानन्त्येव यद् व्याकरणशास्त्रस्येतिहासान्वेषणं कियत कठिनमिति । तथापि यन्मया गवेषितं तद् विदुषां तोषाय भवेदिति कृत्वा तच्चरणेषु गवेषितमिदं तत्त्वं विनिवेदयन् नितान्तं गौरवं मन्ये इति शम् ।

व्याकरणेदर्शनपक्षस्याविर्भाव:

व्याकरणशास्त्रस्य तिस्रो धारा:सामान्यत:प्रवहमाना दृश्यन्ते, ताश्च शब्दसाधुत्व (प्रक्रिया) धारा, परिष्कारधारा, दर्शनधारा च । तत्रैकैकामादाय विविच्यते किञ्चित्-

1. शब्दसाधुत्व (प्रक्रिया) धारा:-

प्रकृति प्रत्यय विभाग द्वारा शब्दनिरुक्तिपूर्वकं शब्दसाधुत्वं निष्पते यस्यां धारायां सा व्याकरणशास्त्रस्य शब्दसाधुत्व (प्रक्रिया) धारा उच्यते । व्याक्रियन्ते विविच्यन्ते असाधुशब्देभ्यो साधुशब्दा: यत्र तद् व्याकरणमिति, व्याकरणशास्त्रस्येदमेव मुख्यं प्रयोजनम् । अमुमेव पक्षमादाय भगवता भाष्यकर्त्रा महाभाष्ये पस्पशाह्निके "रक्षोहागमलघ्वसन्देहा: प्रयोजनम्" इति व्याकरणाध्ययनस्य मुख्यप्रयोजनमुद्दिश्योक्तम् । ततश्च त्रयोदश सामान्य प्रयोजनानि उक्तानि ।

प्रक्रियाया: विवरणाचार्येण अवतारि तत्र भगवता भट्टोजिदीक्षितेन चतुर्दशसूत्रविवरणनिरूपणावसरे उक्तम् - यत्[1] "इति माहेश्वराणि सूत्राण्यणादि संज्ञार्थानि एषामन्त्या इत:" इति ।

महापण्डितेन महाकविना च श्रीमाघेनापि स्वकाव्ये अस्यैव व्याकरणशास्त्रीयमुख्यप्रयोजनस्य निरूपणमेभि: शब्दै: -

"अनुत्सूत्र पदन्यासा:सद्वृत्ति: सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ।।"[2] इति

---

1. वैया०सिद्धान्तकौमुदयाम् ।

2. शिशुपालवधमहाकाव्ये ।

साधुशब्दप्रयोगान्वाख्यानमेव मुख्य प्रयोजनमिति मत्वा नीतिवचनमिदं विलसति तथाहि -

> यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम् ।
> स्वजन: श्वजनो मा भूत् सकल:शकल:सकृच्छकृत् ।।

किन्च शक्तिग्राहकेषु मुख्यत्वं साधुशब्दान्वाख्यानद्वारा असाधुशब्दप्रयोगवर्जनमिति नैयायिकानामपीष्टम् । यथोक्तं न्यायसिद्धान्त मुक्तावल्याम् -

> "शक्तिग्रहं व्याकरणोपमान
> कोशाप्तवाक्याद्व्यवहारतश्च ।
> वाक्यस्य शेषाद् विवृतेर्वदन्ति,
> सान्निध्यत:सिद्धपदस्य वृद्धा:।।"[1] इति

तथा भर्तृहरिणाप्युक्तम् -

> अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
> तत्त्वावबोध: शब्दानां नास्ति व्याकरणादृते ।।[2] इति

वेदस्य षडङ्गेषु व्याकरणस्य प्रथमं मुख्यत्वेन स्थानं दृश्यते । यथोक्तम् - मुखं व्याकरणं स्मृतमि"ति ।मुखं मुख्यं सर्वाङ्गेषु उत्तमो-त्तमाङ्गत्वात् अशनादिना मुखेनाखिलंशरीरं परिपालयति पुष्णाति च । अतएव ज्ञानप्रधानानां ब्राह्मणानां मुख्यत्वं मुखरूपेण वेदस्यैव ।

---

1. न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे उक्तम् ।
2. वाक्यप्रदीपे ब्रह्मकाण्डे कारिका सं० ।3

पुरुषसूक्ते पि - "ब्राह्मणो स्य मुखमासीत्" इति ।[1]

2· परिष्कार-धारा:-

परिष्कारधारायां नवीनानाम् एकोनविंशति:विंशति: ख्रीष्टशताब्दयां वर्तमानानां नव्यन्यायशैलीमनुकुर्वतां वैयाकरणानां परम्परा समायाति । इमे हि नव्यवैयाकरणानैयायिकपदस्य विचारानुद्भाव्य तथा परिभाषयन्ति यथा सम्यक्तया व्युत्पत्ति: अर्थबोधश्च स्यात् । यथा "नीलोघट:"इत्यस्य शाब्दबोधे "अभेदसम्बन्धावच्छिन्न नीलत्वावच्छिन्न नीलनिष्ठप्रकारता निरूपितघटनिष्ठ-प्रकारताको शाब्दबोध:इति । नवीनाश्च वैयाकरणा:नव्यनैयायिकानां पृथमनुसृत्य अभीष्टार्थं निष्कृष्टार्थञ्च परिष्कारेण प्रकल्प्य यथेष्टसिद्धि: स्यात्तथा साधयन्ति । यथा- अर्थवदिति सूत्रस्यार्थवत्त्वस्यनिर्धारणे प्राचीन वैय्याकरणा:" वृत्तिमत्त्वमर्थवत्त्वमिति"[2] प्रतिपादयन्ति । नवीना: नागोजिभट्टाश्चार्थवत्त्व प्रातिपदिकं "एतत्संज्ञाफलभूत-विभक्तीतरसमभिव्याहारानपेक्षयालोके र्थबोधविषयकत्वमर्थवत्त्वमिति"[3] व्यवस्थापयन्ति । नूनं ह्येषाशैली नव्यन्यायपरिष्कारशैलीमनुसरेति।

एवं हि नियम्यनियामकभावसामुद्दिश्य "कृत्तद्धित-समासाश्च"[4] इति सूत्रे नियामकशास्त्रत्वेन सूत्रस्य चारितार्थे व्यापकत्वञ्च संसाधयन्ति नव्या:। एवमेवैते व्युत्पत्तिमूलकग्रन्था:अपि संलक्ष्यन्ते । यथा व्युत्पत्तिवादे-शाब्दबोध चैकपदार्थे परपदार्थस्य संसर्ग:संसर्गमर्यादया

1· ऋग्वेदे पुरुषसूक्ते मन्त्र सं० 10

2· प्रौढ़मनोरमायां भैरवीटीकायां पृ०सं०4

3· लघुशब्देन्दुशेखरे पृ०सं० 110

4· अष्टाध्याय्याम् ।

भासते"।[1] इत्यादय: । एवमेव - "नीलो घट:" इत्यस्य शाब्दबोधेजया-टीकायां परिष्कारबुद्ध्या उच्यते "स्वत्वसम्बन्धावच्छिन्ननीलत्वा-वच्छिन्न नीलनिष्ठप्रकारतानिरूपित घटत्वावच्छिन्न घटनिष्ठ विशेष्यताक शाब्दबोध: -[2] इति शाब्दबोधाय परिष्कारमाश्रयन्ति । नव्या: । "वेदा :प्रमाणम्"।इत्यत्रापि तथैव दृश्यते ।

शाब्दबोधे गृहीतवृत्तिपदहेतुत्वनिरूपणावसरे नागेशभट्टो-क्ति- "नहि गुडवत्युक्ते मधुरत्वं इदृश: सम्बन्ध:वैयाकरणानाभिष्ट इतिविषयमवलम्ब्य नागेशभट्टा:" तद्भिन्नत्वे सति तद्भेदेन प्रतीय-मानत्वम्"[3] इत्यादियो भावा:- परिष्कारप्रक्रमादायैव प्रभवन्तीति दिङ्•मात्रमहनिर्देशं विधाय विरम्यते ।

3• <u>दर्शनधारा</u>-

यद्यपि साधुशब्दान्वाख्यानद्वारा वेद रक्षणं साधुशब्दप्रयोगश्च व्याकरणाध्ययनस्य मुख्यं प्रयोजनमुक्तम् । तथा परा,अपरा इति द्वयो-र्विद्योर्मध्ये परैव ज्यायसीति आचार्यै: सिद्धान्तितम् । अत: परां वाचं महाशक्तिमाश्रित्य या खलु विचारसरणि प्रक्रान्ता नूनं सैव दर्शनत्व-विषयमापन्ना सती महतो व्याकरणशास्त्रस्य दर्शनांशे प्रतिष्ठाया: कारणं समजनि ।किन्च परिणामवादविवर्तवादयो:स्वरूपमाश्रित्य शब्द-स्वरूपनिरूपणपरा विचारा अपि तद् दृष्ट्यैव महत्वमावहन्ति । शब्दार्थयोरविनाभाव सम्बन्ध: इति वैयाकरण सुधियां राद्धान्त इति। शब्दार्थयो: विवेकमपि दर्शनपक्षस्यैव पुष्टिं साधयन्ति । एवमेव शक्तीनां

1• व्युत्पत्तिवादे आरम्भे पृ०सं०-।

2• " जयाटीकायाम् ।

3• वैया०ल०म०स्फोट निरू०पृ०।०

4• वैया०ल०म०शक्ति निरू०पृ०34

शक्त्याश्रयाणां, स्फोटस्य, बौद्धपदार्थस्य , धात्वर्थस्य, लिङ्न्तार्थस्या-दयो विषया:सामञ्जस्येन दर्शनकोटावेवापतन्ति । तस्माद् व्याकरण-शास्त्रस्य दर्शनपक्षो तीव व्यापक:समृद्ध: परिपूर्णश्च वर्तास्ति ।

व्याकरणशब्दार्थ: -

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्य:साधुशब्द: अनेनेति व्याकरणम् । साधुरसाधु, संस्कृतासंस्कृतशब्दानां ज्ञानं येन शास्त्रेण भवति तदेव व्याकरणम् । यथा- गावी, गोणी, गोता, गोपोतलिका इत्या-दिषु अपभ्रंश शब्देषु "गौ:" इति साधुशब्दस्य पृथगेव निर्णयं क्रियते । सम्बन्धस्य ग्राहकं व्याकरणम् । उक्तञ्च न्यायसिद्धान्तमुक्तावल्याम्-
शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च । वाक्येषु शेषाद् विवृतेर्वदन्ति सान्निध्यत: सिद्धपदस्य वृद्धा:।[1]

व्याक्रियन्ते शाब्दबोधविषयीक्रियन्तेशब्दा: अनेनेति व्याकरणम् । शाब्दबोधे पदपदार्थशक्तीनां ज्ञानं कारणम् ।तस्यैव शक्ते: ग्राहकं व्याकरणम् । किन्तु शब्दप्रत्यक्षभूत मर्थमपिप्रत्यक्षं, परन्तु तस्य बोधो न भवति, यत: संयोजक सम्बन्धस्या [शक्ते:] भाव । अनेन अनुमीयते यद् शब्दार्थयो:संयोजक: कापि शक्तिरस्ति यस्या ग्राहकं व्याकरणम् । एषु शब्दो वाचक:, अर्थोवाच्य: द्वयोर्मध्ये वाच्य-वाचक भाव सम्बन्धो दृश्यते ।

अथवा-व्याक्रियन्ते-शास्त्रस्य फलवती क्रियाया:स्मारयन् शब्दसंस्कारित -ज्ञाने धर्म:पुण्यञ्च । इदं बोधकं व्याकरणम् । "एक: शब्द:सम्यग् ज्ञात:- इत्यादिना महाभाष्यानुसारं एकैव शब्दस्य, शब्द

----

1. न्यायसिद्धान्तमुक्तावल्याम् शब्दखण्डे -

अर्थ, सम्बन्ध, फलानि च निर्णीयतस्य तस्य प्रयोक्ता इहलोके परलोके च धर्मार्थकाममोक्षाख्य पुरुषार्थचतुष्टयं प्राप्नोति । वयमपि सन्धि, समास तद्धित, कृदन्त, सनाद्यन्त स्त्रीप्रत्ययादिषु शक्तेरर्थं ज्ञात्वा सुष्ठुप्रयोगैः पुण्यं प्राप्नुमः । व्याकरणस्य केनापि प्रकरणस्य केनापि शब्दस्य स्फोटार्थज्ञानपूर्वक अध्ययनाध्यापनं भवेत् । अन्यथा "विद्या भारः क्रियां विना" शिक्षा नावश्यकं भवेत् । महाभाष्ये लक्ष्यलक्षणयोरेकीकृत्य व्याकरणं कथितम् । किन्तु अर्थ विशिष्टः शब्दनिष्ठः पुण्यजनकतावच्छेदको जातिः साधुत्वमिति । अनुशिष्यन्ते साधुत्वेन ज्ञायन्ते शब्दाः अनेनेति व्याकरणम् ।

"आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासित व्यश्च इति श्रुत्या प्रत्यगात्मसाक्षात्कारस्यैव मोक्षहेतुत्वं समर्थितं, तादृशसाक्षात्कारसाधकानि वेदान्तादीनि शास्त्राण्येव दर्शनशास्त्रव्यपदेश्यानि भवितुमर्हन्ति । न तु पदसाधुत्वासाधुत्वसाधनेन शब्दसाक्षात्कारसाधक व्याकरणशास्त्रं दर्शनव्यपदेश्यं भवेत् । येषु-येषु शास्त्रपदवाच्येषु -प्राधान्येनात्मविषयाः प्रतिपादिताः सन्ति । ततः प्रसङ्गोपात्तानां लौकिकानामपि विषयाणां विश्लेषणस्य तात्पर्यं यदि अध्यात्मविषय एव पर्यवस्यति, तदा तान्येव दर्शनशास्त्रपदव्यवहार्यतां समुपयान्तीति । नैवम्भूतं व्याकरणशास्त्रम् । केवल मत्र पदसाधुत्वासाधुत्वाख्यानमेव विजयत इति कथमस्य दर्शनशास्त्रत्वमिति शंकीति3। कदाचित् विदुषो पि चेतसि मनाक् स्थानं लभेत् ।

"सदेव सोम्येदमग्रब्रह्म आसीदेकमेवाद्वितीयम्" ब्रह्मैवेदं सर्वम्" इत्यादिभिः श्रुतिभिर्जगत्कारणस्य सत्यत्वमेकत्वं ब्रह्मत्वमात्यन्त्वन्व यथा प्रतिपाद्यते । तथा "वागेवार्थं पश्यति वागेवार्थं ब्रवीति वागेवार्थं निहितं सन्तनोति । वाचेव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते" "ओमित्येकाक्षरमिदं सर्वम्""ओमिति ब्रह्म" इत्यादिश्रुतिभिः शब्दरूपतायाः प्रतिपाद्यत इति शब्दब्रह्मैव जगत् कारणम् ।

शब्दतत्त्वाख्यं ब्रह्म प्रथमं स्वलिङ्गं त्रिमात्रोङ्कारं तत्रो क्षरसमाम्नायं ततश्चतुरो वेदान् विरचय्य सर्वज्जगत् व्यरीरचत् । इदमेव शब्दतत्त्वाख्यं ब्रह्म च सूक्ष्मप्रणवरूपं परब्रह्मपदेन, त्रिमात्रोङ्कार च अपरब्रह्मपदेन च व्यपदिशन्ति पुराविदः । तथा च श्रुतिः- "एतद् वै सत्यकाम परं चापरं च ब्रह्मयदोङ्कारः । तस्माद् विद्वानेतेनैवाचतनेनैकतरमन्वेति"।[1] एतेनायतनेन परब्रह्मप्राप्तिसाधनेन ओङ्कारेण एकतं परब्रह्मपदमनुगच्छति, नेदिष्ठं ह्यालम्बनं परब्रह्मणो यदोङ्कार इति तत्तात्पर्यम् । अत एव च "द्वे ब्रह्मणीवेदितव्ये शब्दब्रह्म परं च तत्""शब्दब्रह्मणिनिष्णाते परं ब्रह्माधिगच्छति"इति स्मृतिः ।

---

1. प्रश्नोपनिषदि 5 प० 3 मं०

शाब्दिकैस्तु परं ब्रह्मैव शब्दब्रह्मपदेनोच्यते । शब्दब्रह्मप्राप्त्युपायत्वञ्च-

"तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञो स ब्रह्मामृतमश्नुते ।।" इति

कारिकया शब्दसंस्कारद्वारा व्याकरणस्याख्यायते । शब्दसंस्कारस्य च सिद्धित्वं सिद्ध्युपायत्वात् । व्यवस्थितसाधुभावेन रूपेण शब्दे साधुशब्दप्रयोगज्ञानपूर्वकं तस्य शब्दब्रह्मणः प्रवृत्तितत्त्वं व्यवहारनिमित्तरूपं समस्तशब्दार्थकारणभूतं पश्यन्त्याख्यं यो जानाति स तद् द्वारा अविवृत्तं ब्रह्मप्राप्नोति । एवञ्च व्याकरणस्य दर्शनत्वे न काचनापि विप्रतिपत्तिः । व्याकरणदर्शनभूमिकाकाराः पण्डितश्रीरामाज्ञापाण्डेयास्तु अत्र हि व्याकरणदर्शनमित्यस्य कोऽर्थः ? एवं प्रश्ने तद्घटकदर्शनशब्दस्यार्थः प्रथमं निर्णीयते । अयं हि दर्शनशब्दो भावसाधनः करणसाधनश्च । तत्र भावसाधनत्वे दृष्टिरित्यर्थस्तस्यावबुध्यते । करणसाधनत्वे तु दृश्यते प्रत्यक्षीक्रियते न तु अनुमीयते नापि शब्दजन्यबोधविषयीक्रियते अनेनेति व्युत्पत्त्या दर्शनसाधनमित्यर्थः । एवं सति वैदिकास्त्रयोपायाः दृश्यते ते सर्वेऽपि उपाया दर्शनपदव्यपदिष्टा-भवितुमर्हन्ति । भावसाधनत्वे तु-

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येय एते दर्शन हेतवः" ।।[2] इत्युक्त्या

श्रुतिवाक्यश्रवणमन्तरा यत् किञ्चिद् ग्रथ्यमानं वस्तुदर्शनमेव नहि भवितुमर्हति । कथंकारं दर्शनव्यपदिष्टानां दर्शनपदव्यवहार्यतामिति चेत् ?

---

1. वाक्यपदीये ब्रह्मकाण्ड श्लोक सं० 132
2. सांख्य प्र०भा०अ० । सू० ।

उच्यते - सर्वेषामपि दर्शनानामुद्भावकानां चेतसि सैव भगवती श्रुतिः साक्षात् परम्परया वा स्वीयं कार्यं विदधती वर्तत एव । तामन्तरा तस्यचित्त:- प्रकाशस्य स्वमुख्याप्रमाणत्वात् । एवञ्च दर्शनहेतुनां दर्शकं प्रतिपादकं वा शास्त्रं लक्षणया दर्शनपदभाग् भवेदेव निमुक्तकरणसा- धनत्वे । तथा च व्याकरणमेव दर्शनमिति कर्मधारये सर्वं व्याकरणं दर्शनमेव भविष्यति । भावसाधनत्वे षष्ठीसमासे व्याकरणस्य दर्शनमित्यर्थः । तत्रापि व्याकरण पदेन व्याख्यानोपसंख्यानादिविशिष्टं शास्त्रं व्या- करणपदेन ग्राह्यम् । तस्य दर्शनमित्यत्र कर्तरि षष्ठ्या समासे - शास्त्रेण यद् -यद् दृश्यते तत् सर्वमपि दर्शनमेव भवेत् । अधिकरणस्य सम्बन्धत्वेन विवक्षया षष्ठ्यन्तेन समासे तु - व्याकरणशास्त्रे यत्परायणः तत्सम्ब- न्धिनो वा - दर्शनस्य साधकं तदेव दर्शनं स्यात् । एवं सति उक्तासु व्युत्पत्तिषु यः को पि व्याकरणसम्बन्धीविषयः स सर्वो पि दर्शन- पदव्यपदेश्यः सिद्ध्यति । अस्यां स्थितौ पञ्चानां वृत्तीनामन्येषां वा प्रकृतिप्रत्ययसन्धिसमासकारकादीनां सर्वेषां दर्शनत्वे न काचिद् बाधा । किन्च येन केनापि वैयाकरणेन दृष्टो व्याकरणे पदार्थो व्याकरणदर्शनव्यपदेश्यो भवेत् । तथा चेदं शास्त्रं व्याकरणदर्शनं कथयितुं शक्यत इति ।

दृश्यते सम्यक्साक्षात्क्रियते नेनेति दर्शनम् । दर्शनशब्दस्य इदृशमर्थम् । अस्मिन्नेवार्थे दर्शनार्थकदृश् धातोः करणार्थे ल्युट् प्रत्यये णिचि णिलोपे च दर्शनमित्यभिधस्य शब्दस्य शब्दसाधुत्वं सिद्ध्यति । अनया व्युत्पत्त्या इदमर्थं ज्ञातं यत् येन "दर्शन" शास्त्रेणावलोकनं भवति स एव दर्शनशास्त्रम् । किन्च वस्तूनां संसारस्य वा वलोकनं नेत्राभ्यां

नेत्रेण वा भवति तदेव दर्शनम् । किन्तु अस्मिन्नर्थे न दर्शनशास्त्रस्याध्यात्मिकी महिमा नावलोक्यते । अत इदमर्थं स्थूलं प्रोक्तम् । जगति एतादृशमपि पदार्थाःसन्ति येषां ज्ञानं नेत्रेण नावभाति तस्य ज्ञानं हृदयान्तर्वर्तिनि ज्ञानरूपज्योतिषा एव भवति । अतएव दर्शनशब्दस्य शाब्दिकार्थस्तु तावत् येन शास्त्रेण परात्मा ज्ञानमाहोस्विद् ब्रह्मणो ज्ञानं जायते तदेव दर्शनशास्त्रम् । अस्माकं देशे दर्शनशास्त्रस्याधिकं महत्त्वम् । दर्शनशास्त्रस्य अस्माकं जीवने परलोकदृष्ट्या नूनमधिकं महत्त्वम् । पाश्चात्यदेशेषु विद्वांसः दर्शनं विद्यायाःअनुरागमात्रमेव स्वीकुर्वन्ति । तथा च तस्योपयोगस्तं मत्वा विद्वान्सःमनोविनोदरूपेण स्वीकुर्वन्ति । परन्तु भारतवर्षे तस्योपयोगःनितान्तं व्यावहारिकम् । आध्यात्मिक आधिभौतिक,आधिदैविकादितापत्रयोन्मूलनार्थं दर्शनशास्त्रम् । तथोक्तम् -

"दुःखत्रयाभिघाताद् जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततो भावात्।।"[1] इति

"शब्दैव ब्रह्म" इति । ब्रह्मसान्निध्यं व्याकरणस्य श्रवण,मनन,निदिध्यासनैःसम्भवम् । साधारणतःसमस्तं व्याकरणशास्त्रं वेदाङ्गम् । पाणिनीयव्याकरणस्य दर्शनत्वे कारणं वर्णसमाम्नायस्य चतुर्दशैव सूत्राणि सन्ति । "अइउण्" इत्यादि सूत्रैव पाणिनि शास्त्रे प्रविश्य व्याकरणस्य विराट् रूपमवधारयत् । तथा व्याकरणदर्शनरूपेणाभिहितम् । व्याकरणस्य व्युत्पत्तौ शब्दाःपरा,पश्यन्ती,मध्यमा,वैखरीति चतुर्षु रूपेषु विद्यमाना या वाणी एव अवगम्यते । निगमागमेषु सर्वत्रैव वाक्स्वरूपं व्याप्तम् ।

---

1. सांख्यकारिकायां का० सं० ।

चतुर्षु वाणीषु परा प्रथमा वाक् । या प्रकृति प्रत्ययव्युत्पन्नाव्युत्पन्नादि भेदेषु शून्या । सा व्याकरणशास्त्रस्य विषयं नास्ति । किन्तु सा ब्रह्मस्वरूपा । पश्यन्ती, मध्यमा, वैखरीति तिस्रो वाच: व्याकरणशास्त्रस्य विषयं भवन्ति । परा वाक् भेदशून्या शुद्धनिराकारा ब्रह्मण एव वेदे प्रसिद्धा । पश्यन्ती, मध्यमा च सगुण ब्रह्मरूपं योगिभ्यो मानवेभ्यो वानुभवन्ति ।

परावाक् व्याकृताव्याकृत भेदेन द्विधा । यथा "एको हं बहुस्याम्" एकैव परावाक् यदा बहुत्वं वान्छति तदा सा एव "पश्यन्ती" रूपात्मिका भवति । सर्वेषां मूलंकारणं परावागेवास्ति । अत एव शब्दब्रह्मण: ज्ञाने कुशल वैयाकरणा: परावाचं समुपासन्ते । वागेव सम्पूर्ण जगत् या आकाशवाणी रूपा विश्वं परित: व्याप्ता सा एव परा, पश्यन्ती, मध्यमा वैखरी रूपात्मिका ब्रह्म। महाभारतस्य शान्तिपर्वण्युल्लिखितम् -

> अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुव: ।
> आदौ वेदमयी दिव्या यत: सर्वा: प्रवृत्तय: ।। "[1] इति

व्युत्पत्तिरूप सृष्टे: सजक: धर्मं व्याकरणम् । यथा- ब्रह्मण: मानवीय सृष्टौ प्रथमौ मातापितरावस्ति, तेनप्रकारेण व्याकरणशास्त्रे आदिभूतं प्रकृति पुंभ्याम् समवेव, प्रकृति: माता प्रत्यय: पिताचास्ति ।

---

1. महाभारते शान्तिपर्वणि ।

परन्तु सम्बन्धेन विनार्थबोधं न भवति । प्रत्ययो प्येकाकी न सामर्थ्य-शाली न च प्रकृतिरपि एकाकी सामर्थ्यशालिनी अर्थबोधम्प्रति। अत एव महाभाष्यकारेणाप्युक्तम् --" न केवला प्रकृति:प्रयोक्तव्या नापि केवल प्रत्यय:" इति । प्रकृति प्रत्ययोरुद्गमस्थानं"पश्यन्ती"वागेवास्ति। य: कर्मकर्तायाश्च दिव्यदृष्ट्या ज्ञानं योगीनां सामर्थ्यवाक्यम् । पश्यन्ती,मध्यमा च प्रवक्तृभि: प्रस्फुटति वैखरी तु श्रोतृभि: । सर्वे प्रकृतिप्रत्यया: पश्यन्त्या एव सम्भूतम् । व्याकरणशास्त्रेण संस्कारितं तथा च शुद्धान्त:करणे व्यावहारिकी प्रभा पश्यन्त्या एव प्राप्नोति ।

सांख्यदर्शने पि सत्त्व,रज,तम रूपा प्रकृति:प्रधानम् ।प्रत्यय-पदेन ज्ञानरूपपुरुषं बोधयति । अत: सृष्टि:प्रकृति-प्रत्ययौ च पश्यन्त्या एव आविर्भूय बुद्धिमध्यमावाग् रूपे स्वसम्बद्ध अर्थबोधं भवति । पश्चात् वायु:ब्रह्मरन्ध्रे उद्वेलितं कण्ठताल्वादिस्थानेषु संयुज्य वर्ण,पद,वाक्येषु श्रोतारं सुलभतया वैखरी रूपात्मक शब्द:जगति आविर्भवति । अनेन प्रकारेण प्रकृतिप्रत्ययो: परम्परया शब्दात्मक अर्थात्मकन्च जगत:ज्ञानाय "पश्यन्ती" वाग् कामधेनो समम् । तेषु प्रकृति-परम्परा,प्रत्यय-परम्परा अर्थपरम्परा पि अनुस्यूता । शब्दार्थ सम्बन्धो नित्यम्"सिद्धे शब्दार्थ सम्बन्धे इति[2] । प्रकृति:प्रत्ययं वा द्वयोर्मध्ये एकेनाप्यभावेन अर्थस्या-भिव्यक्ति न सम्भवति । वैकरणे अतिसन्निहितउपांशुप्रयोग रूप मनसि चिन्तनस्य विषयं,ब्रह्मस्वरूपं मध्यमावाचं नित्यं स्फोटरूप ब्रह्म इति कथयन्ति । स: मानवबोधगम्यम् । वैखरीवाग् ब्रह्मणा समं व्याव-हारिकमेवानित्यं प्राचीनं चास्ति ।

---

1. महाभाष्ये ।

2. " पस्पशान्हिके ।

व्याकरणे दर्शनत्वमागमिकमेव

"तुरीयं वाचो मनुष्या वदन्ति" इति निगमवचनेन परा-पश्यन्त्याद्यपेक्षया वैखर्या एव व्यवहार भूमानुपयोगस्तदाधारभूतो वर्णसमाम्नायो भगवान् विश्वात्मा परमेश्वर:परमेकारुणिकया प्रीत्या पाणिनये समुपादिदेश ढक्कानिनादेन नवपञ्चवारेण । तदेवानुसृत्य महावैयाकरणेन भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां तच्छिष्येण वरदराजाचार्येण लघुसिद्धान्त, मध्यसिद्धान्त कौमुद्यान्च, इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि"[1] इत्युक्तम् । मनोरमोमार्धदेहं लघुशब्देन्दुशेखरमिति वचनात् भट्टोजिदीक्षितविरचित मनोरमा एवोमा स्वरूपभूता लघुशब्देन्दुशेखर: एव शिवस्वरूपभूत: अत: कौमुदीगतविचारप्रकर्षमनोरमायां तद्गतविचारप्रकर्षन्चशेखरे इति परम्परयोत्तरोत्तरं प्रामाण्यात् । माहेश्वरसूत्रगतवर्णसमाम्नाय वैशिष्ट्य विवेचनम् लघुशब्देन्दुशेखरे प्रभूतं वर्तत इति स्वीकत्या एव भट्टनागेश: अङ्गीकरोति । किन्च लघुशब्देन्दुशेखरे इति स्वग्रन्थसंज्ञाविधानेन शब्दस्वरूपस्य शक्त्यभिन्न शिवस्यैवार्थजातस्य" तनुते र्थप्रकाशमिति"[3] ग्रन्थादौ मङ्गलमाचरणात् ग्रन्थे शब्दाडम्बरापेक्षया र्थस्यैव प्रधान्याच्छब्दार्थयो:शक्तिशिवरूपयोरर्थस्य शिवरूपता सङ्गच्छते अत: वैयाकरणस्य शब्दराशे:शिवत्वस्वीकारप्रकार: दर्शनागम संस्कारस्यैव माहात्म्यं द्योतयति ।

---

1. वै०सि० कौमुद्यां संज्ञाप्रकरणे ।
2. लघु०शेखरे आदौ मङ्गलाचरणे श्लोक सं०3
3. " " " "

"ज्ञानमिच्छेन्महेश्वरादि"त्यभियुक्तोक्तेन माहेश्वराणि अणादिसंज्ञार्थानि "चतुर्दशसूत्राणि व्याकरणोपजीव्यानि" "रक्षोहागमलघ्वसन्देहाः"[1] इत्यर्थानि "ते सुराः" इत्यारभ्य "सुदेवो असि वरुण"[2] इत्यन्तानि च समुल्लसन्ति इति महाभाष्यात् तथा नागेशभट्टस्य "कृतभूरिपरिश्रमात्" लघुशब्देन्दुशेखर ग्रन्थाच्चावगम्यते । अतः महेश्वर सकाशदागमनाद् व्याकरणशास्त्रस्यापि "व्याकरणागम" नामागमशास्त्रानुवन्धित्वं साधयति । अतः वैयाकरणाः स्वरचनाव्यागमसिद्धान्तान्नैवोपजीव्यत्वेनाङ्गीचक्रुः । अतः ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्यायुक्तम्-

"प्रतिभानलक्षणा इयं शब्दभावनाख्य आगम एवेति "।[3]

स्वच्छन्दतन्त्रे च -

अदृष्टविग्रहात् शान्तािच्छवात्परमकारणात् ।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ।।
अमूर्ताद् गगनाद्यद्वन्निर्घातो जायते महान् ।
शान्तात्संविन्मयात् च तद्वच्छब्दाख्यं शास्त्रम् ।।[4]

एवं हि स्वच्छन्दतन्त्रस्य चतुर्थ पटले -

"आगमो ज्ञानमित्युक्तमनन्ताःशास्त्रकोटयःइति व्याख्यायां -आसमन्ताद् गमयति अभेदेन विमृशति पारमेशं स्वरूपमिति कृत्वा परशक्तिरेवागमःतत्प्रतिशब्दसन्दर्भःतदुपायत्वात् शास्त्रस्य"[5] इत्युक्तम् ।

1· महाभाष्ये पस्पशान्हिके । अ । पादे

2· " " "

3· ईश्वरप्रत्यभिज्ञाविवृत्तौ पृ०सं ९३

4· स्वच्छन्दतन्त्रे

5· स्वच्छन्दोद्योते ४ पटले पृ० २/४

सिद्धान्तकौमुदी लघुशब्देन्दुशेखरादौ च चतुर्दशसूत्राणां माहेश्वरत्वस्वीकृति: -

लघुशब्देन्दुशेखरे पि ननु चतुर्दशसूत्राणांमक्षरसमाम्नाय इति व्यवहारानुपपत्तिराम्नायसमाम्नाय इति शब्दयोर्वेदे एव प्रसिद्धैरित्यत आह - माहेश्वराणीति -महेश्वरादागतानीत्यर्थ: । महेश्वरप्रसादलब्धानीति फलितम् । एवन्चैवानुपूर्विका श्रुतिरेवैषा । तत्प्रसादात्पाणिनिना लब्धा । श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम् ।अत्र प्रमाणम् -

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मिन् पाणिनये नम:।।[1] इति

शिक्षा वचनम् । "लण सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति -व्याख्यानत इति " इत्यादावाचार्यपदेन महेश्वर "इति ।

वैयाकरणानां चतुर्दशमहेश्वरसूत्रविषये यं सिद्धान्त: यत् "आनुपूर्विका श्रुतिरेवैषा "इति स्वच्छन्दतन्त्रेणापि पुष्णाति । तथा-

मन्त्राख्यं तु महाज्ञानमीशानान्तुविर्निगतम् ।[2] इति

सदाशिवास्त्यसूर्यस्योर्द्धवंमुखादहर्निशं ज्ञानं निर्गच्छति। तद्ग्रहणाय तदनुरूपाया:शक्तेरावश्यकता वरीवर्ति । सा च गिरिजाख्याशक्ति: कस्यचिद्साधनसम्पत्तियुतस्यभाग्यशालिनो न्त:करणे सम्बुध्य

1· पाणिनीय शिक्षायाम् श्लोक - 57

2· स्वच्छन्दतन्त्रे ।।पटले श्लोक 45

ज्ञानधारामात्मसाक्षात्करोति । तमेव महाभागेभ्यःमुनिभ्यः मा तन्महेश्वरज्ञानमाविष्करोति एवायासःलोके आगमपदेन व्यवह्रियते । अतः महेश्वरादागतं गिरिजायां गतन्चमतन्चागमपदेन व्यवह्रियते । तन्त्रराद्धान्ते यथा -

"आगतः शिववक्त्रेभ्यो गतन्च गिरिजानने ।
मतन्श्च हृदयाम्भोजे तस्मादागम उच्यते ।।इति"

वैयाकरणाः अनुबन्धानामपि माहेश्वरकर्तृकम् साधयन्ति "अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदं स्फुटी भविष्यति"[2] इत्यनेन । एतेनानुबन्धानामप्यानर्थक्यं न जायते । "इको यणचि"[3] इति भाष्ये पि वर्णानामनर्थकत्वन्निराकृतम् ।

"सामर्थ्ययोगान्नहिकिन्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्" इति ।वर्णसामाम्नाये किन्चिद् दृष्टादृष्टार्थवत्, किन्चिच्चादृष्टार्थवत् सर्वथा नर्थकं न किन्चिदिति तदर्थः ।"वृद्धिरादैच्"[4] इति सूत्रभाष्ये पि वर्णानाप्यनर्थकेन न भवितव्यम्" इति विवेचनादनुबन्धानामप्यनर्थकत्वं नास्तीति नागेशभट्टाःआमनन्ति । लघुशब्देन्दुशेखरे पुनश्च -"अतएव "सोऽयमक्षरसमाम्नायश्च पुष्पितःफलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः"इति भाष्यमुपादायोक्तं भर्तृहरिणा------"यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ता स्ति एवमेव वेदपारम्पर्येण स्मर्यमाणः"इति।

1· वाचस्पत्यकोषे अत्याप्तवचनत्वेन निरूपणम् पृ०616
2· लघु०शब्देन्दुशेखरे संज्ञा प्र० पृ० 6
3· अष्टाध्याय्याम् सू सं० 6/1/77
4· " " " 1/1/1

आधुनिकः शरीरीपुष्पितत्त्वं तन्मूलकशब्दशास्त्रद्वारेण । शब्दप्रयोगेण च फलितत्त्वम् । उक्तञ्चैतच्चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वर कृतकाशिकायाम् नृत्तावसानेनटराजराजोननादढक्कां नवपञ्चवारम् ।

उद्धर्त्तुकामःसनकादिसि द्धानेतद्विमर्शेशिवसूत्रजालम् ।।

अत्र सर्वेषु सूत्रेषु अन्त्यंवर्णचतुर्दशम् ।

धात्वर्थं समुपादिष्टं पाणिन्यादिष्टसिद्धये ।।इति

धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थकम् अत एव - "अनुबन्ध करणार्थन्च वर्णानामुपदेशः" इत्युक्तं भाष्ये । अत्र करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम् । तत्करणञ्चोपदेशकर्तृकमेव प्रत्यासत्तेः। तेन तदल्पतिरिक्तस्य सर्वस्यानादित्वं सूचितम् । अत्रसनकाद्युद्धरणेच्छया ब्रह्मोपदेशकत्त्वं सूचितम् । तच्चश्रुतितत्त्वाभावे न सङ्गच्छते ।"श्रोतव्यः श्रुतिवाक्येभ्यः" इत्युक्तेः ।

नागेशोक्तौ प्रमाणप्रदर्शनवाक्ये वर्णचतुर्दशमित्यस्य व्याख्यानन्तु वर्णाश्चतुर्दश इत्यर्थे आर्षसाधुत्वम् । अन्त्या वर्णाश्चतुर्दशे क्वचित्पाठः। अत्रोदाहरणे प्रकृतर्के: प्रमाणैश्च चतुर्दशसूत्राणामनादित्वं कूटस्थत्त्वमविचालितत्त्वञ्च सूचितम् ।

वर्णानामादित्वं माहेश्वरत्वमेवास्ति इत्यत्र श्रुतिप्रमाणमपि नागेशेनोद्धृतम् । श्रूयते हि पाणिनेः प्राक् बहवो वैयाकरणाःआसन्। परम्परेयमीश्वरादारभ्य यथोत्तरमुनीनां प्रामाण्यमभ्युपागच्छन् पाणिनि पतञ्जलिपर्यन्तमागच्छति । उक्तञ्च -

---

1. लघुशब्देन्दुशेखरे संज्ञा प्र० पृ० सं० 7

इन्द्रश्चन्द्रः काशकृत्स्नापिशलीशाकटायनः ।
पाणिन्यमरजैनेन्द्रा:जयन्त्यष्टौ शाब्दिका:।।[1] इति

उक्तरीत्या प्रवाहनादित्या व्याकरणशास्त्रस्यापनादित्वं सुतरां सिद्धम् । तत्रानेन व्याकरणतत्त्वविदः पाणिनेः पूर्वं बभूवुः येषां मूलमाकलय्य पाणिनिः अष्टाध्यायीं निर्ममे ।। अतः पाणिनेःपूर्वं शाकटायनर्षिप्रोक्तस्य शाकटायन व्याकरणस्यस्थितिः पूर्वमासीदिति ऐतिह्यविदः विदन्ति एव । तत्र शाकटायन र्षिवाक्याधारमादाय वैयाकरणाःमाहेश्वरसूत्रवैशिष्ट्यं पुनरालोचयति -------

कृतन्त्र व्याकरणे शाकटायनो पि--- इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथा याथा ऊचुः-"ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज र्षिभ्यः ऋषयो ब्राह्मणेभ्यस्तं खल्विदमक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं पवूपादब्रह्मराशिः"इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः । तत्त्वञ्च नन्दिकेश्वरकृतकाशिकायां स्पष्टम् । पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण तदर्थमिति तदर्थः । स चाणादिप्रत्याहार - द्वारा शास्त्रप्रवृत्त्यर्थः । एवञ्चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम् । मन्त्रोपदेश इतिवच्चात्रोपदेशपदप्रयोगः । अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यं फलमिति भाष्ये उक्तम् ।व्याकरणमुपक्रम्य "वेदानां वेदः"इति छान्दोग्यश्रुतिरप्येतत्परैवेति ।

---

1. नवा म भाष्ये चौखम्बाप्रकाशने भूमिकायां पृ सं ।

एतेन चतुर्दशसूत्राणामनादित्वं सर्ववेदपारायणफलशालित्वं वेदानामपिवेदत्वं वैयाकरणोक्ति: साधयति । व्याकरणागमस्य प्रक्रिया-परिष्कार: दर्शनञ्चेति त्रीणिरूपाणि साध्यन्ते शाब्दिकै:। तत्र दर्शनपक्ष-माश्रित्यैवमुक्ति:नागेशभट्टस्य । वाग् व्यवहारमाश्रित्य प्रवृत्तिनिमित्ता-श्रयतामर्थवदधातुप्रभृतीनां संज्ञा परिभाषादि बहुविधसूत्राणां प्रक्रियाप्रवृत्ति: निर्दुष्टलक्षणसमन्वयार्थं परिष्कार: वाक् तत्त्वविमर्शाय दर्शनदृष्टिरिति व्याकरणाध्ययनस्य प्रयोजनानि । वाक्तत्त्वमयाशब्दरूपा हि वेदास्तद्रक्षणाय व्याकरणाध्ययनस्य प्रयोजनमिति महाभाष्यकारस्य पतञ्जलिमुने:वाक्यपदीय कारस्य भर्तृहरे:तट्टीकाकर्तृ पुण्यराजहेलाराजयोश्च भूयसा प्रयास: दृश्यते । तदत्र पाणिनीय व्याकरण व्याख्यातृपरम्परायामधुना नागेश एवावलान-सीमामधिरोहति । तदत्र स्वच्छन्देषु व्याकरणशास्त्रस्य दर्शनस्वरूपविवेचनेन वैयाकरणा: महाभाष्योद्योतादारभ्य परिभाषेन्दु-लघुशब्देन्दु-मञ्जूषा प्रभृतयो ग्रन्था प्रणीतवन्त: । किन्च स्वमातापित्रो: स्मरणेन अपि वाक्-तत्त्वस्य संविद्स्वरूपयो: उमामहेश्वरयोश्च स्मरणं सम्पादयन्ति ।

भगवान् पतञ्जलि: महाभाष्ये चतुर्दशसूत्रभाष्यावसरे उक्तवान्- "अथ किमिदमक्षरमिति"व्याख्या इमां स्वरसो क्षरसश्च इति वोक्तत्वा-त्प्रश्न: "वैयाकरणाश्च- "अइउण्, सूत्रे यं व्यवहारो भाष्ये । प्रश्न इति तद्घटकीभूताक्षरपदार्थावगमायेति भाव: ¹" ।इति प्रोक्तवन्त:।

अक्षरं किमिति प्रश्नस्योत्तरं भाष्ये स्वयमेव प्राहोत्तरं भगवान् पतञ्जलि: । तथाहि - अक्षरं न क्षरं विद्यात् न क्षीयते न क्षरतीति वा क्षरम् ।

---

1. महाभाष्ये । अध्याये । पादे द्वितीयान्हिकान्ते ।

अत्रस्य - प्रदीप टीकायां " अक्षरं न क्षरमिति । क्रियाशब्दो यं नित्य-स्यार्थस्य वाचक इति दर्शयति । अत क्षिप:क्षरतेर्वा विनाशार्थस्य नञ् पूर्वस्य रूपम् । तच्च ब्रह्मतत्त्वं परमार्थतो नित्यम् । व्यवहारनित्यतया तु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा "इत्युक्तम् ।

वैयाकरणाश्च - ब्रह्मतत्त्वस्यैव तत्त्वे हेतुगर्भविशेषणतामाह-परमार्थतोनित्यमिति । यतस्तत् प्रागभावप्रतियोगित्वे सति ध्वंसप्रति-योगित्वस्य नित्यत्ववदित्यर्थ: । नन्वेवं प्रकृते क्रियायातमत आह - व्यवहार नित्यतयाचेति । सर्वेषां शब्दानामाकाशादिवद् सृष्ट्यादावुत्पत्ति: प्रलये च नाश इत्यर्थ: । एवञ्च व्यवहारनित्यतयाक्षरब्रह्मसादृश्यवतां तेषां पदादिरूपाणामयं वर्णसमाम्नाय इति चतुर्दशसूत्रीविषयत्वव्यवहार:। एवञ्च शब्दे औपचारिको क्षरपदप्रयोग:इति भाव:"[1] ।इति प्राहु: ।नागेश: - एवं चाक्षरसमाम्नाय इत्यस्य श्रुतिरूपोवर्णसंघात इत्यत्र तात्पर्यम् ? इत्युक्त्वा वर्णसमाम्नायस्य चतुर्दशसूत्रात्मकस्य श्रुतिमूलकत्वमाचष्टे । अक्षरसमाम्नाय-स्योपदेश: किमर्थमिति जिज्ञासायाम् भाष्ये -

"वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते "इति ।

सो मक्षरसमाम्नायो वाक् समाम्नाय:पुष्पित: फलितश्चन्द तारकवदिति प्रतिभासितो वेदितव्यो ब्रह्मराशि:सर्ववेदफलावाप्तिश्चास्य ज्ञाने भवति "माता पितरौ चास्य स्वर्गलोके महीयेते"।[2]

---

1. महाभा० अ०। पाद । द्वितीयान्हिकान्ते ।
2. महाभा० अ० पाद । द्वितीयान्हिकान्ते ।

महाभाष्यपङ्क्तेराशय: कैयटेनेत्थं प्रतिपादित: ।

वर्णज्ञानमितिवर्णा-येन शास्त्रेण ज्ञायन्ते तद्वाचो विषय:शास्त्रेणवाग्विज्ञायते आख्यते, शास्त्रेण तस्या परिज्ञानादित्यर्थ: । यत्र चेति ब्रह्मवेद:पदे वर्तते । तत्र च शास्त्रं विषय: । इष्टबुद्ध्यर्थमित्यस्य अनादिदोषरहितवर्णज्ञानार्थमित्यर्थ: । लघ्वर्थमिति । अनुबन्धकरणार्थम् । वाक्समाम्नाय इति एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थ: । पुष्पत: फलित इति । दृष्टादृष्टफलाभ्यामुदयनि:श्रेयसाभ्यां च । चन्द्रतारकवदिति । अनादित्वान्नित्यत्वं वाग्व्यवहारस्य सूचयति । ब्रह्मराशिरिति । ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थ: । सर्ववेदेति । सर्ववेदाध्ययनवृत्तस्य पुण्यस्य यत्फलं तत्प्राप्नोतीत्यर्थ: । इत्येवं रूपेण कैयटेन भाष्याशय: व्याख्यात: ।

उद्योतकाराश्च – येन शास्त्रेणेति –

चतुर्दशसूत्रयात्मकेन तन्मूलक पाणिनिव्याकरणेन चेत्यर्थ: तत् शास्त्रम् भाष्ये यत्र चेत्यनेन वाक् परामृश्यते । का सा वाग् ? यत्र ब्रह्म च वर्तते । वात् पुराणादि: इति भाष्याक्षरार्थ: । वाग्व्यवहारस्येति। तत् संग्राहकस्य चतुर्दशसूत्रीरूपस्येत्यर्थ: । यथा श्रुते: हि भाष्याक्षरसमाम्नायोद्देश्येन प्रवृत्तिविशेषणानामन्यपरतया योजने भाष्यविरोध: ।अत एव तत्प्रतीकमादाय हरिणा –

"अस्याक्षरसमाम्नायस्य वाग्व्यवहारजनकस्य न कश्चित् कर्तास्त्येवमेव वेदे पारम्पर्येण स्मर्यमाणम्" इति व्याख्यातम् । ब्रह्मतत्त्वमेवेति तदुक्तं नन्दिकेश्वरेण "अकार:सर्ववर्णाग्र्य:प्रकाश: परमेश्वर:"।।इत्यादिना सर्ववर्णानां महेश्वररूपता वर्णेभ्य एव च महदादिसृष्टिरित्यर्थपरतया चतुर्दशसूत्री योजयता । तदाह- सर्ववेदेत्यादि । अन्ये तु वर्णज्ञानं चतुर्दश-

सूत्रयात्मकं शास्त्रं वाचो वेदशास्त्रपुराणरूपाया सकलवाचो विषयोबन्धनम् । यत्र च वर्णसमाम्नायो ब्रह्मबोधपरतया वर्तते । व्याख्याता चैषा चतुर्दश सूत्रीब्रह्मपरतया नन्दिकेश्वरेण- "तदर्थं सकलवाग्ज्ञानार्थं ब्रह्मबोधनार्थं च अनेन सकलवेदाध्ययनेन यत् कार्यं तदक्षरसमाम्नायज्ञाने सूचितम् । वाग्विषय इत्यस्य व्याख्या वाक्समाम्नाय इति सर्ववाग्रूपत्वात् । "चन्द्रतारकवत् प्रतिमण्डितम् "इत्यनेनादित्वं सूचयति । तादृशो यं ब्रह्मराशिर्वेदितव्यः। बोध्यबोधकयोरभेदात् । सर्ववेदेति । सर्ववेदाध्ययन पुण्यफलस्यचित्तशुद्धि-रूपस्य प्राप्तिरस्य ज्ञाने ध्ययन मात्रे भवति । इदमेव पूर्वं पुष्पितत्वम् । तादृश पुत्रत्वेन माता पित्रो: स्वर्गे पूजा भवति । यथा कृतराजसूययुधि-ष्ठिररूपपुत्रेण पण्डो:स्वर्गे पूजेति प्राहु: ।[1]

अत्रोद्धृतेन भाष्यप्रदीपोद्योतवचनेन महेश्वरसूत्राणामध्ययनेन सर्ववेदशास्त्रपुराणरूपोप: सकलवाच: अध्ययनस्य फलमवाप्यते । अत एवोक्तं केनचिदभियुक्तेन -

"यद्यपि बहुनाधीषे तथापि पठ -पुत्र व्याकरणम्" इति ।

महाभाष्ये च -

"पुराकल्प एतदासीत् -संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते ।[2]।इत्युक्तम् ।

अत्रोक्तरीत्या दर्शनांशे तन्त्रागमस्यप्रभाव:स्पष्ट एव दरी-दृश्यते ,तन्त्रागम निखिलमेव षट्त्रिंशत्तत्त्वजातं शिवशक्त्योरभेदेनस्थितसंविद: परावाच: महिम्नैव समुल्लसति । पाणिनीयं हि व्याकरणं चतुर्दशमाहेश्वरसूत्र

1· महाभाष्ये प्रदीपे उद्योते । अध्याय । पादे द्वितीयान्हिकान्ते ।

2· महाभाष्ये पश्पशान्हिके "सुदेवो असि" इति प्रयोजननिरूपणे ।

निर्देशं विना निष्प्रयोजनं भविष्यति । अत: पाणिनीय सूत्राणामपि सूत्रभूतानीमानि माहेश्वरसूत्राणि तन्त्रागमस्य रहस्य भूतानि पाणिनीय व्याकरणस्योपजीव्यभूतानीति वैयाकरणा:आमनन्तीत्यलम् ।

चत्वारि शृङ्गादि मन्त्रमुद्दिश्य व्याख्या

महाभाष्ये पस्पशाह्निके उद्योताख्ये स्वव्याख्याने पि नागेशभट्ट:वाक्चतुष्ट्यात्मक सिद्धान्त: स्वीकृत: । तथाहि व्याकरणाऽध्ययनस्यावश्यकत्वप्रतिपादनपरभाष्ये "चत्वारि"इति पदस्य व्याख्यानमुद्धृत: ।

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्यां आविवेश ।।

"चत्वारि शृङ्गाणि । चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादा । त्रय: काला:भूतभविष्यद्वर्तमाना:। द्वे शीर्षे ।द्वौ शब्दात्मानौ नित्य:कार्यश्च । सप्तहस्तासो । सप्तविभक्तय: त्रिधा बद्ध: । त्रिषु स्थानेषु बद्ध: उरसि कण्ठे शिरसीति वृषभो वर्षणात् । रोरवीति । शब्दं करोति । कुत एतत् ।

रौति: शब्दकर्मा । महादेवो मर्त्यां आविवेशेति । महान्देव: शब्द: । मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन न: साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।

1. महाभाष्ये । अ० । पा० । आ० नवा० पृ० 24

कैयटेन पदीपाख्ये एतन्मन्त्रस्य व्याख्याने चत्वारीति । शब्दस्य वृषभत्वेन निरूपणं कृतम् । एतस्यैव प्रतीकमादायोद्योते चत्वारीति । इङ्•मन्त्र:। शब्दस्येति शब्दशास्त्रप्रतिपाद्यस्येत्यर्थ: । वृषभाकार:शब्दशास्त्र-प्रतिपाद्य: शब्दो रोरवीति । महान् देवो न्त्याभिरूप:शब्दोमत्यानाविवेश त्वाभेदमाविष्कृतवानिति मन्त्रतात्पर्यम् । महतो देवस्य शब्दब्रह्मणो व्याकरण शाप्यतया व्याकरणस्तदाविष्ट इव भवतीति यावत् । भाष्ये पदजातानि परापश्यन्तीमध्यमावैखरीरूपाणि । अत एव निपाताश्चेति चकार: सङ्•गच्छते इत्युक्तमिति ।।

चत्वारिवाक् परिमितानी--त्यादिमन्त्रस्यतन्त्रागमानुसारि-व्याख्यानम् -

चत्वारि वाक्परिमिता पदानि,
तानि विदुर्ब्राह्मणा ये मनीषिण: ।
गुहा त्रीणि निहिता नेङ्•यन्ति ,
तुरीयं वाचो मनुष्या वदन्ति ।।

चत्वारि वाक्परिमिता पदानि । चत्वारि पद जातानि नामाख्यातोपसर्गनिपाताश्च ।[2]

उपर्युक्त भाष्यस्य प्रतीकमादाय नागोजिभट्टा: वाक् चतुष्टयस्य सिद्धान्तं व्यवस्थापयान्त: कुर्वन्ति ।

1• महाभा० । अ । पा० ।आ० नवा उद्योते पृ 24
2• " " " " पृ 26

पदजातानि । परापश्यन्तीमध्यमावैखर्यः । इति। एतेन "परापश्यन्तीमध्यमावैखरीति"चतस्रः वाचः नागेशाः वदन्ति ।

यत्तु वैयाकरणाः नागेशभट्टस्यैतत्सिद्धान्तं दूषयन्ति, यथा च सिद्धान्तशैवानामिदम्मतम् । परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।इति तन्त्रशास्त्रं चाश्रित्य मूलाधारपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परावागुच्यते, नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते, ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते, तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता मूर्धानमाहत्य च तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या वैखरी वागुच्यते इति वाचश्चतुर्विधत्वमाहुः । तत्तु व्याकरणसिद्धान्तानवबोध निबन्धनम् । हर्यादिभिर्वाचस्त्रैरूप्यस्यैवोक्तत्वात् । न च चत्वारि वाक् परिमिता इति भाष्योदाहृति मूलकं नागोजिभट्टोक्तम् । अत एव माधवेन ऋग्वेदभाष्ये चत्वारि वाक् परिमिता पदानीत्यनेन वैखरी, मध्यमा, पश्यन्तीरूपाणि प्रदर्शितानि व्याख्यातं चैवमेवोद्योत इति वाच्यम् । कैयटेन उक्त श्रुतेः तत्र चतुर्णां नामाख्यातोपसर्गनिपाताख्यानां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणाः वदन्तीति व्याख्यातत्वेन माधवादिव्याख्यानस्यतन्त्रशास्त्र वासना मूलकतया वैयाकरणैरनुपपादेयत्वादिति यदुक्तम्, तन्न समीचीनम् । माहेश्वरसिद्धान्ताः एवागमपदवाच्याः। आगम एव पर्यायत्वेन तन्त्र एव सङ्गच्छते तन्त्रग्रन्थेषु सर्वे परापश्यन्ती मध्यमावैखरीति चतस्रः वाचः स्वीकृताः अतः नृत्तावसाने ज्ञानस्वरूपिणा शिवेन नवपञ्चवारम् ढक्कायाः

1• महाभा । अ । पा । आ नवा पृ 26

नादेन वर्णसमाम्नायस्याविर्भावकानि अइउणित्यादि चतुर्दश सूत्राणि आगमिकान्येव । अतः तत्सिद्धान्तो सिद्धान्तरूपेणाङ्गीकृतं वाक्वलुप्तं वैयाकरणैरपि अङ्गीकुर्तव्यमेव । पश्यन्ती वाक् । किन्त्वतरत्वं पश्यन्त्येवावतिष्ठते । तदभावे तस्यावमर्शः दुःशक इति वैयाकरणैर्विभावनीयम् । किन्च पश्यन्त्यादयस्तस्त्रो पि वाचः परावस्थायां परचिदात्मना परब्रह्मणा सङ्गतिगतास्तदैकात्मतया वतिष्ठन्ते तदानीं तत्पतिः ज्ञानगुर्महेश्वरःस्वात्मज्योतिषा स्वभिन्नं भावजातं नित्यं भासयते । तद् भासनादेव तदिच्छाया समुदेको भवति यदधीनाः विश्वसर्गादिव्यवहाराः प्रादुर्भवन्ति ।

विश्वविस्तारकर्मणः कारणभूता कुण्डलिनी महाशक्तिः । तस्यैव परिणामाः परापश्यन्तीमध्यमावैखरीवाचः । अतश्चासां वाचां कुण्डलिन्याः कथं प्रभवः इति विविच्यते । किन्चित् --

मानवशरीरस्य पृष्ठभागे मेरुदण्डो वर्तते, तस्यैव वाह्यप्रदेशे वामभागे चन्द्रस्वरूपिणीडानाड़ी, दक्षभागे च सूर्यरूपा पिङ्गलानाड़ी तिष्ठति । इड़ानाड़ी शक्तिरूपा पिङ्गला च पुरुषा भिधीयते । उक्तन्च-

"इड़ा वामे स्थिता नाड़ी शुक्ला तु चन्द्ररूपिणी ।
शक्तिरूपा च सा नाड़ी साक्षादमृतविग्रहा ।।
दक्षिणे पिङ्गलाख्या तु पुंरूपा सूर्य विग्रहा ।।[1] इति

इड़ापिङ्गलयोर्मध्ये च मेरुदण्डस्य मध्यभागे ----
गुदात्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः ।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत् ।।[2] इति

---

1. तन्त्रसारे 2. तन्त्रसारे ।

इत्युक्तलक्षणलक्षितस्य कन्दस्य मध्यप्रदेशात् समुत्क्षिप्ता शिर: पद्मपर्यन्तं स्थिता विकसितधुत्तूरपुष्पाकारा चन्द्रसूर्याग्निरूपा वक्ष्यमाण वज्रिणीचित्रिणीमयां समेता अतएव त्रितयगुणमयी सती सुषुम्णानाड़ी सुतरां विराजते । प्रागुक्ता वज्रिणी (वज्राख्या) नाड़ीउक्तायाः सुषुम्णायाः मध्यदेशे दीप्तीं कुर्वती सती प्रागुक्त कन्दाद्यङ्गुंलोर्ध्वलिङ्गदेशात् शिर: पर्यन्तगामिनी वर्तते ।

तस्या: वज्रिणी नाड्या:मध्ये सा प्रसिद्धा चित्रिणी नाड़ी विलसति या हि प्रकारमुद्दीप्यमानायोगिनां योगभ्यां लूतातन्तुवदति-सूक्ष्म्या मेरुमध्यस्थितसुषुम्णावज्रिणीनाड्योरभ्यन्तरस्थान् मूलाधारस्वाधिष्ठान मणिपूरानाहतविशुद्धाख्यानखिलसरसिजान्निभित्त्वा तेषामेवोपर्युक्तानां क्रमं पद्मानां ग्रथनरचनया देदीप्यते, अर्थादुक्तानि पद्मानि चित्रिणीनाड्यां ग्रथितानिव सन्ति ।

एतश्चित्रिण्या नाड्यामध्ये मूलाधारस्थ स्वयम्भूलिङ्गाच्छिदत सहस्रारस्थित परमशिव पर्यन्तगामिनी विद्युत्पुञ्जसमानदीप्तिशालिनी विषतन्तुतुलनीयस्यातिसूक्ष्मा त्रिगुणात्मिका ब्रह्मनाड़ी देदीप्यते ।

एतस्या एव ब्रह्मनाड्या मुखे ब्रह्मद्वारं विलसति, यस्मिन् शिवशक्तिसामरस्य संजातामृतस्यासार: प्रसरति, यस्मादेव ब्रह्मद्वाररूपप्रदेशान् मूलाधारस्थितशिवशक्तिभ्यां निरुक्तामृतं पीयते । एतदेव च.ब्रह्मद्वारं सुषुम्णाख्यानाड्या मुखंयोगीन्द्रा विनिर्दिशन्ति ।

आधारत्रिकोणान्तरा धोमुखं नवकिसलयाकारं स्वयम्भूलिङ्गं वर्तते । तदूर्ध्वे च विलसत्तन्तुतनीयसी जगतां मोहजनिका मायारूपिणी ब्रह्मद्वारमुखं स्वमुखेनाच्छादयन्ती सार्धत्रिवलयाकारा स्वयम्भूलिङ्गोपरि सुप्ता पुष्परसपानोन्मत्ता लिकुलसमं मधुरं कूजन्ती श्वास-प्रश्वास क्रमेण पाणिनां प्राणांश्च धारयन्ती कुलकुण्डली विलसति । तथैव ध्वन्यात्मकवर्णात्मिकानां शब्दानां सृष्टिर्जायते । तदुक्तं शारदायाम् -

"तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
वर्णात्मना विर्भवति गद्यपद्यादिभेदतः ।।"[1] इति

एवञ्च -

"भिद्यमानात्पराद्विन्दोरव्यक्तात्मरवो भवत्"[2] इति ।

अन्यच्च-

सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ।
शक्तिं ततो ध्वनिस्तस्मात् नादस्तस्मान्निरोधिका ।
ततो र्धेन्दुस्ततो विन्दुस्तस्मादासीत्परा ततः ।
पश्यन्तीमध्यमा वाचि वैखरी शब्दजन्मभूः[3] ।।इति

श्रीप्रपञ्चसारतन्त्रे तु जगन्मूलभूता परिणामिनी माया शक्तिः। तस्या आधारभूश्चिदात्मा मूलाधारः । तस्मात् चैतन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा परा वागुच्यते । सस्पन्दावस्थाःपश्यन्त्यादयः तथा च सामान्यस्पन्दप्रकाशरूपिणी नादतत्त्वात्मिका आध्यात्ममूलाधारादिनाभ्यन्तरमभिव्यज्यमाना पश्यन्ती । सामान्य ज्ञानात्मकत्वात्सा

1· शारदातिलके प्रथमपटले श्लोक सं. 14
2· " " " 12
3· " " " 111, 112

पश्यन्तीत्युच्यते । एवं हि बाह्यान्त:करणात्मिका हिरण्यगर्भरूपिणी विन्दुतत्त्वमयी नाभ्यादि हृदयान्ताभिव्यक्तिस्था विशेषस्पन्दसङ्कल्पादि-सत्त्वा "मध्यमा" वागिति । आहोस्वित् मध्ये मा बुद्धिर्यस्या: सा मध्यमा। भाव एव विशेष्य: । तथा च विराड्रूपिणी बीजात्मिका हृदयादास्यान्तम् अभिव्यज्यमाना शब्दसामान्यात्मिका वैखरीवागिति। उक्तञ्च-

"मूलाधारात् प्रथममुदितो यस्तु भाव: पराख्य:

पश्चात् पश्यन्त्य हृदयगो बुद्धियुङ्मध्यमाख्य:।

वक्त्रे वैखर्यथ रूरुदिषोरस्य जन्तो: सुषुम्ना,

बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घ:।।[1]" इति

किञ्च -

"सृष्टिकाले महेशान:पुरुषार्थप्रसिद्धये ।

विधत्ते विमलं ज्ञानं पञ्चवक्त्रो भिलक्षितम्"[2]।।इति

इत्युक्त्वा परमेश्वर सृष्ट्यारम्भे युक्ति युक्त्या सकपुरुषार्थसम्पत्तये सद्योजात: वामदेव अघोर-तत्पुरूषाईशानाख्यमन्त्रमयस्वमुखपञ्चकेन विमलज्ञान स्वरूपान् दिव्यागमानभिव्यज्जयतीति प्रतिपाद्यते । तत्र स्यादेका शङ्का-यद्यप्यनादिभूतस्य परमेश्वरस्य स्वरूपभूतं ज्ञानमध्यनादि तथापि श्रेष्ठतरं विमलं ज्ञानं प्रशान्तस्वरूपाद् निष्कलाद परशिवात् कथं प्रकाशितम् । तदुच्यते - ज्ञानं द्विविधं अवबोधरूपं शब्दरूपञ्च । अवबोधरूपं ज्ञानं यद्यप्यनादि तथापि शब्दरूपा-द्गमेवार्थं प्रवर्तते । तस्मादवबोधरूपं तद्विमलज्ञानं कथं शब्दरूपेण कामिकादिशास्त्र रूपतया प्रकाशितमिति ? अत्रोच्यते समाधानम् -

---

1· प्रपञ्चसारतन्त्रे द्वितीयपटले श्लोक सं 43

2· मृगेन्द्रागमे विद्यापादे श्लोक-

अत्रोच्यते समाधानम्

परमेश्वरो बवोधरूपमथवा स्फुरणरूपं ज्ञानं सृष्टेरारम्भे नादरूपेणाविष्कृत्य ततः परमाधिकारावस्थायां सदाशिवरूपमास्थाय पुनः शब्दरूपारूढं ज्ञानमनन्ताद्यष्ट विद्येश्वरेभ्य उपदेशयामास । अत्र विषये इदमप्यवधेयम् यद् - परमकारणभूतेव्योमाकारे शिवतत्त्वे सर्वेषां शब्दानां परमकारणभूतो त्यन्तं सूक्ष्मो नादो व्यक्ततया वरीवर्ति । यस्मादयमव्यक्तावस्थास्थस्ततो स्य परनाद इति व्यवहारः । परनादस्याभिव्यक्तिरेव स्फोटः । स एव वर्णः । शिवतत्त्वाच्छक्तितत्त्वस्याविर्भाव समय एव स्फोटस्याप्याविर्भावः। मयूराण्डरसन्यायेन सर्वशब्दात्मकेन स्फोटेनालिङ्गितं शक्तितत्त्वं प्रादुर्भवति । एवं स्फोटेन सहाविर्भूतस्य शक्तितत्त्वस्य परबिन्दुरिति नाम । ततो मूलवर्णभूतः स्फोटः शक्तितत्त्वात् सादाख्यतत्त्वस्य अथवा सदाशिवरूपस्य आविर्भावसमये स्थूलरूपं प्राप्याभिव्यक्तोनुभववेद्यो भवति । सेयमवस्था "अपरवाद" इति नाम्ना व्यवह्रियते । अनेन सादाख्यतत्त्वेन सहाविर्भूतो वर्णसमूहात्मको क्षरबिन्दुरिति व्यवह्रियते । अपरबिन्दोःसकाशादेव ईश्वरतत्त्वाश्रयाःसूक्ष्मवर्णाःशुद्धविद्यातत्त्वाश्रयाश्च स्थूलवर्णाः आविर्भूताः । एवं शक्तिःसदाशिव ईश्वरःशुद्धविद्या इत्याख्यकायतत्त्वचतुष्टयस्याश्रयभूताश्चतुर्विधाः शब्दा एवं क्रमेण परा-पश्यन्ती मध्यमा-वैखरीति वाग्वृत्तिचतुष्करूपेणाभिव्यक्ता अर्थवाचका भवन्ति ।

पूर्वं परनादस्याभिव्यक्तिरेव स्फोटः स च वर्णरूपःइत्युक्तम् । वैयाकरणैर्वर्णातिरिक्तः स्फोटो भ्युपगम्यते । तन्त्रसिद्धान्तागमरीत्या च वर्णातिरिक्तः स्फोटो नास्ति । शङ्कराचार्याः ब्रह्मसूत्रव्याख्याने "वर्ण एव च शब्दः"[1] इत्युपवर्षाचार्यवाक्यमस्मिन्नर्थे उदाहरन्ति। तथा च रामकण्ठाचार्याः नादकारिकायां वर्ण एव स्फोट इति प्रतिपादयन्त्येव प्रमाणबलेन ।

----

1. शाङ्करभाष्ये (1/3/8-28)

सो यं स्फोटो मूलवर्णभूत: पणव: । तस्य प्रणवस्यैव विस्तरो का-रादि लकारान्तपन्चाशदक्षरपसर: । पमाणपमातृपमेयरूपे विश्वप्रपन्चविकासे पवृत्तस्य सृष्ट्युन्मुखस्य परशिवस्येच्छाशक्त्या क्षोभितो बिन्दुरेव पणव इत्यु-च्यते । पणवात्प्रसूतेषु पन्चाशदक्षरेषु ककारादि लकारान्तानां व्यञ्जनानां स्वरैर्विनानुपयुक्तत्वाज्जीव वियुक्तशरीरतुल्यत्वाच्छरीरत्वेन व्यवहार: एवं व्यञ्जनस्वरसंयोगे पदोत्पत्ति: । तादृशवर्णै: पदैर्मन्त्रैश्च तन्त्राणामावि-र्भाव इति तन्त्रागमिका: । तथाहि -

स महामायाजन्यो नाद: परमार्थवाचको भवति ।
येन स्थूलं शब्दं मन्त्रं तन्त्रात्मकं भवेद् वापि ।।[1]इति ।

एवन्चेदमेव ज्ञानगुरोर्महेश्वरस्यतत्त्वं चन्द्रशेखरादि पन्चविंशति-मूर्तिभेदेनभिन्नम् । लघुशब्देन्दुशेखर- परिभाषेन्दुशेखर प्रभृतिग्रन्थप्रकल्पनेन नागेशभट्ट: आगमिक एव परापश्यन्तीमध्यमावैखरीति वाक्चतुष्टयस्य सि-द्धान्तं प्रदर्शितवानिति प्राज्ञै: सूक्ष्मेक्षिकया विचारणीयम् ।

---

1. नादकारिकायाम् ।

तृतीयोऽध्यायः

1- महाभाष्ये पस्पशाह्निके परादिवाग्विमर्शः

2- भर्तृहरिमते परादिवाग् विमर्शः

3• नागेशभट्टमते परादिवाग् विमर्शः

4• नागेशाभिमतपरादिवाग् विममर्शः तन्त्रागमानुसारी एव ।

5- तन्त्रागमव्याकरणागमयोरैक्यम् ।

तृतीयोऽध्यायः

महाभाष्ये पस्पशाह्निके परादिवाग्विमर्शः

"त्रिमुनिव्याकरणम्" यथोत्तरं मुनीनां प्रामाण्यमित्यानुरोधात् व्याकरणोपदेष्टृषु त्रिषुमुनिषु यथोत्तरोत्तरं प्रामाण्यमधिगच्छति। तत्र माहेश्वरत्वं चतुर्दशसूत्रबलात् सिद्धे शब्दार्थ सम्बन्धे"[1] पाणिनेर्माहेश्वरत्वं सुतरामेवसिद्धम् । माहेश्वरसूत्राणि त्रिमुनिप्रणीतस्य व्याकरणशास्त्रस्योपजीव्यभूतानि । अतः व्याकरणनिकाये शिवमभिलक्ष्यैव सर्वत्र प्रवृत्तिःवैयाकरणानामद्यापि दरीदृश्यते । किञ्च -"स्वतन्त्रः कर्ता"[2] इति सूत्रं व्यवस्थापयताभगवता पाणिनिना स्वातन्त्र्यशक्तेराश्रयःशिव सेवोपदिष्टम् । शिव एव निजया स्वातन्त्र्यशक्त्यासंवलित उद्भवस्थितिसंहारादिक्रमःसूपयुज्यते । वाग् विषय अर्थविषयश्च स एव शिवस्तत्र तत्र शास्त्रान्तरेष्वपि व्यवहारभूमिः।

पाणिनिरष्टाध्याय्याःपूरकत्वेन वररुचेर्वार्तिकसूत्राणि विलसन्तितमाम् । भगवान् वररुचिरपि शब्दार्थयोरनित्यत्वं प्रतिपादयन् शब्दार्थमयं साम्बशिवमेव स्मरति "सिद्धे शब्दार्थसम्बन्धे"[3] इति वार्तिकेन शब्दानां नित्यत्वमुक्तेःशब्दानामिवार्थानां तत्सम्बन्धानामपि नित्यत्वं सिद्ध्यत्येव ।अतो यथा द्यौः पृथिवी,आकाशादयःनित्यास्तथैव शब्दार्थ सम्बन्धाः अपि नित्या एव । अतो विशङ्कया परं नित्यस्य साम्बशिवस्योपबृंहणं वाक्चतुष्टयान्वितं सिद्ध्यत्येव । एतेन वररुचेरपि आगमानां सिद्धान्तस्वीकारे न कापि विचिकित्सा स्माकं पुरतःप्रतिभाति ।

---

1. महाभाष्ये । आ० । सूत्रम् ।
2: अष्टाध्याय्याम्।
2. महाभाष्ये नवा० पृ० 28

भगवान् पतञ्जलि: शब्दार्थसम्बन्धानां सर्वथा नित्यत्वं साधयन्निति स्वमहाभाष्ये वाचां चातुर्विध्यं स्पष्टत: कण्ठरवेण न स्वीकरोति तथापि ध्वनिरूपेण "चत्वारि वाक्परिमितानि"[1] महो देवो मर्त्यां आविवेश"[2] इत्यादि, ऋङ्मन्त्रोदाहरणेन तमेव सिद्धान्तं निर्दिशति। एतदेव नागेश तत्त्वं भट्टादिविद्वद्भि: स्वीकृतमस्ति। केषां शब्दानाम्"[3] इत्याक्षेपेण द्रव्य क्रिया, गुण, आकृत्यादि नानाविधप्रकल्पं प्रकल्प्य उत्तर-मुखेन प्रस्तौति -

येनोच्चारितेन सास्नालाङ्गलककुदखुरविषाणीनां सम्प्रत्ययो भवति स शब्द:"[4] इति। एतेन शब्दे चिन्त्यानन्तशक्तीनां वैलक्षण्यं भाष्यकारा स्वीकरोति। किन्च "आगम: खल्वपि"[5] इत्यनेन व्याकरणशास्त्रस्योपजीव्यभूतमागममपि प्रकरणान्तरेण स: स्वीकरोति। किन्चाक्षरसमाम्नायोपदेश प्रयोजनान्ते लघुशब्देन्दुशेखरे "अत एव सो यमक्षर-समाम्नाय: पुष्पित: फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशि"रित्यनेन -

माहेश्वरचतुर्दशसूत्राणां परा पश्यन्ती, मध्यमा, वैखरीणा-माधारभूतस्य तत्त्वं मनसि निधाय एतदुक्तम्। किन्चाष्टाध्याय्या: कानचित्सूत्राणां प्रत्याख्यानावसरे तेषां दृष्टादृष्टत्वप्रयोजनं साधयता तेन शिवसूत्र प्रोक्तस्य वर्णसमाम्नायस्य तन्मूलत्वेन वाचां चतुर्विधत्वमपि ध्वनिमुखेन स्वीकृतमेव।

---

1. महाभाष्ये पस्पशान्हिके।
2. " "
3. " "
4. " "
5. " "

महाभाष्ये पस्पशाह्निके उद्योताख्ये स्वव्याख्याने नागेश-भट्टै: वाक्चतुष्टयात्मकसिद्धान्तं स्वीकृतम् । तथाहि व्याकरणाध्ययनस्या-वश्यकत्वप्रतिपादनपरभाष्ये "चत्वारि" इति पदस्य व्याख्याने द्वौ ऋङ्मन्त्रौ उद्धृतौ -

चत्वारि शृङ्गास्त्रयो अस्य पादा द्वेशीर्षे सप्तहस्तासो अस्य ।
त्रिधाबद्धो वृषभोरोरवीति महो देवो मर्त्यां आविवेश ।।[1]

चत्वारि शृङ्गाणि । चत्वारिपदजातानि नामाख्यातोपसर्ग-निपाताश्च । त्रयो अस्य पादा । त्रय:काला:भूतभविष्यद्वर्तमाना:। द्वे शीर्षे । द्वौ शब्दात्मानौ नित्य: कार्यश्च । सप्तहस्तासो अस्य । सप्त विभक्तय: । त्रिधाबद्ध: । त्रिषु स्थानेषु बद्ध: उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति । शब्दं करोति । कुत एतत् ।

रौति: शब्दकर्मा । महोदवो मर्त्यां आविवेश । महान्देव: शब्द:। मर्त्यां मरणधर्माणोमनुष्यास्तानाविवेश । महता देवेन न: साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।"[2]

कैयटेन प्रदीपाख्ये एतन्मन्त्रस्य व्याख्याने चत्वारीति - शब्दस्य वृषभत्त्वेन निरूपणमुक्तम् । एतस्यैव प्रतीकमादायोद्योतेचत्वारीति । ऋङ्मन्त्र:। शब्दस्येति । शब्दशास्त्रप्रतिपाद्यस्येत्यर्थ: । वृषभाकार:। शब्द-शास्त्रप्रतिपाद्य:शब्दो रोरवीति । महान् देवो न्तर्यामिरूप: शब्दोमर्त्या-नाविवेश स्वाभेदमाविष्कृतवानिति मन्त्र तात्पर्यम् । महतो देवस्य शब्द-ब्रह्मणो व्याकरण ज्ञाप्यतया व्याकरणस्तदानिष्ट इव भवतीति यावत् । भाष्ये पदजातानि परापश्यन्तीमध्यमावैखरीरूपाणि । अत एवाग्रेनिपाताश्चेति

1· महाभा० । अ०।पादे ।आ० नवाह्निके पृ० 24 उद्योते पृ०सं०24

2· महाभाष्ये ।० ।० पादे । आ० नवा०

चकार: सङ्गच्छते, इत्युक्तम् ।

अन्योदाहरणनिरूपणं भाष्ये -

चत्वारि वाक्परिमितापदानि,

विदुर्ब्राह्मणा ये मनीषिण: ।

गुहा त्रीणि निहिता नेङ्गयन्ति ।

तुरीयं वाचो मनुष्या वदन्ति ।

चत्वारि वाक्परिमितापदानि ।चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च ।[1]

उपर्युक्त भाष्यस्य प्रतीकमादाय नागोजिभट्टा: वाक्चतुष्टयस्य सिद्धान्तं व्यवस्थापयन्त: ब्रुवन्ति ।

पदजातानि । परापश्यन्तीमध्यमावैखर्य:।[2] इति । एतेन परापश्यन्तीमध्यमावैखरीति चतस्र:वाच:नागेशा:वदन्ति ।

यत्तु - वैयाकरणा: नागेशभट्टस्यैतत्सिद्धान्तं दूषयन्ति, यथा च सिद्धान्तशैवानाभिदस्मतम् परावाङ्मूलचक्रस्था, पश्यन्तीनाभिसंस्थिता । हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठदेशगा ।इति तन्त्रशास्त्रं चाश्रित्य मूलाधारस्थपवनसंस्कारीभूतामूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या परावागुच्यते नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूतापश्यन्ती वागुच्यते ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्यामध्यमा वागुच्यते, तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य च तत्स्थानेष्वभि

---

1. महाभाष्ये । । पा० । आ० नवान्हिके पृ०सं० 26
2. " " "

व्यक्ता परश्रोत्रेणापिग्रहणयोग्या वैखरी वागुच्यते इति वाचश्चतुर्विधत्व-
माहु:। तत्तु व्याकरणसिद्धान्तानवबोधनिबन्धनम् । हर्यादिभिर्वाचस्त्रि-
त्वस्यैवोक्तत्वात् । न च चत्वारि वाक् परिमिता इति भाष्योदाहृत
श्रुतिमूलकं नागोजिभट्टोक्तम् । अत एव माधवेन ऋग्वेदभाष्ये चत्वारिवाक्-
परिमितापदानीत्यनेन वैखरीमध्यमापश्यन्ती रूपाणि प्रदर्शितानापि व्याख्यातं
चैवमेवोद्योते इति वाच्यम् । कैयटेन उक्त श्रुते: तत्र चतुर्णां नामाख्यातोपसर्ग-
निपाताख्यानां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवयाकरणा:वदन्तीति
व्याख्यातत्त्वेन माधवादिव्याख्यानस्य तन्त्रशास्त्रवासना मूलकतया वैयाकरणै-
रनुपादेयत्वमिति यदुक्तम् तन्न समीचीनम् । माहेश्वर सिद्धान्ता:एवागम-
पदवाच्या:। आगम एव पर्यायत्वेन तन्त्रस्य सङ्गच्छते । तन्त्रग्रन्थेषु सर्वत्र
परापश्यन्तीमध्यमावैखरी स्वीकृता:। अत: नृत्तावसाने ज्ञानस्वरूपिण्या शिवेन
नवपञ्चवारं ढक्काया:नादेन वर्णसमाम्नायस्याविर्भावकानि अइउणित्यादि
चतुर्दशसूत्राणि आगमिकान्येव । अत: तत्र सिद्धान्ते सिद्धान्तरूपेणाङ्गीकृतं
वाक्चतुष्टयं वैयाकरणैरप्यङ्गीकर्तव्यमेव । पश्यन्ती वाक् किन्त्वस्तत्त्वं
पश्यन्त्येवावतिष्ठते । तदभावे तस्यावमर्श: दु:शक इति वैयाकरणैर्विभावनीयम्।
किन्च पश्यन्त्यादयस्तिस्रो पि वाच: परावस्थायां परचिदात्मना पर-
ब्रह्मणा सङ्गलितगतास्तदेकात्मतया वतिष्ठते तदानां तत्पति:ज्ञानगुर्महेश्वर:
स्वात्मज्योतिषा स्वाभिन्न भावजांति नित्यं भासयते । तद्भासनादेव ते च्छाया:
समुद्रेको भव त पदधीना:विश्वसर्गादिव्यापाराप्रादुर्भवन्ति ।विश्वविस्तारकर्मण:
कारणभूता कुण्डलिनीमहाशक्ति: तस्यैव परिणामा परापश्यन्ती मध्यमा
वैखरी भाव: इति ।

✓ भर्तृहरि मते परादिवाग् विमर्श:

साधुत्वज्ञानविषयिण्यां व्याकरणस्मृतौ वाचां त्रिविधात्वं पश्यन्ती, मध्यमा, वैखरीति स्वीक्रियते। शब्दसाधुत्वातिरिक्ते व्याकरण दर्शनांशे आचार्य भर्तृहरिणा-वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदाया स्त्रय्यावाचो परं पदम्॥[1]

वाचां त्रैविध्यं निगदितम्। तत्र परश्रोत्रविषया श्लिष्टव्यक्त वर्णा प्राप्तसाधुभावा भ्रष्टसंस्कारा वैखरी। अन्त:सन्निवेशिनी परिगृहीत-क्रमेण बुद्धिमात्रोपादाना सूक्ष्मप्राणवृत्त्यनुगता मध्यमा। क्रमसंहरभावे पि व्यक्तप्राणग्रहा मध्यमेति केचित्। प्रतिसंहृतक्रमा:सत्यप्यभेदे समाविष्ट क्रमशक्ति: पश्यन्ती। सा चलाचला प्रतिलब्धसमाधाना च आवृता विशुद्धा च सन्निविष्टज्ञेयाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा च। तत्र व्यावहारिमीषु सर्वासु वागवस्थासु व्यवस्थित: साध्वसाधुप्रविभाग:पुरुषसंस्कारहेतु: परन्तु पश्यन्तीरूप-मनपभ्रंशमसंकीर्णं लोकव्यवहारातीतं तस्या एव वाचो व्याकरणेन साधुत्वज्ञान-लभ्येन वा शब्दपूर्वेण योगेनाधिगम इति। यदाह -

गौरिवप्रत्यक्षरस्यैका रसमुत्तमशालिनी।
दिव्यादिव्येन रूपेण भारती गौ:शुचिस्मिता॥
एतयोरन्तरं पश्य सूक्ष्मयो: स्पन्दमानयो:।
प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति॥
अन्या तत्प्रेर्यमाणे व विना प्राणेन वर्तते।
जायते हि तत: प्राणो वाच्यमप्याभयन् पुन:।

---

1. वाक्यपदीये ब्रह्मकाण्डे कारिका सं० 143

प्राणेनाप्यायिता सेयं व्यवहार निबन्धना ।
सर्वस्योच्छ्वासमात्रा च न वाग्वदति कर्हिचित् ।।
दोषिणी जातनिर्घोषा अघोषा च प्रवर्तते ।
तयोरपि च घोषिण्यो निर्घोषैव गरीयसी ।।[1] इति

एवं हि "अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा" इति, युक्त्या ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् पश्यन्तीत्युच्यते । पश्यन्त्यां वाच्यवाचकयोर्विभागेनावभासो नास्ति, सर्वतश्च सजातीय विजातीयापेक्षायां संहृतौ वाच्यानां वाचकानां च क्रमोद्देशकालकृतौ यत्र क्रमविवर्तशक्तिस्तु विद्यते ।

वैयाकरणाश्च यथा एकस्मादेवविन्दोःरेखात्रयभावेन परिणामे रेखात्रयमूलभूता विन्दवः एकत्रस्थिताःएकमेकैव वाक् परसूक्ष्मस्थूलपश्यन्ती परसूक्ष्मस्थूलमध्यमा परसूक्ष्मस्थूलावैखरी रूपेण विवर्तते इति अवस्था भेदेन नवधा वाक् सम्पद्यते तदा सर्वावस्थाकारणं परा वाक् देशयीत्याख्यायते । पूर्वोक्तानवकारणभूताश्च तिस्त्रो वाचःसम्भूय द्वादशभवन्ति ता इमा द्वादश-रश्मयःइत्यादयः आख्यायन्ते तदाचार्यं रविरित्याख्यायते । यदाहुः-

सर्वभूतान्तरचरःशब्द ब्रह्मात्मको रविः ।
भित्त्वा पं वोधखड्गेन निर्गच्छन्त्यविशङ्कताः[2] ।।इति

"सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः । आत्मैव सूर्यःसूर्य एवात्मा वेदितव्यः । आत्मशक्तयः चिन्मरीचयः एव सूर्य रश्मयःसूर्यस्यार्थभासकत्वेन

---

1. वाक्यपदीये ब्रह्मकाण्डे का०सं० 143 तमाया:व्याख्याने ।
2. " "

शब्दब्रह्मात्मकत्वं वेदात्मकत्वञ्च शास्त्रेषु प्रसिद्धम् । षोडशकले पुरुषे पञ्चदशकलानां परिणामशालित्वे पि षोडशीरूपैका चित्कला परिणामस्य साक्षिभूतापरमातृस्वरूपा तिष्ठति । अस्यां दृष्टस्वरूपायामधिकारो निवर्तते । इयं दैवी वाक् योगिभिर्निभिश्च दृश्यत्वेन निर्दिश्यते । अमृतरूपाया अस्या विरोधो पि न सम्भवति कुतस्तु विनाशः तथापि वक्तुर्विवक्षावशान्निरोधे व्यपदिश्यमाने महाबिन्द्वात्मकनिष्कलासनमारूढं निष्कलं परमं तत्त्वं तत्त्वोत्तीर्णमपि परतत्त्वरूपेणोपवर्ण्यमानं नित्यलीलारसोल्लासपरं स्वात्मनि साक्षात्क्रियते । "सामरस्य गुणगतमनादि-मिथुनं वाग्र्थयुगलमेव निरज्जनं पर ब्रह्मपरमिति वदन्ति"।[1] इति

1· वाक्य० ब्र०का० 143 कारिका भावप्रदीप टीकायाम् ।

नागेशभट्ट मते परादिवाग्विमर्शः

वैयाकरणसिद्धान्त लघुमञ्जूषाग्रन्थस्य शक्तिनिरूपणप्रसङ्गे तदात्म्यशक्तिनियामकसम्बन्धत्वनिरूपणे साक्षादेवशब्दमभिलक्ष्यकृतःसङ्केतः शक्ति ग्राहको भवतीति प्रतिपादयन् अतएव न्याय वाचस्पत्ये उक्तम् - "सर्गादिभुवां महर्षि देवतानामीश्वरेण साक्षादेव कृतश्सङ्केतःतद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केतः इति । तथा योगवाचस्पत्ये उक्तम् - "सैव च शब्दाःसर्वार्थाभिधान समर्थाःइति सर्वैरर्थैःसर्वेषां शब्दानां सम्बन्धः ईश्वर सङ्केतस्तु प्रकाशकः"इति । अतएव "नित्य शब्दार्थसम्बन्धः" (वाक्यप० 1/23) इति तान्त्रिका"इति।। सर्वैरर्थैःसर्वशब्दानां सम्बन्धश्च योगि(ज्ञान)गम्य एव तेषां योगबलेनोभयरूपपराप्रत्यक्षात् उक्तं चैतत् एकस्यैव स्फोटस्य शब्दब्रह्मअवस्थ सर्वशब्दतदर्थोभयोपादानत्वेनोभयरूपताया उभयोरपि तत्कार्ययोरुभयरूपत्वात् ।

क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम् ।
प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् परा ।।

इत्युक्तेः नित्यत्वं तु यावत्सृष्टिस्थित्याव्यवहारनित्यतया च बोध्यम् ।

श्रुतिश्च -

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वा
मेकां वाचमभिष्यन्दमानाम् ।
तामन्ये विन्दुरन्यामिव च
नानारूपामात्मनि सन्निविष्टाम् ।।इति

अभिष्यन्दमानाम् -तत्तद्रूपेणाभिव्यक्ताम् ।अन्यामिव भेदवतीमिव ।
आत्मनिचित्ते ।

"प्राणापानान्तरे देवी वाग्वै नित्यंव्यतिष्ठति ।
स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा: ।।
वैखरीवाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी ।
केवलं बुद्ध्युपादानक्रमरूपानुपातिनी ।।
प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्तते ।
अविभागा तु पश्यन्ती सर्वत: संहृतक्रमा ।।
स्वरूपज्योतिरेवान्त: परावागनपायिनी।।"इति

भारतञ्च ।।

एते श्रुतिभारते हरिग्रन्थे[वाक्य पदीयकारिका ।44] स्पष्टे ।

हरिवंशे -

"अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय:"। इति । "योग्यता-लक्षण:सम्बन्ध:"इत्यादे:कैयटस्य कारणता वच्छेदकधर्मरूप:सम्बन्ध इत्यर्थ: । तत्त्वमस्या-[छान्दो0उप0 6/8/7] दि वाक्यस्याखण्डार्थेन शुद्धेनापि ब्रह्मणा ध्यासिकं तादात्म्यम्"। एवं हि नागेशेन वैयाकरणसिद्धान्तलघु-मञ्जूषायामेतेन व्याख्यानेन वाच: चतुर्विध्यं स्वीकृतम् । परा,पश्यन्ती, मध्यमा,वैखरीति । अत्रोत्तरोत्तरं स्थूलत्वं बोध्यम् । स्थूलक्रमेण तत्स्वरूपं व्यवस्थापयन् एवोच्यते -"प्राणापानान्तरे" इत्यादय: । सर्वेषां प्राणिनां प्राणापानवाय्वोरन्तरे मध्ये वाग् रूपा देवी नित्यं तिष्ठतिस्म । प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी प्राणव्यापाराभिव्यक्ता सैव वाक् स्थानेषु कण्ठादिषु वायौ विवृते विवर्तरूपतां प्राप्ते सति कृतवर्णपरिग्रहा ककारादिवर्णरूपा परश्रवणग्राह्या वैखरीत्युच्यते ।

---

1. वैया0 सि0 ल0 म0 श0 निरूपणे 42 पृष्ठे ।

"प्राणेनाप्यायिता सेयं व्यवहारनिबन्धिनी"।।इति

प्राणवायुवृत्तिं व्यापारमनुसृत्य तत्तच्छब्दविशेषतदर्थविशेषोल्लेखिन्या बुद्ध्या विषयीकृता परश्रवणग्रहणयोग्या सूक्ष्मा मध्यमा वागुच्यते । सूक्ष्मत्वं वैखरीमपेक्ष्य एव । अविभागा कार्यकारण विभागरहिता इति । सर्वत: संहृतक्रमा: वर्णक्रमरहितेत्यर्थ: । योगिनां समाधौ सविकल्पकज्ञानविषय: पश्यन्तीत्युच्यते । अन्त:मूलाधारे ज्योति:स्वरूपा नपायिनी:उक्तरीत्या सूक्ष्मतया नित्या परावागभिधीयते इति ।

एवं हि सृष्टौ परादिवाङ्·निरूपणे पि महामहोपाध्याया: श्रीमन्त: नागेशोपाध्याया: वाक्चतुष्टयत्वं शक्त्याश्रयनिरूपणप्रकरणे निरूपितम्[1] ।

महाभाष्ये पस्पशाह्निके उपात्ताख्ये व स्वव्याख्याने पि नागेशभट्टै: वाक्चतुष्टयात्मकसिद्धान्त: स्वीकृत: ।।

1· वै० सि० ल०म०शक्त्याश्रयनिरूपणम् पृ० 145 त: 148

नागेशाभिमत परादिवाग्विमर्शः तन्त्रानुसारी एव

तान्त्रिकास्तु शब्दार्थयोस्तादात्म्यमभेद सम्बन्धेति पदेनोच्यते । अत्र मते वाच्यवाचकभावस्थितिस्तु वाचकःशब्दः वाग्रूपा विमर्शाख्यःशक्तिपरकः, वाच्योऽर्थश्च प्रकाशरूपःशिवपरकः तयोःपरस्परमभेदः । अत एव शब्दार्थयोःपरस्परमभेदेनान्वयः । विश्वसर्गःशिवशक्तिसामरस्यादेव जायते । तच्च सामरस्यमभेदेन, अभेदश्च शब्दार्थरूपयोःशिवशक्त्योः अपार्थक्येनस्थितिः । अत एव रघुवंशमहाकाव्यस्यादौ मङ्गलश्लोकेनकविकुलगुरुः कालिदासः कथयति -

"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।[1] इति

अत्रेदं - परावागात्मनाहतभट्टारकपरशिवस्वरूपा षट्त्रिंशत्तत्त्वप्रसरणहेतुभूता संविदेवमातृकापदेनोच्यते तन्त्रशास्त्रे नित्याषोडशिकार्णवादिग्रन्थेषु । सा एव मातृका वर्णमेलनेन मन्त्र -शब्दवाग्रूपं धत्ते । शब्दराशिर्मातृका मालिनी कालिकेत्यादिभिःपदैस्तत्रतत्र शास्त्रेषूच्यमाना परभैरवीयपरावागात्मिका मातृकैव ज्येष्ठारौद्र्यम्बिकाख्यशक्तिप्रसरणभेद वैचित्र्येण सर्ववर्णादिकारणभूता वर्णसङ्घट्टशरीराणां सप्तकोटिमहामन्त्राणां जननी । अत एव तन्त्रसद्भावे -

सर्वेवर्णात्मिका मन्त्रास्ते च शक्त्यात्मकाःप्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका।।[2] इति

---

1. रघुवंशमहाकाव्ये प्रथमसर्गे श्लोक सं० ।

2. तन्त्रसद्भावे 1-4

इत्येवं सा वर्णिता -

एवं हि -

अखिलगनाद्यमूर्तिनागुत्पत्तीर्णस्वरूपिणीलरति ।
कायति नानानामप्रपञ्चरूपेण मातृका देवी ।।[1] इति च ।

अयम्भाव: - शिवशक्त्यादिप्रतिनियतव्यपदेशसहिष्णु-रनाख्य:परपरामर्शात्मानुत्तर: प्रकाशरूव परं तत्त्वम् ।स एव स्वातन्त्र्याद् विश्वमवविभासयिषु: प्रथमं शिवशक्तिरूपतां स्वातन्त्र्यमवभासयति, अकारादि हकारान्तां मातृकामुल्लासयतीति यावत् । अनुत्तर लिपि-रकार: विमर्शलिपिश्च हकार: ।

एतदर्थम् -

अकार:सर्ववर्णाग्र्य: प्रकाश:परम: शिव: ।
हकारो ऽन्त्य:कलारूपो विमर्शाख्य:प्रकीर्तित:।।[2] इति

वचनमुपोद्बलयति ।

तन्त्रालोके च -

अकुलस्यास्य देवस्य कुलप्रथनशालिनी ।
कौलिकी सा पराशक्तिरवियुक्तो यया प्रभु:।।इत्यनेन च स एवार्थ:प्रतिपादित: । पुनश्च सा शक्ति:वेत्युत्कण्ठायामुच्यते -

---

1· सौभाग्यसुधोदये 1·6

2· सङ्केतपद्धत्याम्

वैयाकरणसिद्धान्त लघुमञ्जूषाकारास्तु

तादात्म्यशक्तिनियामकसम्बन्धत्वनिरूपणे साक्षादेव शब्दमभिलक्ष्यकृत: सङ्केत:शक्तिग्राहको भवतीति प्रतिपादयन् - अत एव न्यायवाचस्पत्ये उक्तम् सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृत: सङ्केत: तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केत: इति । तथा योगवाचस्पत्ये उक्तम् -

"सर्वे च शब्दा:सर्वार्थाभिधानसमर्था:इति सर्वैरर्थै:सर्वेषां शब्दानां सम्बन्ध:,ईश्वर: सङ्केतस्तु प्रकाशक:। अतएव "नित्य:शब्दार्थ सम्बन्ध:" (वाक्यप० 1/23) इति तान्त्रिका:"इति । सर्वैरर्थै: सर्वशब्दानां सम्बन्धश्च योगि(ज्ञान) गम्य एव तेषां योगबलेनोभयरूपपरप्रत्यक्षात्, युक्तं चैतत् एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोभयोपादानत्वेनोभय-रूपतया उभयोरपि तत्कार्ययोरुभयत्परत्वात् ।

क्रियाशक्तिप्रधानाया:शब्दशब्दार्थकारणम् ।
प्रकृतेर्विन्दुरूपिण्या:शब्दब्रह्माभवत् पुरा ।।इत्युक्ते:

नित्यत्वं तु यावत्सृष्टिस्थित्या व्यवहारनित्यतया च बोध्यम् । श्रुतिश्च -

सूक्ष्मार्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।
तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टाम्।।

अत्र ह्यभिष्यन्दमानाम् - तत्तद्रूपेणाभिव्यक्ताम् । अन्यामिवभेदवतीमिव । आत्मनि -चित्ते ।

प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति ।
स्थानेषु विवृते वायौ कृतवर्ण परिग्रहा: ।।

वैखरीवाक्प्रवक्तृणां प्राणवृत्तिनिबन्धिनी ।
केवलं बुद्ध्युपादानक्रमरूपानुपातिनी ।।

प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ।
अविभागा तु पश्यन्ति सर्वत: संहृतक्रमा ।।

स्वरूपज्योतिरेवान्त:परावागनपायिनी" ।।इति भारतं च ।। एते श्रुतिभारते हरिग्रन्थे [वाक्य०टी०का०।कारिका ।44] स्पष्टे ।।

हरिवंशे पि-

"अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय:"इति ।

यो ग्यतालक्षण:सम्बन्ध:"इत्यादे:कैयटस्य कारणता वच्छेदकधर्मरूप: सम्बन्ध इत्यर्थ: । तत्त्वमस्या [छन्दो०उप०6/8/7] दिवाक्यस्याखण्डार्थेन शुद्धेनापि ब्रह्मणा ध्यासिकं तादात्म्यं । एवं हि नागेशेन वैयाकरणसिद्धान्त मञ्जूषायामेतेन व्याख्यानेन वाच:चातुर्विध्यं स्वीकृतम् परा,पश्यन्ती, मध्यमा,वैखरीति । अत्रोत्तरोत्तरं स्थूलत्वं बोध्यम् । स्थूलक्रमेण तत्स्वरूपं व्यवस्थापयन् एवोच्यते "प्राणापानान्तरे"इत्यादय:। अत्राभिप्रायस्तु सर्वेषां प्राणिनां प्राणापानवाय्वोरन्तरे मध्ये वाग्रूपादेवी नित्य तिष्ठतिस्म । यथोक्तृणां प्राणवृत्तिनिबन्धिनी प्राणव्यापाराभिव्यक्ता वैव वाक् स्थानेषु कण्ठादिषु वायौ विवृते विवर्तरूपतां प्राप्ते सति कृतवर्ण- परिग्रहाक्कारादिवर्णरूपा परश्रवणग्राह्या वैखरीत्युच्यते -
तदुक्तम् -

"प्राणेनाप्यापिता देवी व्यवहारनिबन्धिनी"।इति

1· वै० सि० ल० मञ्जूषा शक्ति नि० 42 पृ० ।

प्राणवायुवृत्तिं व्यापारमनुसृत्य तत्तच्छब्दविशेषतत्तदर्थ-विशेषोल्लेखिन्या बुद्धया विषयीकृतापरश्रवणग्राहणयोग्या सूक्ष्मा मध्यमा वागुच्यते । सूक्ष्मत्वं वैखरीमपेक्ष्य एव । अविभागा कार्यकारणविभाग-रहिता इति । सर्वत: संवृतक्रमा :वर्णक्रमरहितेत्यर्थ: । योगिनां समाधौ सविकल्पकज्ञानविषय:पश्यन्तीच्युत्यते । अन्त: मूलाधारे ज्योति:स्वरूपा-नपायिनी: उक्तरीत्या सूक्ष्मतया परावागभिधीयते इति ।

एवं हि सृष्टौ परादिवाङ्•विरूपणे पि महामहोपा-ध्याया:श्रीमन्त:नागेशोपाध्याया:वाक्चतुष्टयत्वं शब्दस्याश्रयनिरूपणप्रसङ्•गे निरूपितम् ।[1]

महाभाष्ये उद्योताख्याने महामतिभिर्नागेशभट्टै:शब्दविषये वाग् विषये च ये विचारा उपपादितास्ते नूनं निचारार्हा:। वैयाकरणा-नान्निकाये वाच:प्रायस्त्रैविध्यमे स्वीकृतम् परं महामतिर्नागेशस्तन्त्रागम-राद्धान्तमनुं विषये याथातथ्ये नाङ्•गीकरोति यतो हि भगवान्भाष्यकारो-

चत्वारि श्रृङ्•गा त्रयो अस्य पादा[2] इति मन्त्रस्य "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च"इत्यस्यमन्त्रस्य व्याख्यां वितनोति। महाभाष्यस्य व्याख्याकारो कैयटो पि तथैव मनुते,परं नागेशोपाध्यायाश्च मन्त्रस्यास्य व्याख्या वाग् विषये तथैवाचरती यथा तन्त्रागमसिद्धान्ते उपपादितमस्ति । उद्योते तेनोक्तम् ---"भाष्ये पदजातानि परा:पश्यन्ती, मध्यमा,वैखरीरूपाणि । अत एवाग्रे निपाताश्चेति चकार:सङ्•गच्छते।"[3]

1• वै० सि० ल० म०शब्दस्याश्रयनिरूपणम् पृ० 145 त: 148

2• महाभाष्ये 1/1/1 पृ० 24

3• " 1/1x1 पृ० 24- 25 उद्योते ।

अत्रैव महोदवो" इति ऋङ्•मन्त्रव्याख्यां "किं रोरवीति, तत्राह - भाष्ये महान्देव इत्यादि । महान् परब्रह्मस्वरूपो देवो न्तर्याभिरूप:शब्दो मर्त्यैववाविष्ट इत्यर्थ: । तदावेशफलमाह - महता देवेनेति । साम्यं सायुज्यम् । तदुक्तं हरिणा-

"अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ।।

आह - च चत्वारि श्रृङ्•गा त्रयो अस्य पादा इत्यादि ऋङ्•मन्त्र: । इह "तौ शब्दात्मानौ कार्यो नित्यश्च । तत्रान्त्य:सर्वेश्वर: सर्वशक्तिर्महान् शब्दवृषभस्तस्मिन् खलु वा योगवित् शास्त्रजशब्दज्ञानपूर्वकं प्रयोगेण क्षीणपाप:पुरुषो विच्छिद्याहङ्•कारग्रन्थीन् अत्यन्तं संसृज्यते इति तदर्थं तद्व्याख्यातार:"।[1] इति

अत्रेदमाकूतम् - "चत्वारि श्रृङ्•गेति" मन्त्रं केचित् प्राकारान्तरेण व्याचक्षते । तथाहि अस्य ब्रह्मण:चत्वारि ऋग्यजु:सामर्थववेदाख्यानि श्रृङ्•गा श्रृङ्•गस्थानीयानि त्रय: कर्मोपासनाज्ञानाख्या:पादा:, द्वे जीवेशरूपे शीर्षे सप्तभूर्भुव:स्वर्मह:जनस्तप:सत्याख्या:अतलवितलसुतलतलातलरसातलपाताल-महातलाख्याश्च हस्तास: करद्वयस्थानीया:, त्रिधा रज:सत्त्वतमोगुर्णैर्बद्ध:, वृषभ: वृषभस्थ: शिव: कल्याणमय:रोरवीति कथयतीति । अत्र शब्दार्थयुगलस्य परामयस्य साम्बशिवस्यैव वर्णनमुपपन्नम् ।

एवमेव "चत्वारि वाक् परिमितापदानि"[2] इति मन्त्रमाश्रित्य तुरीयं वाचो मनुष्या वदन्ति" इति मन्त्रांशमादाय नागेशो ब्रवीति --

---

1• महाभाष्ये 1/1/1 पृ0 25 उद्धृते ।

2• " " पृ0 26

"भाष्ये यन्मनुष्येषु वर्तत इति । ज्ञानविषयतया तद् वाचश्चतुर्थमित्यन्वय: । तस्मात् सकलपदज्ञानाय मनीषित्वाय वाऽध्येयं व्याकरणमिति शेष: । हरिरप्याह - वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतद्दद्भुतम् ।

अनेकतीर्थ भेदाया त्रय्या वाच:परं पदम् ।।

तत्र श्रोत्रविषया वैखरी । मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम् । पश्यन्ती तु लोकव्यवहारातीता । योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति । परायां तु नेति त्रय्या इत्युक्तम् -

स्वरूपज्योतिरेवान्त: परा वागनपायिनी ।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।।

इत्युक्ते: अनेकतीर्थ भेदाया नामाख्यातादिवीणावेणुमृदङ्गशब्दादिरूपानेक भेदाया:। अपि खल्वपि चत्वारि वाक् परिमिता पदानीति ऋङ्मन्त्र इति तद्व्याख्यातार:"इति । अत्र चतुष्पादमिति वचनेन परापश्यन्त्यादिरित्येवायाति । तथा च नामाख्यातो पसर्गनिपातानां मध्ये प्रत्येकं परा पश्यन्ती,मध्यमा ,वैखरी भेदेन चतुर्विधमिति भाव: । किंच परापश्यन्तीमध्यमानां चतुर्थांशं वैखरीरूपमवैयाकरणा: वदन्ति । अत्र हृदयादिपदेन नाभिमूलाधारचक्रे संगृह्येते । यतो ह्युक्तम् -

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।इति

स्मृति,वचनमप्यत्रप्रमाणम् । उद्योतस्यानेक तीर्थभेदाया त्रय्यावाच: परं

---

1. महाभाष्ये 1/1/1 पृ० 26 उद्योते ।

पदमित्यस्य भावस्तु -

"अनेकेति - अनेके तीर्थत: शास्त्रतो भेदा यस्या इत्यर्थ: । वृत्तौ तु वाच: परायाः । तथा च तस्या वाच: एतद् व्याकरणम् अद्भुतं विलक्षणं, परं श्रेष्ठं, पदं स्थानमस्तीत्यर्थ: । तद्व्याख्यानमाह- त्रयीति । तासां मध्ये इत्यर्थ: । श्रोत्रेति - श्रोत्रं विषय: ग्राहकं यस्या इति व्युत्पत्ति: । मध्यमा वागेवास्यपर्यन्तभागच्छता वायुना कण्ठदेशमागत्य मूर्धानमाहत्य परावृत्य कण्ठताल्वाद्यभिघातेन स्थान- विशेषेष्वभिव्यक्ता श्रोत्रग्राह्या सती वैखरी पदाभिधेया । पश्यन्ती वागेव हृदयपर्यन्तमागच्छता वायुना हृदयदेशमागत्याभिव्यक्ता अर्थ- शब्दनिशेषोल्लेखिबुद्धिविषयीभूता सूक्ष्मा कथंन्चित् स्वश्रुतिगोचरा सती मध्यमा शब्दवाच्या । परा वागेव नाभिपर्यन्तमागच्छता वायुना तत्राभिव्यक्तां मनोमात्रग्राह्या सूक्ष्मतरा योगिनां समाधौ सविकल्पक- ज्ञानज्ञानविषयीभूता सती पश्यन्तीपदवाच्या । मूलाधारचक्रे संस्कृत वायुचलनेनाभिव्यक्तं शब्दब्रह्मस्वप्रतिष्ठतया नि:स्पन्द सूक्ष्मतमं योगिनां समाधौ निर्विकल्पकज्ञानविषया परावाग् उक्तन्च -

वैखरी शब्दनिष्पत्ति: मध्यमा श्रुतिगोचरा ।
आन्तरार्था च पश्यन्ती सूक्ष्मा वागनपायिनी।।"[1] इति

एवं हि नागेशभट्टा: वाग् विषये वैयाकरणसरणिमनादृत्य तन्त्रागमसरणिं गृहीतवन्त: । वस्तुतस्तु परा वागेव मूलत: समग्र- विश्वविस्तारजननी मूलचक्रस्था कुण्डलिनी रूपा । तां परिहृत्य को पि वाग्व्यवहार: साधयितुं न शक्य: । अतो नागोजिभट्टानां परायामभिनिवेश: युक्त एवेति विभावयन्तु सुधिय: ।

---

1. महाभाष्ये 1/1/1 पृ० 27 उद्योते ।

तन्त्रागमव्याकरणागमयोरैक्यम्

भारतीया हि संस्कृतिर्निगमागममूला । निगमो वेद: आगमश्च वेदोपयिकस्मृत्यनुमोदितो लोककल्याणकर:पन्था: । आगमस्यैवापरसंज्ञा तन्त्रमिति । अतस्त न्त्रागमयो:परस्पराभेदेन प्राय: सर्वत्र शास्त्रे प्रावतनो व्यवहार: । शास्त्रे ऽस्मिन् विषमप्यमृतायते, भोगोऽपि योगायते । कुत एवंविमित्याकाङ्क्षायामुच्यते यदस्य साधनाशास्त्रस्योपदेष्टा साक्षाच्छिव:, श्रोत्री च सर्वानुग्राहिका श्रीराजराजेश्वरी पराम्बा त्रिपुरसुन्दरी । क्वचिच्च श्रोता शिव: उपदेष्ट्री पराम्बा, विषयश्च साक्षाद् वासुदेवा । अत उक्तं विपश्चिद्भि: "अन्त:शाक्ता बहि: शैवा सभामध्ये च वैष्णवा:"[1] इति । एवं भूत्वेह परलोके चानायासेन साधनक्षमो यं तन्त्रागममार्ग: ।

आगमशब्दनिर्वचनम्

आगमशब्देरक्षरत्रयस्य "आगतं" गतं ""मतं" चैषां सन्निवेशो दृश्यते । तदनुसारेण "आ समन्ताद् गमयति अभेदेन शिवादिधरण्यन्तं पारमेशं स्वरूपं विमृशति" इत्यागमशब्देन परशक्तेरेव ग्रहणात् परशक्तिरेवागम इति । स चागमो ज्ञानरूपो नन्तशास्त्रेषु व्यवहृतो भवति । तदुक्तम् -

"आगमो ज्ञानमित्युक्तं ध्यनन्ता: शास्त्रकोटय: ।
शास्त्रं शब्दात्मकं सर्वम् ---------------[2]।।इति

1· शाक्तानन्दतरंगिणी भूमिकायां पृ० ।

2· स्वच्छन्दतन्त्रे 4/34

स वागमो भगवतो महेश्वरस्येशानतत्पुरुषाघोरवामदेव-सद्योजातात्मकस्य ज्ञानात्मकस्य पञ्चमुखस्य प्रभावादे-वोदेति । निखिलशास्त्रनिष्णातात् गुरोः शम्भुमुखादागमज्ञानं परम्परातःस्फुटम् । तस्मादत्र शास्त्रे सूक्तिरियं सर्वत्र सिद्धान्तरूपेणोल्लसति -

आगतं शिववक्त्रेभ्यो गतं च गिरिजानने ।
मतं हि वासुदेवस्य तस्मादागम उच्यते ।।[1] इति

महामतिना भर्तृहरिणा पि आगमस्य ज्ञानात्मकत्वं स्फुटं स्वीकृतम् ।

यथा -

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ।।इति ।।

किञ्च, प्रत्यक्षेणाकलितमपि वस्त्वागमप्रामाण्यादेव प्रामाण्यमादधाति । अतस्तुर्यतदतीतदशयोर्य परः साक्षात्कार, स एव वस्तुतो मुख्यतया "आसन्मतादर्थं शिवादिधरण्यन्ततत्त्वजातं गमयति पारमार्थिकस्वरूपस्तथाविधस्वभाव तच्च बोधयति साक्षात्कारयति इत्यागमो न्वर्थनामा । इदमेव मतं श्रीमताभिनवगुप्तपादानामीश्वरप्रत्यभिज्ञाविमर्शिन्यां विवृत्तिविमर्शिन्यां च क्रियाधिकारे प्रमाणविरूपान्हिके प्रतिपादितमुपलभ्यते ।।[3]

---

1. रुद्रयामलवचनम् ।

2. वाक्यपदीये 1/4।

3. शाक्तानन्दतरङ्गिण्यां भूमिकायां पृ० 1,2 तो ।

किन्च, ज्ञानस्याधिष्ठातृदेवयो:शिवशक्त्योस्तत्तत् शास्त्रेषु प्रतिष्ठानात्तन्त्रे च तस्यैव तत्त्वयुग्मस्याधाराच्छिवशक्त्योर्व्यापकत्वम् सर्वतत्त्वन्वानायासेन सिद्धम् । व्याकरणशास्त्रस्यागम इति पदव्यवहारादागमसिद्धान्तेन व्याकरणसिद्धान्तानामभेदान्नागेशागमतन्त्रशास्त्रसिद्धान्ता:स्वव्याकरणकृतिषु स्पष्टतया सादित इति नात्र काचिच्चित्त्रम् ।

एवं हि -

"अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात् ।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ।।
अमूर्ताद् गगनादद्दन्निर्घातो जायते महान् ।
शान्तात् संविन्मयस्वाच्च तच्छब्दाख्यं शास्त्रम्[1] ।।इति

तन्त्रसद्भावे हि - मातृकैव शक्तिरूपिणी,शक्तिश्च मन्त्ररूपिणी,मन्त्राश्च, वर्णात्मका:पदात्मका वेति कृत्वा मातृकाया:शक्तिरूपताया:तत्त्वेन शिवरूपता सिद्धति । ततश्च सर्वेषां शास्त्राणां ज्ञानानां च मातृका एव कारणानीति विचारयन्नाह -

"सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मका प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ।।[2] इति

तथा च मन्त्रदेवतयोरैक्ये सति शिवशक्त्योरैक्याच्छब्दार्थयो:रैक्यं संगच्छते । तथाहि -

---

1· स्वच्छन्दतन्त्रे 4 पटले

2· तन्त्रसद्भाववचनं नित्याषो शिकार्णव भूमिकायां पं०व्रजबल्लभद्विवेदि विचरचितायां 62 पृष्ठे ।

तथा च मन्त्रदेवतयोरैक्ये सति शिवशक्त्योरैक्याच्छब्दार्थयो रैक्यं संगच्छते । तथा हि -

"चिदात्मैव हि देवो न्त: स्थितमिच्छावशाद् बहि: ।
योगीव निरुपादानमर्थजातं प्रकाशते ।।[1] इति

शब्दानां मूलं पराम्बा, अर्थानाञ्च मूलं परमेश्वर: शिव: । इममेव सिद्धान्तं "वागर्थाविव सम्पृक्तौ-------पार्वती परमेश्वरौ"[2] इति पदेन कविकुलगुरु:कालिदासो पि मनुते । तदेव हि मतं वायवीयसंहितायाम् -

"शब्दजातमशेषं तु धत्तेशङ्करवल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखर: ।।[3] इति

किन्च, परमेशितु: हृदयबीजमेवाखिलं तत्त्वजातं बहि: प्रकाशते इत्येव तात्पर्यमवसीयते । अत्र इदमवधेयम् -यत् आत्मस्य मेवाखिलतत्त्वजातं यदा परमशिवभट्टारक: बहि:प्रसारयति तदा बुद्धिस्थमेवज्ञानं बहि तत्तदाकारेण परिणमिव इति वैयाकरणानां कथनं तन्त्रपन्थानमेवानुकरोति । यतश्च -

"यथा न्यग्रोधबीजस्थ: शक्तिरूपो महाद्रुम: ।
तथा हृदयबीजस्थं विश्वमेतच्चराचरम्[4] ।।इति

---

1. ईश्वरप्रत्यभिज्ञायां ।/5/7
2. रघुवंशमहाकाव्ये ।/।
3. वायवीय संहितायाम् ।
4. परापावेशिकायां पृ० सं० ।।

"तुरीयं वाचो मनुष्या वदन्ति" इति निगमवचनेन परा पश्यन्त्याद्यपेक्षया परवर्या एव व्यवहारभूमानुपयोगात्तदाधारभूतं वर्णसमाम्नायं भगवान् विश्वात्मा परमेश्वर:परमकारुणिकया प्रीत्या-पाणिनये समुपादिदेश ढक्कानिनादेन नवपञ्चवारम् । तदेवानुसृत्य महावैयाकरणेन भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां तच्छिष्येण वरद-राजाचार्येण लघुसिद्धान्त मध्यसिद्धान्तकौमुद्यान्च---इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि"[1] इत्युक्तम् ।

"मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरमिति वचनात्[2] भट्टोजि-दीक्षितविरचितमनोरमा एवोमा स्वरूपभूता लघुशब्देन्दुशेखर: एव शिवस्वरूपभूत: अत: कौमुदीगतविचारप्रकर्ष मनोरमायां तद्गतविचार-प्रकर्षञ्चशेखरे इति परम्परयोत्तरोत्तरं प्रामाण्यात् माहेश्वरसूत्रगत-वर्णसमाम्नायवैशिष्ट्यविवेचनं लघुशब्देन्दुशेखरे प्रभूतं वर्तत इति स्वोक्त्या एव भट्टनागेश: अङ्गीकरोति । किन्च लघुशब्देन्दुशेखर इति स्वग्रन्थ-संज्ञाविधानेन शब्दस्वरूपस्य शक्त्यभिन्नशिवस्यैवार्थजातस्य" तनुते र्थ-प्रकाशमिति ग्रन्थादौ मङ्गलमाचरणात् ग्रन्थे शब्दाडम्बरापेक्षया र्थस्यै-वप्राधान्याच्छब्दार्थयो:शक्तिशिवरूपयोरर्थस्य र्थस्यैवप्राधान्याच्छब्दार्थयो: शक्तिशिवरूपयोरर्थस्य शिवरूपता संगच्छते अत: नागेशस्य शब्दराशे: शिवत्वस्वीकारप्रकार: तन्त्रागम संस्कारस्यैव माहात्म्यं द्योतयति ।

1· सिद्धान्त कौमुद्यां संज्ञाप्रकरणे ।

2· लघुशब्देन्दुशेखरे आदौ मङ्गलाचरणे श्लोक सं० 3

"ज्ञानमिच्छेन्महेश्वरादि"इत्यभियुक्तक्तेन माहेश्वराणि अणादिसंज्ञार्थानि "चतुर्दशसूत्राणि व्याकरणोपजीव्यानि "रक्षोहागमलघ्वसन्देहाः"[1] इत्यर्थानि "ते सुराः"इत्यारभ्य"सुदेवो असि वरुण"[2] इत्यन्तानि च समुल्लसन्ति इति महाभाष्यात् , तत्र नागेशस्य "कृतभूरिपरिश्रमात्" लघुशब्देन्दुशेखर ग्रन्थाच्चावगम्यते । अतः महेश्वरसकाशादागमनाद् व्याकरणशास्त्रस्यापि "व्याकरणागम"नामागमशास्त्रानुबन्धित्वं साधयति । अतः नागोजिभट्टाः स्वरचनाव्यागमसिद्धान्तान्नैवोपजीव्यत्वेनाङ्गीचक्रुः । अतः ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्यामुक्तम् -

"प्रतिमानलक्षणा इयं शब्दभावनाख्य आगम एवेति".[3]

स्वच्छन्दतन्त्रे च -

"यदृच्छाविग्रहाच्छान्ताच्छिवात्परमकारणात् ।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ।।

अमूर्ताद् गगनाद्ध्वन्निर्धातो जायते महान् ।
शान्तासंविन्मयाच्च तद्वच्छब्दाख्यं शास्त्रम्[4] ।।इति

एवं स्वच्छन्दतन्त्रस्य चतुर्थपटले -

"आगमो ज्ञानमित्युक्तमनन्ताःशास्त्रकोटयः"।इतिव्याख्यायां

1· महाभाष्ये पस्पशा० । अ० म।पादे
2· " " "
3· ई० प्र० वि० वि० पृ० 93
4· " " 97 तमे ।

--------आ समन्ताद् गमयति अभेदेन विमृशति पारमेशं स्वरूपमिति कृत्वा परशक्तिरेवागम: तत्प्रतिपादकस्तु शब्दसन्दर्भ: तदुपायत्वात् शास्त्रस्य"इत्युक्तम्[1] ।

चतुर्दश-माहेश्वरसूत्रविषयकवैयाकरणानां सम्मति:

ननु चतुर्दशसूत्र्यक्षरसमाम्नाय इति व्यवहारानुपपत्तिरा- म्नायसमाम्नायशब्दयोर्वेदे एव प्रसिद्धेरित्यत आह - माहेश्वराणीति। माहेश्वरादागतानीत्यर्थ: महेश्वरप्रसादलब्धानीति फलितम् ।एवन्चैव- मानुपूर्वीका श्रुतिरेवैषा । तत्प्रसादात्पाणिनिना लब्धा ।श्रुतिमूलकत्वा- दस्यैव वेदाङ्गत्वम् । अत हि -

"येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं ---------।।[1]"इति

शिक्षावचनम् ।"लण् सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति-व्याख्यानत इति"इत्यादावाचार्य पदेन महेश्वर:"[2] इति । नागेशभट्टस्य चतुर्दश- माहेश्वरसूत्रविषये यं सिद्धान्त:यत् आनुपूर्वीका श्रुतिरेवैषां" इति स्वच्छन्दतन्त्रेणादि पुष्णाति । तथा च -

" मन्त्राख्यं तु महाज्ञानमीशानात्तु विनिर्गतम्[3] ।।"इति

1· स्वच्छन्दोद्योते 4 पटले पृ० 214 तमे ।

2· पाणिनीय शिक्षायाम् 57

3· लघुशब्देन्दुशेखरे संज्ञा० प्र० पृ० 6

सदाशिवाख्यसूर्यस्योद्धर्षमुखादहर्निशं ज्ञानं निर्गच्छति । तद् ग्रहणाय तदनुरूपाया:शक्ते: आवश्यकता वरीवर्ति । सा च गिरिजाख्याशक्ति: कस्यचित्साधनसम्पत्तियुतस्यभाग्यशालिनो न्त:करणे सम्मुद्भय ज्ञानधारामात्मसात्करोति । तमेव महाभागेभ्य: मुनिभ्य: सा तन्महेश्वरज्ञानमाविष्करोति । एष एवायास:लोके आगमपदेन व्यवहृयते । अत: महेश्वरादागतं गिरिजायां गतन्वमत-स्मागमपदेन व्यवहृयते तन्त्रराद्धान्ते । यथा -

आगत: शिववक्त्रेभ्यो गतश्च गिरिजानने ।
मतश्च हृदयाम्भोजे तस्मादागम उच्यते ।।[1] इति

महामतिर्नागोजिभट्ट: अनुबन्धानामपि माहेश्वर कर्तृकं साधयति "अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदं स्फुटीभविष्यति"[2] इत्यनेन । एतेनानुबन्धानामप्यानर्थक्यं न जायते । "इको यणचि"[3] इति भाष्ये पि वर्णानामनर्थकत्वा न्निराकृतम् ।

"सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्" इति । वर्णसमाम्नाये किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चि-द्दृष्टादृष्टार्थवत्, सर्वथा नर्थकं न किञ्चिदस्ति तदर्थ: । "वृद्धिरादैच्"[4] इति सूत्रभाष्ये पि वर्णानामप्यनर्थकेन न भवितव्यम् इति विवेचनाद-नुबन्धानामप्यनर्थकत्वं नास्तीति -वैयाकरणा: आमनन्ति ।

---

1. वाचस्पत्यं कोषे रुद्रयामलवचनेन निरूपणं पृ० 616 तमे ।
2. लघु० श० संज्ञा प्र०पृ० 6
3. अष्टाध्यायाम् सू० सं० 6/1/70
4. " " 1/1/1

लघुशब्देन्दुशेखरे पुनश्च - "अत एव" "सो ऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्दतारकवत् प्रतिमण्डितो ब्रह्मराशिः" इति भाष्यमुपादायोक्तं भर्तृहरिणा - "यथैवेदमब्दुकिन्नं चन्दतारकादि एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ता ऽस्ति एवमेव वेदपारम्पर्येण स्मर्यमाणः" इति । आधुनिकः शरीरी । पुष्पितत्वं तन्मूलकशब्दशास्त्रद्वारेण । शब्दप्रयोगेण च फलितत्वम् । उक्तञ्च - काशिकायाम् -

"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णं चतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥इति

धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम् । अतएव "अनुबन्धकरणार्थश्च वर्णानामुपदेशः" इत्युक्तं भाष्ये । अत्र करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम् । तत्करणञ्चोपदेशकर्तृकमेव प्रत्यासत्तेः । तेन तद्व्यतिरिक्तस्य तदस्यानादित्वं सूचितम् । अत्र सनकाद्युद्धरणेच्छयास्य ब्रह्मोपदेशरूपत्वं सूचितम् । अत्र सनकाद्युद्धरणेच्छया ऽस्य ब्रह्मोपदेशरूपत्वं सूचितम् । तच्च श्रुतित्वाभावे न सङ्गच्छेत । "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्युक्तेः ।

नागेशोक्तौ प्रमाणप्रदर्शनवाक्ये वर्णचतुर्दशमित्यस्य व्याख्यानन्तु वर्णाश्चतुर्दश इत्यर्थं आर्षसाधुत्वम् । अन्यथा वर्णाश्चतुर्दशो क्वचित्पाठः

---

1. लघु० श० सं० पृ० सं० 7

2. नवा० महा० चौखम्बा प्रकाशने भूमिकायां पृ०सं० ।

अत्रोदाहरणे प्रकतर्कै: प्रमाणैश्च चतुर्दशसूत्राणामनादित्वं कूटस्थत्वमविचालित्वञ्च नागोजिभट्टेन सूचितम् ।

वर्णानामनादित्वं माहेश्वरत्वमेवास्ति इत्यत्र श्रुतिप्रमाणमपि नागेशेनोद्धृतम् । श्रूयते हि पाणिनेप्राक् बहवो वैयाकरणा: आसन् । परम्परैयमीश्वरादारभ्य यथोत्तरं मुनीनां प्रामाण्यमभ्युपागच्छन् पाणिनि पतञ्जलिपर्यन्तमागच्छति । उक्तञ्च -

इन्द्रश्चन्द्र: काशकृत्स्नापिशलिशाकटायन: ।
पाणिन्यमरजैनेन्द्रा: जयन्त्यष्टौ हि शाब्दिका: ।।इति

उक्तरीत्या प्रवाहानादितया व्याकरणशास्त्रस्याप्यनादित्वं सुतरां सिद्धम् । तत्रानेके व्याकरणतत्त्वविद: पाणिने:पूर्वं बभूवु:येषां मूलमाकलय्य पाणिनि: अष्टाध्यायीनिर्ममे अत: पाणिने:पूर्वं शाकटायनप्रोक्तस्य शाकटायनव्याकरणस्य स्थिति: पूर्वमासीदिति ऐतिह्यविद: विदन्ति एव । तत्र शाकटायन ऋषिव्याख्याधारमादाय नागोजिभट्ट: माहेश्वरसूत्रवैशिष्ट्यं पुनरालोचयति -

"ऋक्तन्त्रव्याकरणे शाकटायनो पि---"इदम क्षरच्छन्दो वर्णश: समनुक्रान्तं यथा चाया ऊर्ध्वब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विदमक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद्ब्रह्मराशि:"इति ।ब्रह्मराशिरित्यस्य ब्रह्मप्रत्तिपादको वर्णराशिरित्यर्थ: ।

१· नवा० महा०चौखम्बा प्रकाशने भूमिकायां पृ०सं० ।

तत्त्वञ्च नन्दिकेश्वरकृतकाशिकायां स्पष्टम् । पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण तदर्थ इति तदर्थः । स चाणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः । एवञ्चाक्षरसमाम्नायोपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम् । अन्योपदेश इति वक्तव्ये चान्योपदेशपदप्रयोगः । अत एवास्य ज्ञाने सर्ववेद पारायणजं पुण्यं फलमिति भाष्ये उक्तम् । व्याकरण-[1] मुपक्रम्य "वेदानां वेदः" इति छान्दोग्यश्रुतिरप्येतत्परैवेति ।"

एतेन चतुर्दशसूत्राणामनादित्वं सर्ववेदपारायणफलशालित्वं वेदानामपिवेदत्त्वं नागेशोक्तिः साधयति । व्याकरणागमस्य प्रक्रिया-परिष्कारः दर्शनञ्चेति त्रीणिरूपाणि साधयन्ते शाब्दिकैः । तत्र दर्शन-पक्षमादायैवमुक्तिः नागेशभट्टस्य । वाग् व्यवहारमाश्रित्य प्रवृत्ति-निमित्ताश्रयतामर्थबद्धातुप्रभृतीनां संज्ञा परिभाषादि षड्विधसूत्राणां प्रक्रियाप्रवृत्तिः निर्दुष्टलक्षणसमन्वयार्थं परिष्कारः, वाक्तत्त्वविमर्शाय दर्शनदृष्टिरिति व्याकरणाध्ययनस्य प्रयोजनानि । वाक्तत्त्वमयाशब्द-रूपा हि वेदाः तद्रक्षणाय व्याकरणाध्ययनस्य प्रयोजनमिति महाभाष्य-कारस्य पतञ्जलिमुनेः वाक्यपदीयकारस्य भर्तृहरेः, तट्टीकाकर्त्रोः पुण्य-राजहेलाराजयोश्च भूयसा प्रयासः दृश्यते । तदत्र पाणिनीय व्याकरण व्याख्यातृपरम्परायामधुना नागेशएवावसानसीमामधिरोहति । तदत्र स्वप्रबन्धेषु व्याकरणशास्त्रस्य दर्शनस्वरूपविवेचनेन नागोजिभट्टाः महाभाष्यो-द्योतदारभ्य परिभाषेन्दु लघुशब्देन्दु-मञ्जूषा प्रभृतयो ग्रन्थाप्रणीतवन्तः ।

1• लघु० संज्ञा ० प्र० पृ० सं० 7

====================================

चतुर्थोऽध्याय:

1· शिवदृष्टि ग्रन्थरीत्या परादिवाग् विमर्श:

2· अन्यपाक्तनतन्त्रागमग्रन्थानुसारं परादिवाग्-विमर्श:

3· कुण्डलिनीशक्तेरेव परादिशब्दव्यवहार:

4· षट्चक्राणां परिचय:

5· शिवशक्त्यो:सामरस्ये प्रकाशविमर्शतत्त्वनिवपत्ति: ।

====================================

चतुर्थोऽध्याय:

शिवदृष्टिग्रन्थरीत्यापरादिवाग्विमर्श:

सर्वं शिवरूपमिति स्वसंवेदनसिद्धे व्यवहारमात्रं साध्यमिति स्थिते वाद्यन्तरविमतिं निराकारेष्यन् परदशात: प्रभृति घटपटादि स्थितिपर्यन्तमेवं रूपशिवतावस्थितिसादृश्यप्रतिपादनं प्रस्तौति -

स यदास्ते चिदाह्लादमात्रानुभवतल्लय:
तदिच्छा तावती तावज्ज्ञानं तावत्क्रिया हि सा ।।
सुसूक्ष्मशक्तित्रितयसामरस्येन वर्तते ।
चिद्रूपाह्लादपरमो निर्विभाग:परस्तदा ।।[1] इति

"शिवैक्याख्यातिरूपभ्रान्तिमयसंसारावस्था यावन्नोन्मिषति, तावदपि तावत्यैवोक्तरूपशिवता । तथा च शक्तिपञ्चकमपि तदानीमेकरूपमपि व्यवहारापेक्षया कार्यसंभवादस्त्येव । तथा हि परापरावस्थायां यो हमिति सहजप्रत्यवमर्शात्मा प्रकाश:, स एव परानपेक्ष:पूर्णत्वादानन्दरूपो निर्वृत्तचिन्मय:स्थित एव । सैव स्वतन्त्रा मुख्या शिवता । तदुक्तं चिदाह्लादेति । पूर्णचिदानन्दमात्रे नुभव:प्रकाशनं न तु बाह्ये, तत एव तत्रैव त्रयो यस्य स तथा । अनेन निर्वृत्तचित्स्थिता । इच्छाज्ञानक्रियास्तु भिन्नविषयाद्यपेक्षया स्फुटीभवन्ति ।परावस्थायां पुन:पूर्णो हमित्येव स्वस्वभाव:प्रकाशते, तावत्प्रकाशत्वात् तदेव ज्ञानं, संरम्भरूपत्वात् सैव क्रिया, तत्स्वभावेन तदभ्युपगमादिच्छापि स्थितैवेत्याह तदिच्छा तावतीति ।तावच्च स्वरूपं क्रियेति योज्यम् । अथवा तावज्ज्ञानमिति तावच्छब्द: क्रियायां स्त्रीलिङ्ग:परिणमनीय: । द्वितीयस्त्वन्ते तावच्छब्द:क्रमार्थ:परापराद्यवस्थापेक्ष:। अतएव भिन्नविषयाभावे पि अभ्युपगमप्रकाशसंरम्भाणां

----

1. शिवदृष्टौ 1/3-4

सर्वदा प्रकाशमयत्वेनाविचलनादिच्छादिव्यवहार योग्यतैवेत्युक्तं सुसूक्ष्मेति। सुसूक्ष्मत्वमीषितव्याद्यभावेन विभागापरिकल्पनात् । अत एव शक्तिसामरस्यं पूर्णचिन्मात्रप्रकाशनात्मत्वात् चिद्रूपाह्लादपरत्वं चोक्तम् । सैव च निर्विभागता परावस्था यदेवमास्ते परस्तदेत्युक्ता ।।[1]

अन्यदशायामपि सा तथाभूतज्ञेयादिशून्यशुद्धपरशिवावस्थास्तीत्याह -

न परं तदवस्थायां व्यवस्थैषा व्यवस्थिता ।
यावत्समग्रज्ञानाग्रज्ञातृस्पर्श दशास्वपि ।।
स्थितैव लक्ष्यते सा च तद् विश्रान्त्या तथा फले ।[2]

न केवलं परापराद्यनाविर्भाव एवैवं नियमो, यावदपरावस्थायामपि । सर्व विकल्पादिज्ञानानामग्रत उषित्सावस्थायां ज्ञानज्ञेयानाविलज्ञातृस्वरूपसंस्पर्शोऽवश्यं भावीति तदवस्थास्वपि परव्यवस्था । यद्यपि तदा पर्युच्छलल्लक्षणज्ञानवस्थानात् सौषुप्तवत् न परावस्था, तथापि यदा ज्ञानाग्रभागेषु विश्राम्यति क्वचित्, तदा परता । न च प्रमाणभूमौ विश्रान्तिस्तत्रापिप्राणस्पन्दात्मकज्ञेयव्याकुलितत्वात् । ततःप्राणादि ज्ञेयज्ञानस्यापि अग्रतो विश्रान्तिः । वस्तुतःसौषुप्ताग्रभागिनी परता स्थितैव ,लक्ष्यते च प्रकाशस्यालक्ष्यमाणत्वाभावात्, तथा फले पि मयैतज्ज्ञातमिति प्रमाणफलभूतज्ञानान्तरोदये तदा ज्ञानमात्रे निर्वृत्तमिति विश्रान्त्या । अथवा यथा समग्रज्ञानानामारम्भे, तथा फले परिसमाप्तौ तत्रैव विश्रान्त्या । तद्विश्रान्तिं विना अर्थो ज्ञात एव न भवति । समग्रत्वमनेकप्रकारकत्वेन ज्ञानानां मध्यदशायामेव प्रत्यगात्मत्वेन । पूर्वापरकोट्योस्तु[3] एकविशुद्धशिवतैवसर्वेषाम् । एतच्चेश्वरप्रत्यभिज्ञायां परीक्ष्यम् ।

---

1. शिवदृष्टौ 1/1 व्याख्या   2. शिवदृष्टौ 1/5
3. " व्याख्यायाम् ।

किन्च ईश्वराद्वयवाद एवमियता ईश्वराद्वयवाद एव युक्ति-युक्तो सर्वशासनार्थसंक्षेपार्थसूचकेन पीठिकाबन्धरूपेणोपोद्घातपरेणानेन परमेश्वर एक एव तावत् स्वरूप प्रसारेण परापरादिरूपतया भासते, तथात्वे पि न खण्डितव्यपदेशव्यवहार्य: । तथाहि - परावस्थायां तावत्पूर्णानन्दस्वभाव एव, परापरायामपि रूपप्रसाररसादेव न काचन विकल्प-कलङ्क कल्पना, अपरावस्थायां पुन:प्राकृतप्रजायामपि च तस्य सहजप्रकाशवोधो स्तीत्यपि समर्थितम् । तदेतद्विधात्वमप्यन्यवादिमते नुपपत्या समर्थितमपि शिथिलितमिव भाति । तस्मिन् हि निरसिते सर्वमिदं मेघावरणविगमे नेव स्वप्रकाशभानुकिरणवृन्दमत्यन्तस्वच्छं भासते नान्यथा पांसुजालेन हि न मणेर्महार्थतापगच्छति, परं मलिनो भाति । तत्र प्राधान्येनेह परब्रह्माद्वयवाद एव निरसनीय:, प्रसङ्गाविव कणनिरसनमिति तन्निरसनायाह शब्दब्रह्मेत्यादि ।

न तु शब्दपरब्रह्माद्वयवाद इति वक्तुं, वैयाकरणो पेतशब्दाद्वैतं तावन्निराकर्तुमुपक्रममाण - आह -

अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपता ।
वैयाकरणसाधूनां पश्यन्ती सा परा स्थिति:।।[1] इति

पश्यन्ती यदपि ज्ञानशक्तौ हीच्छायां यद्बीजतयावस्थितं तदेव विकसितं, ततश्चात्रामर्शासम्भवात् कथं ज्ञानशक्तित्वमिह्वाप्युक्तं ज्ञानदर्शनयोग्यतेत्यत्र योग्यतेति ततश्च कथमुक्तं ज्ञानशक्ति:पश्यन्तीति मत्वा "नादरूपतया विश्वमामृशन्ती क्रियाशक्तिरूपतया समन्विता, तथापि

---

1. शिवदृष्टौ 2/1

पश्यन्ती इति दर्शनप्राधान्यात् उपचरितज्ञानशक्तिरूपत्वे प्याश्रीयमाणे परमशिवरूपताया अत्यन्तदूरवर्तिनी न तु पर्यन्तदशासौ ज्ञानशक्ते सदाशिवरूपत्वात् परापरव्यवस्थात । तेषां पुनःसा परावस्था मता । सदाशिवरूपत्वे च क्रियाशक्तिरपि न परित्यक्ता ।।[1] ननु यदि पश्यन्त्या नादशक्तिरूपतया क्रियाशक्तिरेवाभ्युपगता येन यद्पीत्याद्युक्तं, सूत्रकारेण कथं ज्ञानशक्तिःसदाशिवरूपतेति महानयं स्वकटकक्षोभः सम्पन्नः इत्याशङ्क्याह सदाशिवरूपत्वे चेति, ज्ञानशक्तियोग्यता क्रियाशक्तिप्रारम्भः सदाशिवत्वमित्यर्थः।

तदुक्तम् -"ज्ञानक्रिये सादाख्यम्"[2] इति ।शक्तिशक्तिमतोरभेदात् ज्ञानशक्तिमान् सदाशिवः· उद्रिक्तक्रियाशक्तिरीश्वर इति । अत एवेच्छाशक्तिमयःशिवो यावच्चित्स्वातन्त्र्यशक्तिमान् पर्यन्ते परमशिवः । अत्रान्तरे चौन्मुख्यनिर्वृत्यपेक्षयाधिकतत्त्वसम्भवः। तदस्तु या वा भूत्,नैतदिह मुख्यवृत्या प्रतिपाद्यम्, अत एवाधिकशक्तिप्रदर्शने कृतेप्युक्तं "षट्त्रिंशत्ततत्त्वरूपतां विभ्रत्" इति । शिवाभेदतात्पर्यं तु न खण्डयत इति नियमः । योत्तीर्णे प्यध्वनि विद्यान्येषे पि कार्यमलानुल्लासात् संसारासम्पर्के पि परमेश्वरभेदाख्यातेःसर्वथैवाविच्छेदादागभावतेश्वरेच्छावशोत्पपरापरदशाव्यपदेश्योक्ततत्त्वोपगमः। वैयाकरण साधूनामिति साधुग्रहणमेषां जाड्यख्यापनाय । परमपि हि रूपं यदि पश्यन्त्याः । तदुक्तम् "प्रतिलब्धसमाधाना च" इति । "विशुद्धा च" इति । "प्रशान्तप्रत्यवभासा च" इति । अन्यद् वा अपि अतो धिकतरं प्रकृष्ट रूपमस्याःस्यात् ,तथापि सरो रस इति मध्यमायामुन्निषितः

1· शिवदृष्टौ 2/1 व्याख्यायाम्

2· " 2/1 "

क्रमस्य कारणभूतायां तत्क्रमशक्तिपरस्त्येव।"[1] वस्तुतस्तु मूलभूतत्वात्तस्या यदि तस्यां सूक्ष्मक्रमकलना न स्यात् तर्हि सरो रस इत्यत्र क्रमस्मरणे निमित्ताभावादुत्क्रमणेन स्मरणं मन्तव्यम्, तत्र हि एकस्मृत्युपारूढ़ानां वर्णानामर्थाववोधकत्वमुक्तं, तच्च सति कारणे तादृक् प्रतिभासे भवति नान्यथेत्यर्थः ।

तदुक्तम् -

"प्रतिसंहृतक्रमाप्यन्तःसत्यपि अभेदे समाविष्टक्रमशक्तिःपश्यन्ती"[2] इति । ततो न सा पूर्णा पर्यन्तदशेति कथं तस्याःपरस्थिति-रूपता, परब्रह्मरूपता, शब्दब्रह्मरूपता च ।

तथा च -

"इत्याहुस्ते परं ब्रह्म यदनादि तथाक्षयम् ।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक् ।।[3] इति

अत्रायम्भावः-"यदनादिःअनन्तं च परं ब्रह्म चिद्रूपं तदक्षरं निर्विकारं शब्दरूपम् । सैव च पश्यन्ती संज्ञा परावाक् ।वाग्रूपतां विना परब्रह्माख्यश्चित्प्रकाशो न प्रकाशेत । साहि प्रत्यवमर्शिनी ।प्रत्यवमर्शनमेव च प्रकाशनमुच्यत इत्याहुः ।।[4]

स चैवम् -

"स एवात्मा सर्वदेहव्यापकत्वेन वर्तते ।
अन्तः पश्यदवस्थैव चिद्रूपत्वमरूपकम् ।।[5] इति

1· शिवदृष्टौ 2/1 व्याख्याम् ।
2· " 2/1 "
3· " 2/2 "
4· " 2/2 "
5· " 2/3 "

अत्रेदम् - "या अन्तःपश्यदवस्था भोक्तृतारूपा ज्ञेयरूपशून्य चिद्रूपत्वं चैतन्यमात्रं स एवात्मा कथ्यते, सर्वं देहव्यापकस्तद्भोगायतनावस्थितो भोग्यं भुङ्क्ते[1] ।।"इति

स एव परमात्मा इत्याह -

"तावद्यावत्परा काष्ठा यावत्पश्यत्यनन्तकम्[2]"इति । वस्तुवस्तु अभ्यासप्रकर्षात्तथा काष्ठा प्राप्ता सा पश्यन्त्येव भवति, यथा अनन्तं सर्वमेव विश्वं पश्यति येन दर्शनक्रियार्थो स्याःपूर्यते ।

तथा चोक्तम् -

"अक्षादि वृत्तिभिर्हीनं देशकालादिशून्यकम् ।
सर्वतः क्रमसंहारमात्रमाकारवर्जितम् ।।
ब्रह्मतत्त्वं परा काष्ठा परमार्थस्तदेव सः ।।[3] इति

वस्तुतस्तु - "तदार्थप्रकाशनव्यापार इन्द्रियाद्यालोचनाद्युपायोपयोगो नास्ति देशकालजात्यवच्छेदस्य, अतएव सर्वतो देशात् कालाच्चयः क्रमस्तदुपदेशमात्रं ब्रह्मतत्त्वं क्रमस्यैव संसाररूपत्वात् , अतश्च सर्वग्राह्य ग्राहकाकारवर्जितं , ततः परतरस्याभावात् पराकाष्ठा, प्राप्तं तत् स एव च परमार्थः पश्यन्तीरूपः ।।[4] इति

---

1. शिवदृष्टौ 2/3 व्याख्याङ् ।
2. " 2/4 श्लोकार्थ
3. " 2/4 श्लोकस्योत्तरार्ध 5
4. " 2/5 व्याख्याम् ।

एवन्च -

आस्ते विज्ञानरूपत्वे स शब्दो र्थ विवक्षया ।
मध्यमा कथ्यते सैव विन्दुनादमरूत्क्रमात् ।। इति[1]

अयम्भाव: - स एव पश्यन्तीरूप:शब्दो र्थप्रतिपादने-च्छारूपया विवक्षया उपलक्षिते मनोविज्ञानरूपत्वे आस्ते ।सैव च मध्यमा वाक् कथ्यते क्रमेण बिन्दुनादसंप्राप्ताप्राणापानवायूल्लासात् "प्राणायानान्तरे नित्यमेका सर्वस्य तिष्ठति"[2] इति । पुनरप्याह -

"सम्प्राप्ता वक्त्रकुहरं कण्ठादिस्थानभागश: ।
वैखरी कथ्यते सैव वहिर्वासनया क्रमात् ।।
घटादिरूपैर्व्यावृत्ता गृह्यते चक्षुरादिना ।इति[3]

अयम्भाव: - अत्रापि विन्दुनादमरूत्क्रमात् सा पश्यन्ती सम्प्राप्ता वक्त्रकुहरमिति ।

तदुक्तम् -

"प्राणो वर्णानभिव्यज्य वर्णष्वेव प्रलीयते"इति ।"ततो वक्त्रोदरं प्राप्ता कण्ठादिस्थानभागेषु विभक्तककारादि वर्णरूपा वैखरी वर्ण्यते -

स्थानेषु विकृते वायौ कृतवर्ण परिग्रहा: ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिवन्धना ।।इति परतो पि वाह्यार्थवासनया अविद्यारूपया क्रमेण घटपटाद्याकारैर्विवृता सैव वाक् चक्षु-रादीनां ग्राह्यभावमापद्यते"[4]।

1· शिवदृष्टौ 2/6

2· " 2/6

3· " 2/7/8 श्लोकपूर्वार्द्धम्

4· वाक्यपदीये 1/116

तथा प्राहु: -

"यस्मात्तैरुच्यते सद्भिरेवं वस्तुप्रवृत्तये ।
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।।
विवर्तते ऽर्थभावेन प्रक्रिया जगतो यत: ।
न सो ऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।
शब्द ब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति ।।
अविभागा तु पश्यन्ती सर्वत: संहृतक्रमा ।
इत्यादिवाक्यरचनैस्तैरेवं प्रतिपादितम् ।। इति"[1]

अत्रायम्भाव: - यस्मात्तैर्वैयाकरणै: सद्भि:साधुनिर्गुणैरेव-मुक्तरूपं प्रतिपादितं पश्यन्तीरूपं शब्दतत्त्वमक्षरमनाद्यन्तं ब्रह्म विश्वार्थ-भावेन विवर्तते तदसत्यरूपमात्मन्युपगच्छति, असत्यविभक्तान्यरूपोपग्राहिता विवर्तस्तस्यास्तत् विवर्तते, यतो विवर्तनात् प्रक्रिया भावभूतभुवनादिविन्यास-वैचित्र्यमिति । तथा च न स घटपटादिप्रत्ययो लोकव्यवहारे ऽस्ति, यो वाचकशब्दानुगमवर्जित: । वाग्रूपतां विना न ब्रह्मतत्त्वप्रकाशो ऽपि प्रकाशेत, "सा हि प्रत्यवमर्शिनी"। इति । तथैवंभूते पश्यन्तीरूपे शब्दाख्ये ब्रह्मणि यो निष्णातस्तेन परं ब्रह्माधिगतं भवतीति ।तथा तच्च पश्यन्तीरूपं ग्राह्यग्राहकविभागक्रमरहितम्, अविभागा तु पश्यन्ती देशकालक्रमसंहारवती चेति आदिग्रहणात् प्राक्प्रदर्शितमध्यमावैखर्यादिवाक्यैरुक्तयिति ।।[2] इति

श्रीचक्रस्य {यन्त्रस्य} तत्त्वतो निरूपणमत्र संवृत्तम् । अत्राय-मभिसन्धि: निखिलं विश्वजातमनन्तकोटिब्रह्माण्डात्मकज्जगत् तन्त्रागम-राद्धान्तानुरोधेन त्रिकोणे स्थितम् । तन्त्रागमस्यायमपि सिद्धान्त:यत् यद् ब्रह्माण्डे तदेव पिण्डे" इति । एतेन शरीरान्तरे भवन्ति किल षट्कमलानि

---

1. शिवदृष्टौ व्याख्यायाम् 2/8,9,10,12
2. " 2/11 व्याख्यायाम् ।

तानि च यथा मूलाधार- स्वाधिष्ठान-मणिपुर अनाहत आज्ञा-विशुद्धाख्यानि योगिन: गुरूपदेशेन एतानि निर्भिद्य खेचरी मुद्रया मृतस्यन्दनं पिबन्त:सन्त: चिदानन्दाख्ये परे धाम्नि मणिमये सामरस्य युक्तेशिवशक्ति पर्यङ्के सहस्त्र-दलकमले आरोहन्ति । तदनु पुन: तस्मादारभ्य मूलाधार पर्यन्तं मूलाधाराच्च सहस्त्रार पर्यन्तमुन्मज्जन्ति निमज्जन्ति च । उन्मज्जनं निमज्जनञ्च नानाविध नाड़ीषु सत्स्वपि इड़ापिङ्गलयो: सुषुम्णा वर्त्मना जायते । इदमान्तरं पिण्डं सृष्टिश्च निरन्तरं नितरां साधकाननुरञ्जयति । बाह्य जगतित्वेकैकं सौरमण्डलमादाय नानाविधग्रहनक्षत्रादय: सागरा:नद्य:जीवाश्च जायन्ते प्रतिष्ठन्ते तन्मूल्यमाकलय्य विवेकिन: तद्रहस्यं सम्यग् विज्ञायान्तरं जगदा-श्रयन्ते ।

एतेन श्रीविद्याया:शिवशक्तित्रिकोणमयं जगद् बिन्दुं परिमण्डय सर्व-त्रोल्लसति, तदेव वाक् चतुष्टयात्मना साधकानां जिज्ञासूनाञ्च सम्यगवबोधाय तद्बोधद्वारा सम्यगात्मकल्याणाय च सर्वं तत्त्वजातं यथायथं शिवदृष्टिग्रन्थे महामतिना परं शिवाचार्येण सोमानन्देन तद्वृत्तिकारेण चोत्पलाचार्येण च सम्यगनुष्ठितमिति तत्रत्यो भाव: मया दिङ्मात्रेण निर्देशित:आधिक्येन च सुधीनां कृते ग्रन्थाश्रय: एवाश्रय इति दिक् ।

अन्य प्राक्तनतन्त्रागमग्रन्थानुसारं परादिवाग्विमर्शः

पाणिनिसमकालिकः श्रीमन्नन्दिकेश्वरः शिवशक्तीश्वरत्रिकम् सांख्याभिमतानि पञ्चविंशतितत्त्वानि,प्राणादिपञ्चकम्,सत्त्वादिगुणत्रयमित्येवं षट्त्रिंशत्तत्त्वानि तनुते । तत्त्वोत्तीर्णःपरः शिवो न खलु कदापि कथमपि वाच्यतासहः,"यतो वाचो निवर्तन्ते अप्राप्यमनसा सह"।विश्वोत्तीर्णः[1] विश्वमयत्वेन शिवःसन् "स्वेच्छया स्वस्य चिच्छक्तौ विश्वमुन्मीलयत्यसौ"[2] इति प्रकाशवपुषो स्वेयं विमर्शरूपा चिच्छक्तिश्शिवत्कला वा "अइउण" इति सूत्रे कारःशिवः । इकारश्च शक्तिः । इकाररहितश्च शिवः शव एव । अनयोश्च तादात्म्यं नन्दिकेश्वरेण सर्वप्रथमभित्थं व्याहृतम् -

"चन्द्रचन्द्रिकयोर्यद् वत् यथा वागर्थयोरिव"इति

अमुमेवार्थं शैवकविः कविकुलगुरुःकालिदासःरघुवंशे स्मरति -

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।[3] इति

शिवः स्वातन्त्र्यरूपेण जगदिदमुन्मेषनिमेषाभ्यां व्यक्ताव्यक्तं कुरुते-

"यस्योन्मेषनिमेषाभ्यां जगतःप्रलयोदयौ"।[4] इति

स्वशक्त्या जगदुन्मेषयंश्च शिव ईश्वर उकारो वोच्यते ।जगदुन्मेषे च शिवशक्तिद्वयस्वीकारे पि तयोर्मनस्तद्वृत्तिवदैकात्म्यान्नाद्वैतहानिः।।

क्रमदर्शने परतत्त्वम्

तत्र क्रमदर्शने काली एव परं तत्त्वम्,तस्मादेवैतद्दर्शनं कालीनय

---

1. नन्दिकेश्वरकृत काशिकायां भागे 2 पृ० 136
2. " " तत्रैव

इति नाम्ना प्रसिद्धिमाजगाम । काल्याश्च देवीरूपत्वा देवीनय इत्यस्याभिधानान्तरम् । तन्त्रालोकविमर्शटीकायां श्रीमता जयरथेन प्राचीनाचार्याणां श्लोकानुद्धरता यं "कालीनयदेवीनयक्रमदर्शनाभिख्यो महानयो ति नश्चाप्युच्यते स्योति सूच्यते".[1] केषुचिदागमेषु शिवो वक्ता न्येषु च पार्वती भैरवी देवी वेत्यनुसन्धायागमदार्शनिकेषु परम्पराद्वयं प्रचचार । एकत्र शिवःअपरत्र भैरवी देवी काली वा परं तत्त्वम् । नामभेदे पि परतत्त्वस्वरूपनिरूपणे न कश्चिदपि तात्त्विको भेदो वक्तव्यः । यद्यपि सोमानन्दःकाल्याःस्त्रिलिङ्गत्वेन "स्त्रिलिङ्गस्य पुल्लिङ्गविशेषरूपत्वम्" इति व्याकरणदर्शनमनुसरन् शिव एव परं तत्त्वं शक्तिश्च तदाश्रितेति प्रतिपादयामास,परं महारौवा अभिनवगुप्तमहापादा इमां युक्तिं न सहन्ते । तैरेव तन्त्रालोके कालसङ्कर्षिणी भैरवी कालीप्रभृतिभिर्नामभिःपरा संविदेव भगवती परं तत्त्वमिति प्रत्यपादि। प्रकाशविमर्शस्वरूपेयं परा संविद् अन्तर्बाह्योभयात्मना स्वातन्त्र्येण परिस्फुरति । विभिन्नरूपाणि भावाश्चास्य चिन्दात्मनैकीकारः[2] इति।सा पारमार्थिकी संवित् सृष्टिस्थिति संहारानाख्येन चतुर्विधरूपमाश्रित्य प्रमातरि प्रमाणे प्रमेये चाविच्छिन्नत्वेनैकैकत्र चातुरात्म्येन द्वादशधा परिस्फुरति । अत एवास्या द्वादशरूपत्वमाचक्षते । आगमे पि -"द्वादशाराविद्योगेन देवीं द्वादशधा यजेत्"इति । अस्याःपरत्वं व्याकुर्वाणाःश्रीमदभिनवगुप्तपादाःप्राहुः-

"इमाःप्रागुक्तकलना स्तद्विजृम्भोच्यते यतः।।[3] इति
श्रेयो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात्"[4]
इति पञ्चविधामेनां कलनां कुर्वती परा ।
देवी काली तथा कालकर्षिणी चेति कथ्यते ।।[5]

----

1. तन्त्रालोके विमर्शे तृतीयभागे पृ० 195
2. " तत्रैव पृ० 124

3. तन्त्रालोके तृतीयभागे पृ० 188
4. तत्रैव पृ० 203
5. तत्रैव पृ० 205

कालीशब्द: कालक्षेपे, कल गतौ, कल संख्याने, कल शब्दे इति धातुचतुष्टयस्य पञ्चधार्थमनुधावन्निवपथते, यतो गतिर्ज्ञाने प्राप्तौ च वर्तते । एवञ्च कालीकलनं नाम स्वात्मना बहिरूपासनं क्षेपो वा । भेदितस्य च भावजातस्य स्वात्माभेदेन परामर्शो ज्ञानम्, भेदितस्यैव प्रमातृप्रमेयादेरर्थस्य परस्परस्परायोहलादि इदमिदं नानिदमिति प्रतिनियतया वस्थापनात् संख्यानं विकल्प:गतिश्चात्र गत्युपसर्जना प्राप्ति:, तेन भेदितो र्थ:संविल्लक्षणं स्वरूपमारोहति । एष च संविरस्वरूपारोह: दर्पण प्रतिबिम्बन्यायेनाभ्युपगन्तव्य:। प्रतिबिम्बस्य हि तद्व्यतिरिक्तत्वे पि तद् व्यतिरिक्ततयैवावभासेनाभवतत । अविकल्पज्ञानादीनामपहस्तनपूर्वकं स्वात्मपरामर्शलक्षणेन स्वरूपेणावस्थानं नाद:। इमां पञ्चविधां कलनां कुर्वती कालकर्षिणी काली मातृसद्भावसंज्ञामवाप्नोति। प्रमातृणां स्वतन्त्र स्वप्रकाशमरसंविदेकरूपतापादनं मातुरेव हि सद्भाव: । तदेवं द्वादशधा तिष्ठन्ती परा संविदेव भगवती क्रमनये परं तत्त्वमिति ।

कुलदर्शने परतत्त्वम्

शिवशक्तयोरद्वैतं भोगस्य मोक्षोपायत्वञ्च स्वीकुर्वत् कुलदर्शनमनुत्तरं परतत्त्वं प्रतिष्ठापयति ।-

> यत्रोदितमिदं चित्रं विश्वं यत्रास्तमेति च ।
> तत्कुलं विद्धि सर्वज्ञं शिवशक्तिविवर्जितम् ।।

एतदेवानुत्तरं प्रत्यभिज्ञादर्शने पि षट्त्रिंशत्तत्त्वोत्तीर्णत्वेन कैश्चिद् विवेचित इति तत्रैव निरूपयिष्याम:। नियतिरागरहितानि षट् त्रिंशत्तत्त्वान्यत्रापि स्वीक्रियन्ते । देवनागरीपिप्यक्षराणां दार्शनिकतत्त्वस्फारप्रदर्शनमत्र विशिष्टम् । तच्चाकरग्रन्थेभ्यो नुसन्धेयमिति प्रत्यभिज्ञादर्शनाभिमतं परतत्त्वस्वरूपमभिधास्याम: ।

प्रत्यभिज्ञादर्शने परतत्त्वम्

त्रिकदर्शने सारस्पन्दप्रत्यभिज्ञाप्रमुखाभिर्भिन्नाभिरभिधीयमानं शिवाद्वयप्रतिपादकं माहेश्वरदर्शनं साम्प्रतं काश्मीरशैवदर्शनमिति नाम्ना साधारणैर्जनैः साधारण्येन परिचीयते । शैवदर्शनमिदं विश्वोत्तीर्णस्य विश्ववपुषः परमशिवस्याभासरूपाणि षट्त्रिंशत्तत्त्वानि प्रथयति तमाम् । महाद्वैतवादिनः शैवाः स्वात्मना कृताशेषषट्त्रिंशत्तत्त्वकलापस्य परमशिवस्य व्यापकत्वाभिप्रायेण सप्तत्रिंशत्तत्त्वमाविकल्पात्मकत्वं च भाव्यं विश्वोत्तरणैत्यविकल्पात्मकस्य मनसो वाचां च पारे वर्तमानस्य विश्वोत्तीर्णस्याष्टात्रिंशत्तत्त्वमप्युद्घोषयन्ति । एतदेव कुलदर्शनस्यानुत्तरं तत्त्वम् । तदुक्तम् -

षट्त्रिंशत्तत्त्वपर्यायस्तदभिन्नः परः शिवः ।
उपदेश्यतया सोऽपि स्यादवच्छेदभागतः ।।
अष्टात्रिंशतं परं धाम येनेदं विश्वकं स्फुरेत् ।

प्रत्यभिज्ञा प्रक्रियायां तु शिवादिधरणीप्रान्तानां षट्त्रिंशत्तत्त्वानामेव विशिष्टा विवेचनम् । शैवशासने प्रकाशविमर्शात्मनः परमशिवस्य सर्वज्ञत्वं सर्वकर्तृत्वं चाम्नातम् । ज्ञानक्रिययोरभेदाभ्युपगमात् प्रकाशविमर्शयोर्भेदो वस्तुतस्त्वौपचारिक एव । विमर्शो हि चित् चैतन्यम्, स्वरसोदितापरा वाक् स्वातन्त्र्यम्, परमात्मनो मुख्यमैश्वर्यम्, कर्तृत्वम्, स्फुरत्ता, सारः, हृदयम्, स्पन्द इत्यादिभिः शब्दैरागमेषूद्घोष्यते । अनवच्छिन्नपरप्रकाशः परमेशः स्वस्वातन्त्र्यवशात् शिवादितत्त्वात्मना प्रविभज्यते, तदात्मना स्फुरति प्रकाशते वा । सृष्टिक्रमावभासे हि क्रमेण चिदानन्देच्छा ज्ञानक्रियाशक्तीनां प्राधान्यम् । उपपन्ना

---

1. पराप्रवेशिकायां पृ० 1-2 तमे

ध्येतासां शक्तीनां मनोविज्ञानदिशा क्रमप्रथा । उपनिषदो ह्यमुमेव क्रममवगमयन्ति । शिवादिसद्‌विद्यान्ततत्त्वोन्मीलने परमशिवस्यापरिच्छिन्नं शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण चकास्ति । परमशिवस्य चिच्छक्तिप्राधान्ये विश्वप्रतिष्ठाभूमिविश्वैकविग्रहे निखिलविश्वक्रोडीकारेण घोतमान: शुद्धादर्शरूप: प्रकाशैकघन:शिव: । शिवतत्त्वमिदं सर्वप्रमातृणामन्त:स्फुरत्पूर्णाहन्तावयस्कारमयं परत्वेन विश्वोत्तीर्णमपि विश्वावभासनदृशा विश्ववपुरविलुप्तज्ञानक्रियां रूपं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिस्थितिसंहारशतप्रतिबिम्बसहिष्णु महाप्रकाशवपुरिति वर्ण्यते - तदुक्तम् -

"आत्मैव सर्वभावेषु स्फुरन्निर्वृत्तचिद्वपु: ।
अनिरुद्धेच्छाप्रसर: प्रसरद्दृक्क्रिय: शिव: "।। [1] इति

तथा च -

"सर्वव्यापकताभूमिर्वस्त्वकर्तृत्वसम्मता ।
निजाभासचमत्कारमयी शिवदशा स्मृता ।। [2] इति

शिवैकरूपं विश्वं न ततो तिरिच्यमानमिति शिवतत्त्वं सर्वतत्त्वानां साम्यावस्था ।

तथा हि -

"एवं सर्वपदार्थानां समैव शिवता स्मृता ।
परापरादिभेदो त्र श्रद्धानैरुदाहृत: ।।" [3] इति

1· शिवदृष्टौ प्र० आन्हिके श्लोक-2

2· श्रीविज्ञानेन्दुकौमुधाम्

3· शिवदृष्टौ प्र० आन्हिके श्लोक 48

निर्विशेषाद्वैतवादिनां ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावतया प्रकाशैक धनमपि जडमणिरिव निर्विमर्शमेव । सेश्वरसांख्यानमीश्वरो न केवलं प्रक पुष्करपलाशवत् सृष्टेर्निरपेक्ष: अपि त्वेतस्या:प्रकृत्युपादानतया तदकर्तृकत्वं तद्भिन्नत्वं च सुतरामापतति । सहकारिकारणपरतन्त्रस्य न्यायवैशेषिका-भिमतस्येश्वरस्य सर्वज्ञत्वं सर्वकर्तृत्वं च न घटते, अवास्तवं हि तत् । सर्वं -क्षणिकमुद्घोषयन्त:सौगता:प्रकाशविमर्शात्मकं परतत्त्वं कथं प्रतिष्ठापयेयु:? कर्ममीमांसकानां जैमिनीयानां निरीश्वरवादित्वं वेदाभ्यासजाड्यजनितं सुप्रथितमेव । स्यात्सरिति सपदिसप्तशो भङ्गीर्निमज्जतां इत्येवं शिव-स्वरूपविमर्शी सर्वशास्त्रविलक्षणा शिवशासनसरणि: ।

"ऊँकार एव सर्वा वाक् सैषा स्पर्शोष्माभिर्व्यज्यमाना बह्वीरूपा च भवति" इति श्रुत्युक्ति दिशा एकैव काचन् वाग् वर्तते यथा च सर्वमिदं जगद् विवर्तरूपतामापद्यते । यस्मिंश्च सर्वं प्रतिष्ठितमस्ति। श्रीपुण्यानन्दाचार्य: कामकलाविलासे "एकोवर्ण बहुधा शक्तियोगाद् वर्णानभेदान् निहितार्थो दधाति" इति श्वेताश्वतरश्रुति मुद्धरन् प्रणव एव एको वर्ण इति सूचयामास । अयमेव च परतमो वर्ण:एकाक्षरा देवी आहतेतरच्छब्द इति इति विविधैरागमपदाभिधेयेसु बहुधा परिचीयते । यदाहु: श्रीमद्भिनवगुप्तपादाचार्यास्तन्त्रालोके षष्ठान्हिके -

"एको नादात्मको वर्ण: सर्ववर्णाविभागवान् ।
सो नस्तमितरूपत्वादनाहत इहोदित: ।।

स तु भैरवसद्भावो मातृसद्भाव एष स: ।
परा सैकाक्षरा देवी यत्र लीनं चराचरम् ।।[1]

तथा च -

---

1. तन्त्रालोके षष्ठान्हिके श्लोकौ 217-218

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् [1] " इति

तथा च विज्ञानभैरवविवृत्तौ शिवोपाध्याय: -

ओमिति स्फुरदुरस्यनाहतं गर्भगुम्फितसमस्तवाङ्मयम् ।
दन्ध्वनीति हृदि यत्परं पद तत्सदक्षरमुपास्महे महः ।।

एतेनैव परतमवर्णेन स्वात्मनि विहितक्षुधादि शिवावसानात्मक वाच्यार्था: परतरसूक्ष्मसूक्ष्मस्थूल सूक्ष्मस्थूलवर्णा:समुदयन्ति । अयमेव कुण्डलिनी कामकलेति, च परशक्तिप्रसाद समनुगृहीतस्वान्तास्तत्त्वविद:समभ्युपजग्मु:। कामकलाक्षरस्य विन्दुत्रयात्मकत्वेन विन्दुत्रयस्य सूर्यसोमाग्नित्वेन सोमसूर्याग्नी-नामकारो कामकलात्मता सर्वागमशास्त्रेषु दृष्टेति कृत्वा त्रिधात्मकं सर्वं कामकलाक्षरे विश्रान्तमिति प्रणवेनापि कामकलाक्षरमेव गीयत इति त्रिपुरा-महिम्नस्तोत्र टीकायां नित्यानन्दा:समर्थयामासु: । देशिकेन्द्रो दुर्वासा अपि शक्तिस्तोत्रे "प्रणवता ते गीयते चागमै:" इत्येवमेव प्रतिपादयामास । कुण्डलिन्या:प्रणवस्य च सार्धत्रिवलयाकारतापि "अध्युष्ठ वलयाकारा प्रण-वत्वमुपागता" इति तट्टीकायां सुस्पष्टम् । "प्रकृति:विरचला- "परावाग् रूपिणी परप्रणवात्मिका कुण्डलिनीशक्ति:" इति प्रपञ्चसारतन्त्रविवरणे पद्मपादाचार्य प्रतिपादयामासु: ।

सामान्यरूपतया पूर्णाहन्तारूपा शैवीविमर्शशक्ति:परा कथ्यते, या सार्धत्रिवलयाकारा आम्नायेषु कुण्डलिनी प्रतिपाद्यते । तत्र प्रमेयप्रधान-मइन्ता रूपं कुण्डलिन्या:प्रथमो वलय:,प्रमाणप्रधानमहन्तारूपत्वं द्वितीयो वलय:,प्रमातृप्रधानमहंस्वरूपत्वं चास्यास्तृतीयो वलय: तथावशिष्टार्धवलय:

---

1. गीतायाम् ।

पमाप्रधानादृमात्मक इत्यस्या आगामिकी रहस्यप्रक्रिया ।

इत्येवंस्या परविमर्शात्मासौ परा संविदेव यदा बहिरोन्मुख्यलक्षणात् स्वातन्त्र्याच्चत्तद्रूपतया वविभासयिषया स्वात्मन्येव पोल्लसति, तदा सा परा शक्तिर्घटपदादिभावं स्वात्माभिन्नरूपतया विमृशन्ती सुप्ताहितसदृशी शक्तिकुण्डलिनीति सर्वाम्नायेषु निगद्यते ।येयम् -

प्रकाश्य:सर्ववस्तूनां विसर्गरहिता तु सा ।[1] इति

श्रीतन्त्रालोकोक्तरीत्या विसर्गरूपाणि विसर्गरूपतामनश्नुवानास्वात्मन्येव चमत्कृतिमयी शिवस्याद्योन्येषात्मिका शक्तिर्भवति -

योगिनी हृदये परादिवाग् विमर्श:

आत्मन:स्फुरणं पश्येद्यदा सा परमा कला ।
अम्बिकारूपमापन्ना परा वाक् समुदीरिता ।।[2] इति

पसृतविश्वलहरीस्थानं मातृत्रयात्मकमित्यत्र सूचितां मातृकाभयवासनामिदानीं विवृणोति न्आत्मन:स्फुरणमित्यादिना । सा परमा सर्ववर्णांशभूतविमर्शरूपा,कला विमर्शशक्ति:,आत्मन:परशिवस्य ,स्फुरणं पश्यन्त्यादिक्रमेण वैखरीपर्यन्तं विमर्शनम् ,पश्येद् द्रष्टुमिच्छेत् ,तदा परमा शान्तात्मिका भूत्वा अम्बिकारूपमापन्ना प्रकाशांशमात्राया अम्बिकाया:सामरस्यमापन्ना, परा वाक्, समुदीरितेति । परा मातृकोच्यते । तदुक्तं सङ्केतपद्धत्याम्-

"अनयो: सामरस्यं यत्परस्मिन्नाहसि स्फुटम्"।[3] इति

1· तन्त्रालोके 3/139

2· योगिनी हृदये श्लोक 36

3· सङ्केतपद्धत्याम् श्लोकार्द्धम् - 36

आशयभाव: - अथेदानीं प्राथमिकविस्तृतवासनाऽवसरे नुक्तत्वे-
नावशेषितां ब्रह्माण्डपिण्डाण्डयोरैक्यभावनादार्ढ्यसिद्धिमदुत्तमाधिकारिकर्त्तव्य-
ध्वननाय सकलादिभावनात्रयोत्तरमेव वर्णयितुं सङ्गतां मध्यत्रिकोणवासनां
विस्तरेणोपदिशति आत्मन: स्फुरणमित्यादिभिर्विंशत्याश्लोकै:। पूर्वं "यदा
सा परमा शक्ति:" इति श्लोके या वृत्तिरीक्षणात्मिका शान्तानाम्नी
विश्वकारणत्वेन वर्णिता, तया हि शब्दार्थसृष्टिद्वयमुत्पाद्यते । तत्रार्थसृष्टे
र्ब्रह्मविष्णुरुद्रा:कारणानि । त एव शक्तिं विना कार्याक्षमत्वाच्छक्तिविशि-
ष्टतया विभाव्यमाना वामाज्येष्ठारौद्र्य इत्युच्यन्ते । तच्छक्तयस्तु
भारतीपृथिवीरुद्राणीत्वेन प्रसिद्धा इच्छा ज्ञानाक्रिया इत्युच्यन्ते । शब्दसृष्टे:
कारणानि पश्यन्तीमध्यमावैखर्य: । कारणानामपि कारणमीक्षणम् । तच्चेक्षण
इच्छादित्रयसमष्टित्वयोरनतिभेदात् ,पत्र पुष्पफलशाखादिसूक्ष्मरूपसमष्टेरेव
वटबीजत्वात् । तत्रैकस्यामेवेक्षणवृत्ताविच्छादित्रयजनकत्वं प्रवृत्तिनिमित्ती-
कृत्य यथा शान्तापदवृत्तिस्तथा सैव वृत्तिर्वामादित्रयजनकत्वादम्बिकापद-
वाच्यत्वमप्यापन्ना पश्यन्त्यादित्रयजनकत्वं शक्यतावच्छेदकीकृत्य परापदेना-
प्युदीरिता । तादृशवृत्त्याश्रयभूता देव्यपि वृत्तिं प्रति परिणाम्युपादान-
त्वात् परिणामपरिणामिनोरभेदाच्छान्तादिपदैर्व्यवह्रियत इत्यर्थ: । अत्र परमेति
पदं शान्तापरमिति केचित् ।

तदुक्तम् -

बीजभावस्थितं विश्वं स्फुटीकर्तुं यदोन्मुखी ।
वामा विश्वस्य वमनादङ्कुशाकारतां गता ।।
इच्छाशक्तिस्तदा सेयं पश्यन्ती वपुषा स्थिता ।
ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता ।।
ऋजुरेखामयी विश्वस्थितौ प्रथितविग्रहा ।
तत्संहृति दशायां तु वैन्दवं रूपमास्थिता ।।

प्रत्यावृत्तिक्रमेणैवं शृङ्गाटवपुरुज्ज्वला ।
क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा ।।[1] इति

वीजभावस्थितं विश्वम् । यथा वीजे वृक्षस्तथा षट्त्रिंशत्तत्त्वात्मकं विश्वं परायां कारणता तन्मात्रामास्थितम् । स्फुटीकर्तुं पदोन्मुखी स्फुटीकर्तुमुत्पादयितुमुन्मुखी । अत्रोत्पादनं नामकारणे सत एव कारणस्य स्फुटीकरणम् । अतएव कार्यस्य स्फुटीकरणाद् वामा, विश्वस्य वमनात् कारणे सत उत्पादनात् । वमनं नामोदरस्थ आहारादेर्बहिर्नियासनम् उत्पादनमप्येवमेव। अतएव गर्भभावेनात्मोदरगतस्य विश्वस्य बहिर्वमनाद्वामा । अङ्कुशाकारतां गता वक्रत्वाच्च वाम शृङ्गाटकस्य वामरेखा सृष्टिरूपा भूदिति ।

तथा इच्छाशक्तिर्वामाशक्तिसामरस्यमापन्ना पश्यन्तीरूपेण स्थितेत्यर्थः । ज्ञानशक्तिरिति । तथा ज्येष्ठाशक्तिर्ज्ञानशक्तिर्यथा वामाशक्तिरिच्छाशक्ति सामरस्यमापन्ना । विश्वस्थितौ प्रथितविग्रहा विश्वस्थितिहेतुभूतत्वात् । ऋजुरेखामयी अत्र शृङ्गाटकरेखाकारा मध्यमा वागुदीरिता मध्यमामातृका त्वमापन्ना । सृष्टस्य स्थितस्य शिव विश्वस्य संहारकाले बैन्दवं रूपमास्थिता अम्बिका शान्ता सामरस्यरूपा स्थिता मध्यविन्दोराविर्भूय सृष्टिं स्थितिं च सम्पाद्य तत्संहारोन्मुखी पुनर्विन्दावेव प्रविष्टेत्यर्थः ।

एवं प्रत्यावृत्तिक्रमेण रौद्री क्रियाशक्तिसामरस्यात् सैव शृङ्गाटवपुः शृङ्गाटस्य दक्षिणरेखा भूत्वा उज्ज्वला शृङ्गाटरूपेण भासमाना । शृङ्गाटं नाम त्रिकोणम् । वैखरी विश्वविग्रहा वाग्रूपप्रपञ्चमयवैखरीरूपा जातेति ।।[2]

1· योगिनीहृदये श्लोका 37·38·39,40

2· योगिनीहृदये तत्रैव दीपिकायाम् ।

पूर्ववद् रौद्री क्रिया वैखरीति पदानि तस्यां प्रवर्तन्ते । तादृश पदवाच्यदेवीत्वेन सृष्टिरेखोत्पत्तिस्थानाभिमुख्येन परावृत्तदक्षिणरेखां भावयेत् । तेनैकैव देवी नानाधर्मवैशिष्ट्येन भिन्ना सती रेखात्रयात्मक-शृङ्गाटवपुषा त्रिकोणदेहेन श्रीचक्रे शोभते । तथा हि लिपिसङ्केतितरेखाभिः ककारादिवर्णानां तैश्च तदर्थानां स्मरणं तथा त्रिकोणरेखाभिः सृष्ट्यादिकृत्यानां तत्कर्तृदेवीनाञ्च स्मरणं यथा भवति तथा दृढमभ्यस्य पूजयेदिति दिक् ।

कुण्डलिनीशक्तेरेव परादिशब्दस्यव्यवहार:

सामान्यरूपतया पूर्णाहन्तारूपा शैवीविसर्गशक्ति: कुण्डलिनीति कथ्यते । या सार्धत्रिवलयाकाराआम्नायेषु प्रतिपाद्यते । तत्र प्रमेयसाधनमहन्तारूपं कुण्डलिन्या:प्रथमोवलय:,प्रमाणप्रधानमहन्तारूपत्वं द्वितीयो वलय:,प्रमातृप्रधानमहंस्वरूपत्वं चास्यास्तृतीयोवलय:, तथाविशिष्टार्धवलय:प्रमाप्रधानाहमात्मक इत्यस्या गामिकी रहस्य प्रक्रिया ।

इत्येवं रूपा परविमर्शात्मासौ परा संविदेव यदा वहिरौन्मुख्यलक्षणात् स्वातन्त्र्यात्तत्तद्रूपतया वविभासयिषया स्वात्मन्येव प्रोल्लसति, तदा सा परा शक्तिर्घटपदादिभावं स्वात्माभिन्नरूपतया विमृशन्ती सुप्ताहिसदृशी शक्ति कुण्डलिनीति सर्वाम्नायेषु निगद्यते -

"प्रकाश्य:सर्ववस्तूनां विसर्गरहिता तु या "[1]

किन्व शैवशासनदृष्ट्या यदा योगीस्वात्माभिन्नशिवस्वरूपपरामर्शानुसन्धानवशाद् विश्वात्मसाक्षात्काररूपायां समावेशभूमौ तिष्ठति तदास्य विसर्गशक्तौ समावेशो जायते येन स परमं शक्तिस्पन्दं स्वात्मनिचमत्कुर्वन् शक्तिकुण्डलिनी दशामाविशति । शक्तिकुण्डलिन्या स्वरूपम् -

" या सा शक्ति: परा सूक्ष्मा निरायारेति कीर्तिता:।
हृद् विन्दुं: वेतृयित्वान्त: सुषुप्तभुजगाकृति: ।।
तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश ।
क्षिप्तोदरे तु या देवी विषमूढेव सा गता ।।[2]

1· तन्त्रालोके 3-139

2· तन्त्रसद्भावे ।

सैव कुण्डलिनी भगवती -

"कला सप्तदशीतस्मादमृताकाररूपिणी"[1]

परापराशक्त्यपरपर्यायां विसर्गशक्तेरियं वीजात्मिका मध्यमा दशा भवति । कामकलापरामर्शानुसारेण कौलयोग्यपि चर्याक्रमेतां शक्ति कुण्डलिनिं सिद्धयोगिनी सङ्•घट्टात्मकसमावेशावसरेकामतत्त्वरूपतया साक्षात्करोति । तदुक्तम् -

अत एव विसर्गो यमव्यक्तह्यकलात्मक: ।
कामतत्त्वमिति श्रीमत्कुलगुह्वर उच्यते ।
कामस्य पूर्णता तत्त्वं सङ्•घट्टे प्रतिभाव्यते ।।[2]

अन्यच्च -

"सिद्धयोगिनीसङ्•घट्टान्महामेलापोदय:"[3]

इत्यस्मिन् सूत्रे महामेलापशब्देन सेयं शक्तिकुण्डलिनी निरूपिता यस्यां क्षणमात्रमपि स्थिति प्राप्त कौलयोगी वेद्यवेदकात्मशिवशक्त्यात्मद्वयविगलनेन तां शिवशक्त्यात्ममहासागरस्वरूपां स्थितिमनुभवति -इत्यस्यां सिद्धयोगिनीसङ्•घट्टात्मकमहामेलापदशायां शक्तिकुण्डलिनीदशामनुभवन् य:कौलयोगी चर्याक्रममाचरति, स एव चर्याक्रमे धिकृतो स्ति । तस्मात् परिपूर्णस्वात्मावमर्शनिष्ठानां पूर्णाशयानामेवास्मिन्निरुत्तरसमावेशास्पदे चर्याक्रमे धिकारोनेतरेषाम् ।

1• तन्त्रालोके -

2• तन्त्रालोके

3• "

सर्वैरनुभूयमाना देहोत्पत्तिप्रक्रियैवेयं विमृश्यपरिदृश्यमाना सम्यगवभासयति, देहस्य विश्वस्य च शक्तिशिवमयतामयन्च शक्तिसंवलितस्वात्मनो नित्यानन्दमयविसर्गतत्त्वम् । येन च शक्त्यात्मकस्वकुण्डलिन्या उद्बोधनं स्वाधीनं विज्ञातं सत सुकरं भवतीति ।

"तस्माद्वा एतस्मादात्मन: सकाशादाकाश:सभूत:, आकाशाद् वायु:, वायोरग्नि:, अग्नेराप:, अद्भ्य:पृथिवीति । "आत्मैवायमग्र आसीत्" आनन्दाद्धि प्रजा:प्रजायन्ते"इत्यादय:श्रुतयोदृश्यते । अनुभूयते च स्वमहिम्नि वर्तमानो यं पुरुष: स्वातन्त्र्यादेव स्वभावात् परिहाय स्वानन्दमग्नतां स्थितिं प्रथमं जायामभिलक्ष्यति, अभिलाषश्च नान्तरेण शब्दनं सम्पद्यते, शब्दानुवेधस्य तत्रानुभूयमानत्वादिति तदभिलाषोत्पत्तिरेव शब्दतन्मात्रात्मकशुद्धाकाशावभासनात्मिकाशसृष्टि:। देहे पि सहस्राश्व: पादतलं यावदाकाशादिपन्चभूतात्मके पृथ्वीस्थाने मूलाधारे प्रसुप्ता तिष्ठति।

अत्र शिववैमुख्यमेव शक्तेर्मायात्मता, तथा शक्त्यनुधावनमेव च शिवस्याभिलषितत्वापूर्णमन्यतादिविमोह:। नहि प्रकाशात्मशिवाधारं परित्यज्य शक्तेस्थितियुक्तेतिप्रधानतया स्वाधारविमर्शनं विहाय पराहंभावं विमुच्येव यद् विरमतीव शक्ति:, तं विरामरूपं शून्यातिशून्यं महामायास्वरूपं शिव:स्वरूपतया प्रथममभिमनुते । तत: पुन:शक्ति:क्रमात्ततत्त्वाध्वरूपतया वहिर्गच्छन्ती, पन्चतत्त्वरूपतया वा धावन्ती पृथिव्यां तिष्ठति । शिवश्च तामनुगच्छन्नत्र देहे विद्योतत एव, परन्तु देहात्मतया न पुन: स्वस्वरूपतयेति वद्ध: पशुरुच्यते । यदा पुन: शक्तिप्रतिनिवर्त्य - पूर्णाहंभावस्वरूपा तिष्ठति, तदा शिवो भुक्तशिव इति उच्यते -

चिच्चमत्कृति रूपा विसर्गशक्ति
स्वात्मन:स्वात्मनि स्वात्मक्षेपो नैसर्गिकी स्थिति:।।[1]

१· तन्त्रालोके 3-14।

स्वात्मन्येव विसर्गस्योन्मेषदशां परामृशन्ती "प्राक्संवित्प्राणे परिणता" इति नयेन प्राणनरूपतां चावभासयन्ती प्राणकुण्डलिनीरूपतयागमेषु निरूप्यते । यद्यप्यस्यां प्राणकुण्डलिनीरूपायां विसर्गशक्तौ प्राणनरूपत्वाद्वाह्यभावावभासनात्मिका स्थितिर्दृश्यते, तथाप्यत्र प्राणादिपञ्च वाहस्यानुशीलनात् स्वात्मानन्दचमत्कृतिमयत्वेनैव सर्वतःप्रवर्तत इयमेव प्राणकुण्डलिनी रूपा चिति शक्तिर्विसर्गस्यादिकोटुपात्मनि स्वरूपे स्फुरतीति कौलयोगिभिरनुभूयते । यथा -

तामाश्रित्योर्ध्वमार्गेण चन्द्रसूर्यावुभावपि ।
सौषुम्ने ध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ।।

तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रवुद्धः स्यादनावृत्तः ।।

यथा पितरौ भ्रातरावुत्पादयन्तौ सृष्टपरम्परात्मिकां सृष्टिं रक्षतस्तथैव तां लतावृक्षादयो पि पुष्पफलवीजान्युत्पादयन्तः स्थगयन्ति। इति यथेदं निर्विवादं भूतमन्यात्मकं जगत् परिदृश्यते । दृश्यते नुभूयते चैकस्यादपरस्योत्पत्तिस्तथैवेषां मूलभूतस्यैकस्याकाशस्यापि च प्रकाशकतयाधारभूतस्तस्मादपि सूक्ष्मतमः स इव सर्वत्रानुगतःस्मर्ता एव स्वतन्त्रःपरमेश्वरश्चिदाकाशचिद्घनचिदानन्दादितत्तद्विलक्षणतया तैस्तैःसिद्धयोगजनैरनुभूतः सर्वस्मात् पूर्वसिद्धो स्ति, आकाशादिरिवैको पि यो स्मदादिब्रह्मकीटगुल्मादिरूपेण चकास्ति ।इत्थम्भूतः स एवाय महमस्मीत्यात्मानं सर्वशक्तिमन्तं विदित्वा पौनःपुन्येन निभाल्य स्वरूपस्थो योगी जागृतवोधकुण्डलीको देहस्याधारकचक्रं मत्वा कुण्डलीं स्वातन्त्र्यशक्त्या द्रागेव यथोद्वोधयति । सन्ति यथान्यानि नामानि भगवत्यास्तथैव कुण्डलिनी कुण्डिकेत्यावपि नाम ।

।०। 24-25

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी ।
मातङ्गीविजया जया भगवती देवी शिवा शाम्भवी ।।
शक्तिशङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी ।
ह्रीङ्कारी त्रिपुरा परापरमयी माता कुमारीत्यसि ।।[1]

तथाहि -

यत्षट्पत्रं कमलमुदितं तस्यया कर्णिकाख्या,
योनिस्तस्या प्रथितमुदरे यत्तदोङ्कारपीठम् ।
तस्याप्यन्त: कुचभरनतां कुण्डलीति प्रसिद्धां
श्यामाकारां सकलजननीं सन्ततं भावयामि ।।[2]

तथा च -

त्वां व्यापिनीति सुमना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि स्तुवन्ति विजयेति जयेत्युमेति ।।[3]

एवैव सूक्ष्मा कुण्डलिनी शक्ति शिवेन सह परस्पर सामरस्य रूपशक्यमन्यकभावात्मकं सङ्घट्टयासाहेति यथा -

अकुलस्यास्य देवस्य कुलप्रथशालिनी ।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभु: ।।[4]

अपरञ्च - सात्र कुण्डलिनी बीजं जीवभूता चिदात्मिका ।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततो पुन: ।।[5]

---

1. लघुस्तवे श्लोक सं० 18
2. सकलजननीस्तवे श्लोक सं० 37
3. चर्चास्तवे-
4. तन्त्रालोके श्लोक सं० 67
5. " " 3/220

इत्थमपि सा पारमेश्वरी संविन्मात्ररूपा विसर्गशक्तिरेव गर्भीकृतनिखिलविश्वत्वात् कुण्डलिनीशब्दव्यपदेश्या अनच्कलारूपेति -

या सा कुण्डलिनी सात्र जगद्योनि:प्रकीर्तिता ।
तुष्टिरूपा तु सा ज्ञेया जीवभूता जगत्यपि ।।इति

अत्र योगीनां द्वे गती भवत: । तत्राद्या यथा केषाञ्चित् यदा प्राणापानौ मध्यमार्गे लयं गच्छतस्तदा प्रथमं तावदधोमुखौ सन्तौ लम्बिकास्थानं भित्त्वाङ्गुलिपिहितकर्णघोषवद् ध्वनन्तौ मूलाधारचक्रं वेधयत:तदास्य योगिनो मूलाधारचक्रं सशब्दं पूर्णवेगेन परिवर्तत इति योगी प्राथम्येनानुभवति । ततो मूलाधारचक्रादुत्थिता मध्यवाहिनी प्राणशक्तिर्द्वितीयं नाभिस्थानगतं चक्रं वेधयति, यद्वशात्तद् द्वितीयमपि नाभिचक्रं वेगेन सशब्दं परिभ्रमति । तदानीं योगी यौगपद्येनानयोश्च- क्रयो: परिवर्तनदशामनुभवति । तदनु तस्य योगिन: प्राणशक्तिर्नाभिचक्रात् समुत्थाय वेगेन हृदचक्रं वेधयित्वोर्ध्वं गच्छति, तदा स योगी हृच्चक्रस्यापि वेगेन परिवर्तनदशामनुभवति । तत: कण्ठस्थानमागता या मध्यवाहिनी प्राणशक्ति: कण्ठस्थानगतं चक्रमेव भ्रूमध्यस्थानगतं चक्रञ्च वेगेन वेधयति, यद्वशात्ते उभेचक्रे पि वेगेन परिवर्तेते । इत्थं बिन्दुस्थानगतं चक्रं वेध- यित्वायं योग्यस्यां प्राणकुण्डलिनी स्पन्दनदशायांमूलाधारचक्रस्थानादार- भ्य भ्रूमध्यस्थानगतचक्रपर्यान्तानां समस्तानां चक्राणां यौगपद्येन सवेगं परि- वर्तनरूपत्वमनुभवति, यदनन्तरमेव योगिनमणिमाद्यष्टसिद्धय:समाश्रयन्ते ।

यथा -

वेधदीक्षा च बहुधा तत्र -तत्र निरूपिता ।
सा चाभ्यासवता कार्या येनोर्ध्वोर्ध्वं प्रवेशत: ।।
शिष्यस्य चक्रसंभेदप्रत्ययो जायते ध्रुव: ।
येनाणिमादिकासिद्धि:------ ---।।इति

----
1. तन्त्रालोके 29/237-238

अथकामकलां परामृशन् योगी सिद्धयोगिनी षड्-चक्रात्मरात्मके चर्याक्रम इमां प्राणकुण्डलिनीदशां विषतत्त्वप्रवेशसमये नुभवति । इयमेव वेधदीक्षागतनाद-विन्दु-शक्ति-भुजङ्ग-परेतिरूपा षोढा वर्णिता -

मन्त्रवेधं तु नादाख्यं विन्दुवेधमत: परम् ।
शाक्तं भुजङ्गवेधं तु परं षष्ठमुदाहृतम् ।।[1] इति

वेधदीक्षाषट्कस्य स्वरूपं निर्दिश्यते । मूलाधारचक्रादुत्थिता पूर्णाहन्तान्तमकमन्त्रस्वरूपा प्राणकुण्डलिनी पूर्णाहन्ताबलात् समस्तानि चक्राणि वेधयन्ती आदिमामन्त्रवेधदीक्षेति कथ्यते । मध्योर्ध्व वाहक्रमेण च प्रोच्छलन्ती नादाकारा सा द्वितीया नादवेधदीक्षेति भण्यते । वीर्यस्वरूपा सा प्राणकुण्डलिनी समस्तं चक्रवर्गं वेधयन्ती तृतीयाविन्दुवेधदीक्षेति नाम्ना व्यपदिश्यते । शक्तिरूपतामापन्ना चक्रवेधनक्रियापरा सा तुर्या शाक्तवेधदीक्षा भवति । सर्पाकारतामादधाना चक्रवेधनञ्च कुर्वाणां व्युत्तिष्ठती भुजङ्गवेधदीक्षा पञ्चमी । पराशक्तिरूपतामाश्रयन्ती समस्तचक्रवेधनशीला सा परवेधदीक्षा षष्ठीति ।

अस्या:कुण्डलिन्या: क्वचन अष्टधा वलितत्त्वमयुक्तम् -

अष्टधा कुण्डलीभूतामृज्वीं कुर्यात्तु कुण्डलीम् ।।[2] इति

ध्यानविन्दुयोगचूडामणियोगकुण्डल्यादिषु सर्वासूपनिषत्सु मूलाधारस्थिताया: कुण्डलिन्या:एवोल्लेखो स्ति । परन्तु नहि सर्वेषामेकंदेवेयं सर्वत्र जागर्ति, केषांञ्चिदेतमहलां तथा जागर्ति । अत:

---

1. श्रीकुलगुह्वरतन्त्रे ।

2. योगकुण्डल्युपनिषदि ।

अत: केषाञ्चित् पूर्वं बोधगता, केषाञ्चिन्नादगता, केषाञ्चिद्
हठयोगिनां वा, श्रीगुरुशक्त्या पूतात्मनां वा मूलाधारस्था प्रसुप्ता
वायुगता शक्ति: प्रथमं जागर्ति। यद्यप्येकत्रजागृता सा सर्वत्र प्रभवति,
तथापि न बोधकुण्डलिनी जागृतापि तथा नादप्राणादौ विशेषतो
जागर्ति। एवमेव प्राणकुण्डलिनी जागृतापि न विशेषतो नादबोधयो:
प्रभवति, तथाप्यभ्यासत:सर्वत्रक्रमात् प्रभवत्येवैकत्र जागृतापीति निश्चय:।

अथ च पद्मासनस्थो स्वस्थो योगी गुदमाकुञ्च्याकुञ्च्यवायु-
मूर्ध्वगतं कुर्यात्, कुम्भकप्राणायामयुक्तश्च तिष्ठेत्, तेनानेन मूलबन्धना-
भ्यासेनापि कुण्डलिनी जागर्ति। या स्वीयात्मप्रकाशिका शक्ति:
पञ्चभूतात्मतामेत्यन्तिमभूते स्थिरतामिवागत्य पुन:प्राणादिरूपतामेत्य
बहिर्मुखतां प्रारभ्यान्त:करणबहिष्करणादिरूपात्मोमसूर्यात्मन्नवह्निरूप-
प्रमातृतां शिवेन सह चिरवासीत्। सेदानीमन्तिमबहिर्मुखतां परित्यज्या
न्तिमबहिर्मुखतादिमस्थाने मूलाधारे मध्यस्थाने स्थिरा भवति। ततो पि
साधकशिवप्रयासकृतानुनयविनयलज्जितेवाभिमुखीभूयसामरस्यपर्यङ्कसहस्रा-
शयगन्तुमुपक्रममाणा जागृतापदाभिलभ्यमाना क्रमात् षट्चक्रं विभेदयन्ती
सहस्रारपर्यङ्के स्वात्मसमर्पणेन शिवं पुन:समरसी करोति। उन्मिषन्त्यां
शक्तौ शिवो जीव इवेन्द्रियव्यापारप्रवृत्तौ मुग्ध: स्वभिन्नेदन्तात्मान्दी-
भूतं विषयं शून्यमारभ्य धरापर्यन्तं स्वात्मसात्कुर्वन् संसारीव रवीदति,
पुनर्निमिषन्त्यां च तस्यां गृहीतविषयतया प्रतिनिवृत्तेन्द्रियक्षण इव
सुषुप्त्यवस्थाक्षण इव वा जीव प्रमातेव शिव: स्वात्मविश्रान्तिसुखमनु-
भवति।

पराकुण्डलिनीस्वरूपं निर्दिश्यते

परचितिरूपा विमर्शशक्तिर्यदान्तर्भावोन्मुख्यरूपान्तःकोट्यात्मनि स्वरूपे स्वात्मानं चमत्कुर्वाणा पूर्णाहन्तात्मके पद इदन्तासमावेशं तथेदन्तात्मके पदे पूर्णाहन्तायाः समावेशं कुर्वती समधिव्याख्यानसामरस्यदायिनीं क्रमसुद्रारूपां जगदानन्दस्वरूपात्मिकां परा कुण्डलिनीदशां प्रकाशयति ।

"यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत् ।
यदनावृतसंवित्ति परमामृतबृंहितम् ।।
यत्रास्ति भावनादीनां न मुख्या कापि सङ्गतिः ।
तदेव जगदानन्दमस्मभ्यं शम्भुरूचिवान् ।।[1] इति

किन्त्वेदृशीं समावेशदशामनुभवन् समावेशचमत्कृतिबलादेव व्युत्थानेऽपि समस्तं भावजातं चिद्गगने लीयमानं पश्यन् योगी यदा किन्चित् किन्चिद् व्युत्तिष्ठति, तदा तस्य सर्वाणीन्द्रियाणि प्राणापानसहितानि क्षणं प्रादुर्भूय स्वात्मन्येव लीयन्ते, इत्थं स हिण्डोललीलावदुभयतःप्रसरन्तीमन्तर्बहिः समावेशात्मिकां दशामनुभवन्नेव -

पराकुण्डलिनीधाम प्रविशति, येनास्योर्ध्वकुण्डलिनीरूपायां क्रियाशक्तौ समावेशो जायते, यद्वशात् कौलयोग्यपि सिद्धयोगिनी सङ्घट्ट वेलायां निरंजन पदभाग् भवेत् ।

उक्तं हि केनचिदभियुक्तेन -

"क्रिया देवी निरञ्जनम्" इति ।

1· तन्त्रालोके 5-51,52

एवं कामकलारहस्याभिप्रायेण कामतत्त्वमिच्छाशक्तौ, विषयतत्त्वं ज्ञानशक्तौ, निरञ्जनतत्त्वञ्च क्रियां शक्तावन्तर्भवति । तथेच्छाशक्तिः शक्तिकुण्डलिनीति, ज्ञानशक्तिः, प्राणकुण्डलिनीति क्रियाशक्तिः पराकुण्डलिनीति च तत्र तत्र शिवागमेषु व्यपदिश्यते ।

अत्र स्वशोध-प्रबन्धे एतदेवोपर्युक्तं तत्त्वं स्थालीपुलाकन्यायेन विदुषां पुरतो विधायात्मानं कृतकृत्यं मन्वानः शिव-शरणं गच्छामि ।

षट्चक्राणां परिचयः

शरीरे ऽस्मिन्ननेकेषां तत्त्वानां सद्भावे ऽपि योगसाधने त्यावश्यकतातव्यावयवादीनां स्वरूपाणि तत्र कर्तव्यध्यानादिकं विज्ञाय कैवल्योपलब्धये चक्रज्ञानं परमोपयोगीति तद्विचार आरभ्यते योगिनो मानवशरीरं सप्तप्रासादं भवनं मन्यन्ते । तत्र मूलाधारस्वाधिष्ठान मणिपूरक-अनाहत-विशुद्ध-आज्ञा सहस्रारचक्राणीति सप्तप्रासादाः भवन्ति ।

यदि विश्वे ऽस्मिन् सर्वेभ्यो वस्तुभ्यो द्भुतं किमपि वस्तु विद्यते, तदिदं मानवशरीर मेवास्ति । एतद् द्वारैव भौतिकाध्यात्मिकजगतो नेके चमत्कारा उपलभ्यन्ते । अतो मानवशरीरमाश्चर्याणामाश्चर्यमुच्यते । अनेनैव निर्वाणसुखम्, निर्विकल्पकसमाधिः, भगवत्प्राप्तिश्चावाप्यते । शरीरं व्यवहारस्य परमार्थस्य च मुख्यमस्तिसाधनम् । जनकल्याणभावनया प्रयतमाना अपि मानवा अस्वस्थे शरीरे नात्मनो नापि समाजस्य देशस्य वा वास्तविकं कल्याणं कर्तुं प्रभवन्ति । अतो योगसाधन द्वारा शरीरारोग्यसम्पादनमत्यावश्यकमस्ति ।

यथा भूमण्डलस्याधारो मेरुरस्ति, तथैव मानवशरीरस्याधारो मेरुदण्डः। मेरुदण्डो हि पृष्ठमांससंलग्नस्त्रयस्त्रिंशदस्थिखण्डैः सम्बद्ध आभ्यन्तरे वकाशवान् वर्तते। अस्याधस्तनोभागो तितीक्ष्णः सूक्ष्मश्चास्ति। तत्समीपवर्ती भागःकन्द इति नाम्ना व्यवह्रियते। अत्रैव जगदाधारमहाशक्तेःप्रतिमूर्तिः कुण्डलिनी विराजते। मेरुदण्डाद्बहिर्वामभाग इडानाम्नी चन्द्रनाडीदक्षिणभागे च पिङ्गलाख्या सूर्यनाडी सम्बद्धा चकास्ति। तयोर्मध्ये तेजोरूपा सुषुम्णानाडी तु मेरुदण्डस्याभ्यन्तरे मूलाधारकन्दभागादारभ्य कपालस्थितब्रह्मरन्ध्र सहस्रारपर्यन्तं गच्छति। यथा कदलीस्तम्भे दलानि भवन्ति, तथैव सुषुम्णाया आभ्यन्तरे क्रमशो वज्रा, चित्रिणी, ब्रह्मनाड्यःसन्ति। मेरुदण्डस्याभ्यन्तरे ब्रह्मनाड्यां ग्रथितानि षट्कमलानि सन्ति यानि षट्चक्राण्युच्यन्ते। प्रत्येकं कमलं विभिन्न वर्णं विभिन्नसंख्याकदलं च विद्यते। इमानि षट् येषाभवयवानां सम्मुखे मेरुदण्डस्याभ्यन्तरे विद्यन्ते। तेषां नामानि प्रसिद्धानि सन्ति। यथा -

"मूलाधारं स्वाधिष्ठानं मणिपूरकमेव च।
अनाहतं विशुद्धाख्यमाज्ञा षट्चक्रमुच्यते।।[1] इति

तत्र प्रथमं मूलाधारचक्र वर्णनम्

अथाधारपद्मं सुषुम्णाख्यलग्नं,
ध्वजाख्यो गुदोर्ध्वं चतुःशोणपत्रम्।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः।।[2] इति

---

1. गरुडपुराणे अ0 15 श्लोक 73

2. तत्रैव।

मूलस्य शरीरकारणस्य बिन्दोराश्रयत्वेनेदं चक्रं मूलाधार चक्रे-त्युच्यते । मेरुदण्डस्याधस्तात् कन्दप्रदेशसम्बद्धपायूपस्थयोर्मध्ये विद्यमानमेतच्चक्रकमलं सुवर्ण वर्णं वर्तते । इदं चक्रं चतुष्कोणमस्ति । अस्य बीजं कमलबीजं "लं" इति वर्तते । एतन्मध्ये स्वयम्भूलिङ्गमस्ति । यस्य चतुर्षुदिक्षु सार्धत्रयावर्तसर्पाकारा स्वमुखे पुच्छं दधाना सुप्ता कुण्डलिनी शक्तिर्विराजते ।

तथा चोक्तम् -

"विद्युद्विलासवपुषः श्रियमावहन्तीं,
यान्तीं स्ववासभवनाच्छिवराजधानीम् ।
सौषुम्णमार्ग कमलानि विकासयन्तीं
देवीं भजे हृदि परामृतसिक्तगात्राम् ।।[1] इति

इदं चक्रं कामफलप्रदं कामरूपाख्यं पीठमप्युच्यते । अत्रोपासकानां सकलकामनासिद्धिर्भवति । एतत्समीपे किञ्चिदूर्ध्वं मूलकन्दः पक्ष्यण्ड-स्वरूपो ऽस्ति, यतः सर्वनाड्यो निःसरन्ति ।

तदुक्तम् -

"ऊर्ध्वं मेढ्रादधो नाभेः कन्दो यो ऽस्ति खगाण्डवत् ।
ततो नाड्यः समुत्पन्ना सहस्राणि द्विसप्ततः ।।[2] इति

---

1. हठयोगप्रदीपिकायाम् ।

2. ध्यानबिन्दूपनिषदि -श्लोक सं० 5

मूलाधारचक्रे डाकिन्या: स्थिति

अस्मिन् मूलाधारचक्रे वसन्ती चतुर्भिर्भुजैर्युक्ता रक्तनेत्रा कान्चनशोभां वहन्ती डाकिनीदेवी साधकानां तत्त्वज्ञानं सम्पादयति । ब्रह्मणा शक्तित्वादस्या: अपि चतुर्बाहुत्त्वम् ।

वज्रिणी नाड़ी मुखदेशे मूलाधार पद्मकर्णिकाया मध्ये वर्तमानं विद्युत्समानाध्वनि स्निग्धं योन्याकारं त्रिकोणम् ,तदन्त: कामवायु: "क्लीं" इति कामबीजस्य रक्तवर्णं कोटिसूर्यभास्वरं विलसति। तथा चोक्तम् -

आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम् ।
त्रिकोणमध्ये देवेशि कामबीजं सुलक्षणम् ।। इति

तत्र स्वयम्भूलिङ्गास्यावस्थिति: -

तस्मिन् योन्याकारत्रिकोणे द्रवीभूतसुवर्णकमनीय कान्तिर्ज्ञानिनां योगिनां तत्त्वज्ञानेन ध्यानैकतानमानसानां मुनीनाञ्च स्वरूपचिन्तनया प्रकाशशील: पूर्णचन्द्रमण्डलप्रकाशकुण्डलिन्या:समं निवासशील:शम्भु: "स्वयम्भुलिङ्गम् " वर्तते ।

---

1. शाक्तानन्दतरङ्गिण्याम् -

स्वयम्भुलिङ्गोर्ध्वे कुण्डलिन्याः स्थितिः -

स्वयम्भुलिङ्गोर्ध्वे विलसन्तुलनीयश्री जगतां मोहजनिकां मायारूपिणी ब्रह्मद्वारमुखं स्वमुखेनाच्छादयन्ती सार्धत्रिवलयाकारा स्वयम्भुलिङ्गोपरि सुप्ता पुष्परसपानोन्मत्ता लिकुलसमं मधुरं कूजन्ती श्वासप्रश्वास क्रमेण प्राणिनां प्राणांश्च धारयन्ती कुलकुण्डली विलसति ।

तदुक्तम् -

भिद्यमानात् पराद् विन्दोरव्यक्तात्मा रवो भवत् ।।[1] इति

कुण्डलिन्याध्यानफलम्

मूलाधारचक्राभ्यन्तरविवरे कोटिसूर्यप्रकाशां कुलकुलिनीं ध्यात्वा साधको वाचामधीश्वरतामधिगच्छति । किञ्च निरामयो भूत्वा परमेश्वरपरायणः सन् निरन्तरं सुरभारतीविरचितानेककाव्य प्रबन्धैश्चिरं सकलगुरुगुरून् ब्रह्मविष्णुमहेश्वरादीन विद्वद्भूसुरांश्च सेवते ।

द्वितीयं स्वाधिष्ठानचक्रम्

सिन्दूरपूर रुचिरारुण पद्ममन्यत्,
सौषुम्णमध्यघटितं ध्वजमूलदेशे ।
अङ्गच्छदैः परिवृतं तडिदाभवर्णै-
र्वाद्यैः सविन्दुलसितैश्च पुरन्दरान्तैः ।।इति

---

1. शारदायां प्रथमपटले ।

उपस्थसमीपे सुषुम्णानाड्यां हीरकप्रभं सिन्दूरवर्णमिदं चक्रं विद्यते । अत्र षड् दलानि सन्ति, तेषु क्रमशः सानुस्वाराणां ब-भ-म-य र-लेति वर्णानां स्थितिर्विद्यते । अस्य बीजं वरुण बीजं "वं" इति वर्तते ।

तत्राम्भोजमण्डलम्, तत्र च वरुणबीजस्थितिः

निरुक्तस्वाधिष्ठानपद्मकर्णिकायां शुक्लवर्णार्धचन्द्रसमेताम्भोजमण्डलम् विलसति, तस्मिंश्च शारदशशिविशदं मकरवाहनं वरुणबीजं "वं" अवतिष्ठते । अत्र वमिति वरुणबीजस्थित्या वरुणस्यापि स्थितिरवगन्तव्या ।

वरुणबीजस्याङ्के विष्णोरवस्थानम्

तस्य वरुणबीजस्याङ्कदेशे विलसितो नीलजीमूतकान्तिःपीताम्बरधरः श्रीवत्सकौस्तुभविभूषिताङ्कश्चतुर्भुजो रुचिरां श्रियमादधानः श्रीविश्वम्भरो विराजते ।

अस्मिन् स्वाधिष्ठान पद्मे नीलकमलकान्तिर्विविधाभरणभूषितादिव्याम्बरधरा नानायुधोद्यतकरा राकिणीशक्तिर्विराजते ।
यथोक्तम् - मूलाधारादिषट्परमान्तर्गतशक्तीनां स्थितौ -

विशुद्धौ डाकिनी देवी, राकिणी चाप्यनाहते ।
लाकिनी मणिपूरस्था स्वाधिष्ठाने तु काकिनी।।[1] इति

---

1. शाक्तानन्दतरङ्गिण्याम्

तृतीयं मणिपूरकचक्रम्

"मणिमद् भिन्नं तं पूरं मणिपूरं ततो विदु:"।[1] इति

यथा-

तस्योर्ध्वे नाभिमूले दशदललसिते पूर्णमेघप्रकाशे
नीलाम्भोजप्रकाशैरुपहितजठरे डादिफान्तै:सचन्द्रै: ।
ध्यायेद् वैश्वानरस्या रुणमिहिरसमं मण्डलं तत् त्रिकोणं .
तद्वाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वन्हे:सबीजम् ।।

मेघसदृशं महाप्रभं विद्युदाभं च चक्रमिदं नाभिप्रदेशे मेरुदण्डस्याभ्यन्तरे सुषुम्णायां स्थितमस्ति । रक्तकमलं नीलवर्णं विराजते ।अत्र दशदलानि सन्ति । तेषु क्रमश: सानुस्वारा: ड-ढ-ण-त-थ-द-ध-न-प फेति दशवर्णा: सन्ति । अस्य बीजं वन्हिबीजं "रं" इति वर्तते । कणिकायां लाकिनी शक्तिर्विराजते । एतस्य क्वचन नाभिचक्रमित्यपिनाम श्रूयते ।

तस्मिंस्त्रिकोणे वन्हिमण्डले मेषवाहनं रक्तवर्णं चतुर्भुजं "रं" इति वन्हिबीजं ध्यायेत् । अत्र वन्हिबीजस्य स्थितेरतत्र वह्नेरपि स्थितिरित्यवधेयम्, मन्त्रदेवतयोरभेदस्य सर्वतन्त्र सिद्ध सिद्धत्वात् । एवञ्च यत्र - तत्र यद्देवताबीजोपस्थितिस्तत्र तत्र तददेवतास्थितिरप्यवधेया ।

अत्र पद्मेलाकिनीशक्तेरवस्थिति: -

मणिपूरपद्मकर्णिकायां सकललोकशङ्करीपीतवस्त्रालङ्कारादिभिरलङ्कृता भुजचतुष्टयधारिणी, श्यामा रुद्रशक्तिर्लाकिनी विलसतितमाम्।

मणिपूरकचक्रचिन्तनफलम्-

साधको नाभिस्थानगत मणिपूरकचक्रध्यानेनाविरतमवनिमण्डलस्य पालने संहरणे च नितरां समर्थो भवति । भगवती वाग् वादिनी चास्य वदनकमलं सततमेवाधिवसति ।

---

1. गन्धर्व तन्त्रे ।

ततस्तुरीयमनाहतचक्रम्

शब्दब्रह्ममयं शब्दो नाहतस्तत्र दृश्यते ।
अनाहताख्यं परमं तन्मुनिभिः परिकीर्त्यते ।।[1] इति

उद्यदादित्यसन्निभस्यास्य चक्रस्य स्थितिर्हृदयसन्निहितायां सुषुम्णायामस्ति । चक्रमिदमरुणवर्णैर्द्वादशभिर्दलैर्युक्तं वर्तते । द्वादशसु दलेषु क्रमशः क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठे ति द्वादशवर्णाःसानुस्वाराः स्थिताःसन्ति । अस्य बीजं वायुबीजं [यं] इति वर्तते । कर्णिकायां काकिनी शक्तिश्च विराजते -

तथा चोक्तम् -

एतत्पद्मस्योर्ध्वदेशे विपलं पद्मसुन्दरम् ।
शोभितं द्वादशैः पत्रैः शोणवर्णसमन्वितम् ।।
पद्ममध्ये बीजकोषे षट्कोणमध्यमं शुभम् ।
मण्डलस्य मध्यदेशे वायुवीणं मनोहरम् ।।[2]इति

तत्र वायुबीजं तदीशस्थितिश्च

वायुमण्डलस्य मध्ये चानन्दमयं चतुर्बाहु समन्वितं कृष्णसार-मृगवाहनं श्रेष्ठं वायुबीजं वरीवर्ति । यथोक्तम् -

अनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ।।[3] इति

---

1. तन्त्रसारे 2. निर्वाणतन्त्रे
3. तन्त्रसारे

एतत्पद्मकर्णिकायां काकिनीशक्तेरवस्थिति:

अनाहताख्यपद्मस्य कर्णिकायामीश्वराख्यस्य शिवस्यपार्श्वे ।

"तत्पार्श्वेध्यानमाकुर्यात् काकिनीं परमेश्वरीम् ।[1] इति

ईश्वरपार्श्ववर्तिनी त्रिनेत्रा चतुर्भुजा पीवर्णा नानालङ्कार-भूषिता पाशकपालवरा भयकरासाधकानां हितं सम्पादयन्ती सहस्रार-गलितामृतरसेनार्द्रीकृतहृदया कङ्कालमालिनी काकिनी शक्ति विराजते ।

अनाहतचक्रचिन्तनफलम्

अभीष्टसम्पादने कल्पपादपस्वरूपस्य निवकम्पदीपशिखाकारेण जीवात्मना संशोभितस्य भगवत: शर्वस्य निवासभूतस्य सूर्यमण्डलारुणकिरण सम्पर्केण प्रोत्फुल्लानां केशराणां शोभयान्वितस्यास्या नाहतपरमस्यध्यानात् साधको वृहस्पति तुल्य:सर्वशास्त्रविद् वाक्पटु: सृष्टिस्थिति संहारक्षमो ज्ञानिनां श्रेष्ठो निरन्तरकाव्यामृतरसास्वादननिपुणो नारायणसदृशो योगी परकायप्रवेशयोगताञ्च लभते ।

तथोक्तम् -

ध्यायेद् यो हृदिपङ्कजं सुरतरुं सर्वस्य पीठालयं,
देवस्यानिलहीनदीपकलिकाहंसेन संशोभितम् ।
भानोर्मण्डलमण्डितान्तरलसत् किञ्जल्कशोभाकरम् ,
वाचामीश्वर ईश्वरो पि जगतां रक्षाविनाशक्षम:।।[2]

1· रुद्रयामले

2· श्रीतत्त्वचिन्तामणौ ।

पञ्चमं विशुद्धचक्रम्

विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत्परम् ।। [1] इति

अस्य चक्रस्य स्थितिः कण्ठप्रदेशे मूले विद्यते । एतत्कमलं धूम्रवर्णैः षोडशदलैर्युतमस्ति । तत्र षोडशसु दलेषु अ-आ-इ-ई-उ-ऊ ऋ-ॠ-ऌ-ए-ऐ-ओ-औ-अं-अः इत्येते षोडशस्वराः विराजन्ते अस्य बीजं नभोबीजं "हं"इत्यात्मकस्य नभोबीजस्याङ्के गिरिजाभिन्नदेहस्त्रिलोचनः पञ्चाननः शार्दूलचर्मवसनः सदाशिवो देवो निवसति ।

विशुद्धपद्मकर्णिकायां शाकिनीशक्तेश्चन्द्रमण्डलस्य चावस्थितिः

अस्मिन् कमले सुधाधवला चतुर्भिः करैः शरचापपाशाङ्कुशान् धारयन्ती पीतवसना शाकिनीशक्तिर्निवसति, अस्य कमलस्य कर्णिकायां सम्पूर्णं निष्कलङ्क मृगाङ्कमण्डलं विलसति । एतच्चन्द्रमण्डलश्च योगाभ्यासविशुद्धचेतसः साधकस्य निर्वाणमुक्तिकारणं वर्तते ।

एवञ्च कर्णिकान्तरनभोमण्डलमध्ये चन्द्रमण्डलं तत्र नभोबीजं तत्रार्धनारीश्वरः सदाशिवः शाकिनीशक्तिश्चेत्यवधेयम् ।
यथोक्तम् -

पद्ममध्ये वराटे च जनलोकं सुसुन्दरम् ।
महामोहान्धशमनं तद्वाध्ये चन्द्रमण्डलम् ।। [2] इति

---

1. शाक्तानन्दतरङ्गिण्याम् ।
2. निर्वाणतन्त्रे अष्टमे पटले ।

एतत्पद्मचिन्तनफलम्

यः शान्तचेताः साधको विशुद्धचक्रचिन्तने निरवधिचित्तं विदधाति । सः कविर्वाग्मी, ज्ञानी तथा त्रिलोकदर्शी निखिलोक-कल्याणकारी, रोग, शोकविमुक्तश्चिरञ्जीवी भवति ।

पञ्चमाज्ञाचक्रम्

आज्ञाचक्रस्य नामकरणे उक्तम् -

"आज्ञासंक्रमणं तत्र गुरोराज्ञेति विश्रुतम् ।"[1]

विशुद्धचक्रस्योर्ध्वं भ्रुवोर्मध्ये द्विदलमाज्ञाचक्रम् वर्तते ।

अत एवोक्तम् -

"आज्ञा नाम भ्रुवोर्मध्ये चक्रं च द्विदलं परम् ।"[2] इति

चक्रमिदं भ्रुवोर्मध्ये मेरुदण्डस्याभ्यन्तरे ब्रह्मनाड्यां स्थितमस्ति। कमलमेतत् श्वेतवर्णं द्विदलञ्च वर्तते । तत्र तयोर्दलयोःस्वानुस्वारौ ह-क्षौ द्वौ वर्णौ विद्येते पद्मस्यास्य कर्णिकायां शशिसमधवला हाकिनी शक्तिः षडानना विधा वरा भयकपालडमरुजपमालासमलङ्कृतकरकमला शुभ्रचित्ता विराजते ।

आज्ञापद्मकर्णिकायां मनसःकर्णिकान्तस्त्रिकोणे चेतनाख्यशिवस्य प्रणवस्य च स्थितिः -

---

1. शाक्तानन्दतरङ्गिण्याम् ।

2. " "

आज्ञापद्मस्य कर्णिकायां सर्वशास्त्रप्रसिद्धमतीन्द्रियं सूक्ष्मरूपं मनो निवसति । अस्य कमलस्य कर्णिकान्तस्त्रिकोणे चेतराख्यशिवलिङ्गं विराजते ।

आज्ञाचक्रचिन्तनफलम्

आज्ञाचक्रचिन्तननिष्ठः साधकवरः परकायप्रवेशक्षमः सर्वज्ञः सर्वदर्शी मनसा वाचा कर्मणा च सकललोकोपकारको दैताचारशीलः परमसिद्धियुक्तो दीर्घायुस्तथा लोकत्रयसृष्टिस्थितिसंहारकर्ता च भवति।

अस्मिन्नाज्ञाचक्रे निरुक्तत्रिकोणस्यान्तः प्रणवरचनारूपेण स्थितः अकारोकारसङ्घातरूप ओंकारप्रकाशशीलो निवसति, तस्यैवोकारस्योर्ध्वमर्धचन्द्राकारचिन्हं विलसति । अर्धचन्द्रोर्ध्वे विन्दुरूपीमकारो निवसति, मकार विन्दुरूपेण तत्र वर्तत इत्यर्थः ।

अस्मिन्नानन्दमयसदने आज्ञाचक्र स्थितं प्रणवं परितो मनसि निलीने सति श्रीनाथचरणाराधनविहितांविषयसम्बन्धोच्छेदकारिणीं चेतसः स्थैर्यसम्पादिनीं योनिमुद्रां खेचरीमुद्रां वद्ध्वा निरन्तरं प्रणवानुशीलनात् साधको योग्यग्निस्फुलिङ्गान् पश्यति । निरुक्ताज्ञाचक्रकर्णिकायामग्निचन्द्रसूर्यमण्डले इव भगवान् परमशिवः साक्षाद् भवति । अयमेव भगवान् शिवः सर्व पपन्नानां सृष्टिस्थिति संहारान् स्वविभवेन निर्वर्तयति

अथ च सहस्रारचक्रम्

एषां षण्णां चक्राणामुपरि सहस्रारचक्रं विद्यते । तत्स्वरूपमुक्तम् यथा -

सहस्रारं महापद्मं शुक्लवर्णमधोमुखम् ।
अकारादिसकारान्तैः स्फुरद्वर्णैर्विराजितम् ।।[1] इति

निरुक्तमहानादोर्ध्वे शङ्खिन्या नाड्या अग्रभागे शून्याकारस्थाने तथा ब्रह्मरन्ध्रस्थलाद् विसर्गात् प्रकृतेरधःप्रदेशे विसर्गस्य ब्रह्मरन्ध्रे स्थितिमाह -

ततो वायुर्महानादो ब्रह्मरन्ध्रं ततःपरम् ।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ।।[2] इति

प्रकाशरूपं परिपूर्णचन्द्रवदतिशयशुक्लवर्णमधोवक्त्रं कमनीयाकृति रक्तभास्वरकेशरसमूहंललाटादिषु विन्यस्तैरकारादिक्षकारान्तैः । पञ्चाशद् वर्णैः प्रविलसितवपुः केवलानन्दरूपं सहस्रदलं पद्मं विलसति। यथोक्तम् -

अकारादिसकारान्तं स्फुरद्वर्णैर्विराजितम् ।[3]
"मातृकाक्षरसम्भूतं सहस्रारं सरोरुहम् "[4] इति

एतस्य सहस्रदलकमलस्य कर्णिकायां परमामृतसमूहेषु स्निग्धं निर्मलं सम्पूर्णचन्द्रमण्डलं विद्यते । निरुक्तचन्द्रमण्डलाभ्यन्तरे विद्युत्सदृशकान्तित्रिकोणमस्ति तस्य त्रिकोणस्य मध्ये सकलसुरगणैःसेवितमतिगुह्यं शून्यं परं बिन्दुरूपं स्फुरति ।

---

1. कङ्कालमालिनीतन्त्रे ।
2. " "
3. " "
4. शाक्तानन्दतरङ्गिण्याम् ।

निरुक्त:परशिव एव श्रीगुरुरूपो दीक्षागुरुरूपेण धरायामवतीर्या-मृतजयतत्तदुपास्य देवतातत्तन्मन्त्रदीक्षया साधकानां परमपुरुषार्थं निर्वर्तयति।

एतच्चोक्तम् -

मनुष्यचर्मणा नद्ध: साक्षात् परशिव:स्वयम् ।
स्वशिष्यानुग्रहार्थाय गूढं पर्य्यटति क्षितौ ।।[1] इति

सहस्त्रदलकमलकर्णिकायां शैवा: शिवस्थितिं वैष्णवा:मानवा: भगवत: परमपुरुषस्य विष्णो:स्थानम्, हरिहरोभयोपासका:श्रीहरिहरपदम् श्रीपराशक्तिभक्तिरसास्वादनाशक्ता:शाक्ता:श्रीपरशक्तिस्थानम्, योगीन्द्राश्चामलं प्रकृतिपुरुषस्थानमालयन्ति । यथा -

शिवस्थानं शैवा:परमपुरुषं वैष्णवगणा:,
लपन्तीति प्रायो हरिहरपदं केचिदपरे ।
पदं देव्या देवीचरणयुगलानन्दरसिका,
मुनीन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम् ।।[2] इति

---

1. कुलार्णवतन्त्रे ।

2. श्री तत्त्वचिन्तामणौ -

सहस्रदलकमलज्ञानफलम्

अस्मिन् सहस्रदलकमले स्वेष्टदेवता वस्थितिं ज्ञात्वा स्वाभिष्ट देवतादत्तचित्तः साधकः संसारे स्मिन् शुभाशुभफलकर्मक्षयाद भोगहेतुभूतकर्मा-न्तरानुदया च्च पुनर्जन्मपरिग्रहं न करोति, तथा स्य साधकस्वस्वाभीष्ट कार्याणि सम्पादयितुमनिष्टानि कर्माणि च परिहर्तुं समग्राशक्तिर्जागर्ति ।

निरुक्तसहस्रदलकमलकर्णिकान्तर्वर्तित्रिकोणेशशिनः षोडशभागैक-रूपा प्रातःकालीनसूर्यसदृशारुणवर्णा सूक्ष्ममृणालसूत्रस्य शतभागैकरूपा परशक्ति-स्वरूपा क्षयोदयरहिता सततप्रकाशवत्यधोवक्त्रा प्रचुरामृतवर्षिण्यमानाम्नी कला विलसति ।

तस्या अमा कलाया अन्तर्गता परात्परतरा केशाग्रसहस्रभागैक भागरूपातिसूक्ष्मा प्राणिनां चैतन्यस्वरूपा ब्रह्मानन्ददाभिन्यर्धचन्द्रवत्कुटिला कारा द्वादशसूर्यसमप्रकाशा निर्वाणकला विलसति ।

अमाकला निर्वाणकलयोः स्वरूपं वर्णितम् -

अत्र नित्योदिता वृद्धिक्षयहीना अमाकला ।
तन्मध्ये कुटिला निर्वाणाख्या सप्तदशीकला ।।[1]

एतस्या निर्वाणकलाया मध्यदेशे निखिलप्रपञ्चसृष्टेरादौ वर्तमाना, अत एवा पूर्वा नन्तादित्यप्रभा त्रिभुवनजननी सूक्ष्मतमा त्यन्तगुह्या सागरस्या मृतजनितपरमामृतधाराधरा प्राणिमात्रस्य जीवात्मस्वरूपा योगिनां हृदये तत्त्वज्ञानसम्पादिका परं विन्दुस्वरूपा निर्वाणशक्तिर्विलसति ।

---

1. कङ्कालमालिनीतन्त्रे ।

अत्र निर्वाणकलान्तर्निर्वाणशक्तिस्थितेरभिधाने पि नादोपरि तस्याः स्थितिरित्यवधेयम् ।

तदुक्तम् -

निर्वाणाख्यान्तरगता वन्हिरूपा निबोधिका ।
नादो व्यक्तस्तदुपरि कोटयादित्यसमप्रभा ।।
निर्वाणशक्तिः परमा सर्वेषां योनिरूपिणी ।। इति

तस्या निर्वाणशक्त्या अभ्यन्तरस्य नित्यस्वरूपं योगिभिः स्वानुभ्कितयोगमात्रवेद्यं नित्यानन्दाख्यं तत्त्वज्ञानप्रकाशकं निर्मलं परब्रह्म स्थानं वर्तते ।

एवञ्च सम्प्रदायभेदेन संज्ञाभेदे पि शैवशाक्त- वैष्णवादीनांसर्वेषा-मेवोपासकानां चरमलक्ष्यभूतं पदमित्यवधेयम् ।

अनेन षट्चक्रवर्णन क्रमेण -

सहस्राराम्बुजा रूढा सुधासारभिवर्षिणी ।
तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिताः इति

वस्तुपसंहारववनेन मूलाधारमादाय सहस्रारपर्यन्तं गच्छन्तीं महामहिमामयीं कुण्डलिनीं संस्तूय संक्षेपतश्च प्रस्तूय निरमामि नमामि च तां कुण्डलिनीमिति शम् ।

1• कङ्कालमालिनीतन्त्रे द्वितीयपटले -

शिवशक्त्योः सामरस्ये प्रकाशविमर्शतत्त्वनिष्पत्तिः

सहजा धेया शब्दशक्तिरिति भेदेन शक्तिस्त्रिधा भवन्ति । जातमात्रस्य पक्षिणो काशे उत्पन्नश्च शिक्षायाः अभावे पि तेषां स्वाभाविकी गतिः सहजाशक्तिरिति । आधेयाशक्तिश्च पाषाणादिना निर्मितायां प्रतिमायां प्रतिष्ठाविधिना स्थापिता विष्ण्वादिदेवशक्तिः । शब्द शक्तिश्च घटशब्देन घट-घटत्वावच्छिन्नस्य विशेष्य-विशेषण-वाच्यवाचकभावस्य शक्तिः इति । तत्र त्रिषु तासु शक्तिषु शब्दशक्तिरर्थबोधे जातेवोपयुज्यते न तु स्वरूपसती । तस्माच्च शब्दशक्तेः स्वरूपं कीदृशो भवति जिज्ञासायां "अस्माच्छब्ददयमर्थोबोद्धव्यः"[1] इत्याकारा शब्दजन्यबोधविषयत्वप्रकारिका अर्थविशेष्यिका अथवा "इदं पदमिममर्थं बोधयितुं"[2] इत्याकारार्थ विषयकबोधजनकत्वप्रकारिका इदं पदनिरूपित जनकतावत्त्वेन ईश्वरेच्छाविषयः वाचकः बोधविषयत्वेनेश्वरेच्छाविषयश्च वाच्य इति तन्नये वाच्य-वाचकं भावो व्यवतिष्ठते । परन्तु नैयायिकमतमिदन्नयुक्तम् - अर्थेनासम्बद्धस्य शब्दस्य तद्बोधकत्वानुपपत्त्या कल्प्यमानस्य शक्तिस्वरूपसम्बन्धस्यार्थविषयकबोधजनकत्व घटितत्वे अल्पाश्रयापत्तिः । विनिगमनाविरहेणेश्वरेच्छाबोधरूभयोः शक्तित्वकल्पने गौरवाच्च । किन्च दण्डात् घटो भवतु इतीच्छाविषयत्वेव दण्डेघटजनकत्वं स्यादिति । "अन्यथा सिद्धि शून्यस्य नियतापूर्ववर्त्तिता" इति कारिकाया घटाव्यवहितप्राक्क्षणावच्छेदेन घटाधिकरणवृत्तित्वरूपस्य नैयायिक परिभाषितस्य घटजनकत्वस्योच्छेदापत्तिः। किन्च धूमात् वन्हिज्ञानं जायतामितीच्छाविषयत्वमेव वन्हिधूमयोःसम्बन्धः स्यात् । तत्सम्बन्धमहिम्नैव च धूमात् वह्नेरनुमितिःस्यादिति व्याप्तेरुच्छेदापत्तिः । अथ च चक्षुरादिप्रमाणानां जनकत्व तद्घटितातिरिक्त सम्बन्धेनैव

1.

2.

घटादिप्रमेयसम्बन्धानां घटादिविषयकज्ञानजनकत्वदर्शनेन तद्वदेव शब्दानामपि जनकत्व तद्घटितातिरिक्तसम्बन्धेनैवार्थ सम्बन्धानां शब्दानामर्थबोधकत्व स्यौचित्यात् । किन्च निरूवतेच्छाया समवायेनात्मवृत्तित्वे पि शब्दार्थ-रूपसम्बद्धसम्बन्धिवृत्तित्वाभावात् सम्बन्धत्वं दुर्वचम् । "सम्बन्धो हि सम्बन्धिभ्यां भिन्न उभयाश्रित:" "द्विष्ठ:सम्बन्ध:" इति च "विशिष्टबुद्धि-नियामक:"इति वाभियुक्तोक्ते:। स्वनिरूपित बोधविष त्वनिष्ठप्रकारता-निरूपितविशेष्यतासम्बन्धेन शब्दवृत्तित्वन्चेति तस्या द्विष्ठत्वमिति तु दुर्वचम् । आधाराधेयभावनियामकसम्बन्धस्यैव वृत्तितानियामकत्वेन निरूवते-च्छाविषयताया शब्दार्थयोरिच्छाश्रयतानियामकत्वानुपपत्ते: ।अत: नैयायिको क्तशाब्दशक्तिस्वरूपमन्नसमीचीनम् । अत:प्राचीनैर्वैयाकरणै: "बोधजनकतारूपा-शक्ति:" अङ्गीक्रियते ।

उक्तन्च -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता तथा ।
अनादिरर्थै: शब्दानां सम्बन्धो योग्यता तथा ।। इति

केचित्तु आधुनिकदेवदत्तादिस्थले नादित्वावशेषणविशिष्टबोध-कारणतारूपायाश्च शक्तेरभावात् । ततो बोधो न स्यादिष्यते च बोधो त: सङ्केतज्ञानमपि हेतुरित्युच्यते । पित्रादि संकेतज्ञाने पि अन्वयबोधप्रसङ्गात् न लाक्षणिकातिव्याप्तिश्चेति सङ्केतज्ञानमन्तरा बोधानुदयाच्छाब्दबोधम्प्रति-सङ्केतज्ञानमपि हेतुर्वाच्य:। तथा चावश्यकत्वात् सङ्केत एवं शक्तिरस्तु , आधुनिकदेवदत्तादिपदे पित्रादि:गवाक्षौ चेश्वरस्येतिवक्तुमशक्यमिति स्वी-क्रियते, तन्न रोचते वैयाकरणेभ्य: । यतो हि सङ्केतस्य स्वरूपहेतुत्वेगृहीत-शक्तिपदादपि अर्थबोधापत्ति: । सामान्यतो ज्ञातस्य हेतुत्वे प्रमेयत्वादिना

तज्ज्ञाने पि बोधप्रसङ्गात् । सङ्केतत्वेन तज्ज्ञानशून्यानां तत्तदर्थबोध-
जनकत्वग्रहवतां बोधेन चाभिचार: ।अत: सर्वत: पर्यालोचनया गम्यते
यत् बोधजनकतारूपैवशक्ति: । एतादृशी बोधजनकतारूपाशब्दशक्तिर्द्विविधा
प्रसिद्धाशक्तिरप्रसिद्धशक्तिश्चेति । तत्र प्रसिद्धा शक्त्या गङ्गापदप्रसिद्ध-
स्य भगीरथरथखाताविच्छिन्नजलप्रवाहरूपार्थबोधो जायते, अप्रसिद्धा शक्त्या
तु तीरादिलक्ष्यार्थस्यावबोध इति वैयाकरणभूषणकारादीनां वैयाकरणानां
मतं सिद्ध्यति ।

अत: -

फलव्यापारयोर्धातुराश्रये तु तिङ: स्मृत: ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।। इति

इतिकारिकानुसारेण फलव्यापारयोरिति । द्विवचनेन
फलनिरूपिता व्यापारनिरूपिता च धातो:पृथक्शक्तिरिति "एकवृन्तफल
द्वयन्यायेन "पृथगुपस्थितिप्रयोजिकाखण्डशक्तैकैवशक्तिरिति वा । अतएव
फले स्लोकादिरूपकर्मणो भेदेन ग्रामादिकर्मणश्च भेदसम्बन्धेनान्वय इति ।

प्राचीनवैयाकरनामिदम्मतं शब्दशक्तिस्वरूपंनव्यवैयाकरणा:
न सहन्ते । यतश्च बोधजनकतारूपशक्तिस्वीकारे त्माश्रयापत्ति:।
आत्माश्रयेण स्वस्यैव स्वावच्छेदकत्वासम्भवादिति -

नागेशोपाध्यायास्तु फलविशिष्टव्यापारे व्यापारविशिष्ट
फले च पदपदार्थयो: सम्बन्धान्तरमेव शक्ति: मन्यन्ते । यतो हि
पृथक्शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकस्य फलोद्देश्यकव्यापार-
विधेयकस्य च बोधस्यापत्ति: । उद्देश्यविधेयभावेनान्वयप्रयोजिकाया:

---

1. वैयाकरणभूषणसारे धात्वर्थनिरूपणे का०सं०2

पृथगुपस्थितेः सत्वात् । एवं हि शक्तिनिरूपणप्रसङ्गे वैयाकरणलघुमंजूषा-
यामर्थविषयकत्वबोधजनकत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपि-
केश्वरेच्छारूपा तादृशीच्छीयाविशेष्यतारूपा वा शक्तिरिति नानाविधाः
पक्षा अवलम्बितास्तार्किकैः । नागेशेन च इच्छायाः विशेष्यतायाः वा
सम्बन्धत्वस्य वचनाप्यदर्शनात् शाब्दबोधात् प्रथमं तादृशस्य सम्बन्धस्यावर्त
मानत्वेन कार्याव्यवहित प्राक्क्षणावच्छेदेन वर्तमानस्यैव कारणतावच्छेदकतया
तार्किकाभिमतशक्तेःसम्बन्धत्वं वक्तुमशक्यमित्यादनेकदोषैः तेषां शक्ति-
लक्षणं कौण्डभट्टाभिमतं घटादिविषयबोधजनकघटादिपदानां सामर्थ्यरूपं
शक्तिस्वरूपन्चशक्तेर्भिन्न एव सम्बन्धःशक्तेः कार्यजनकत्वनियामकत्वेन
दृष्टः यथा दीपगतप्रकाशकत्व शक्तेःकार्यजनकत्वे दीपवस्तुनोःप्रकाशकत्व-
शक्त्यतिरिक्त संयोगादिसम्बन्धत्वस्य वस्तुप्रकाशकत्वं नान्यथा, घटपटादि
शक्तेरपि शाब्दबोधरूपकार्यजनने सम्बन्धत्वे स्वार्थबोधकत्वं नान्यथेत्यादि
दोषश्च निरस्य "वाच्यवाचकभावापरपर्यायाखण्डसम्बन्धरूपाशक्तिः
"इत्युक्तम् । एवं लक्षणे वाच्यवाचकत्वे न हि बोधजनकत्वबोधविषयत्वरूपे
पूर्वोक्तदोषापत्तेः, किन्त्वखण्डोपाधिरूपपदार्थान्तरम् । स च वाच्य-
वाचकभावः शब्दार्थोभयनिष्ठ एव । "तद् ग्राहकं चैतरेतराध्यासमूलं
तादात्म्यम् । तच्च सङ्केतः तथापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति
व्यवहारः तस्य सम्बन्धाभावात् । भेदाभेदरूपस्य तस्य तत्त्वासम्भवात् ।
तद्घटकभेदस्याभेदस्य वा तत्त्वादर्शनात् "[1] इति ।

अत्र तादात्मस्य शक्तिग्राहकत्वं सङ्गच्छते न तु
शक्तित्वम् । अध्यासश्चान्यस्मिन्नन्यधर्मावभासः "यथा शुक्तौ रजतत्वा-
वभासः । तन्मूलकं यथा इदं पदार्थरजतपदार्थयोस्तादात्म्यं तथा पदपदार्थ-

---

1. वैया० ल०मञ्जूषायां शक्ति०नि० रत्नप्रभासंवलिते पृ०सं० 23

योरपि "अयं घट:"इति तादात्म्याध्यासमूलकमेव न तु वास्तविकम् । "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप:"इति भाष्यकृता स्वीकृतत्वात् शाब्दबोधोपपत्तये कल्प्यमानस्य सङ्केतस्य विनिगमनाविरहेण तादात्म्यरूपत्वस्य स्वीकारात् । स च सङ्केतो द्विविध: भेदरूपो भेदरूपश्च । भेदरूप: नैयायिकाभिमत: अभेदरूपश्च वैयाकरणतान्त्रिकमात्राभिमत: ।

महामहोपाध्यायेन नागेशभट्टेन स्वपक्षसंसाधनाय भाष्यप्रामाण्यमप्यभिहितम् - "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप: स्मृत्यात्मक:,यो यं शब्द:सो र्थो यो र्थ: स शब्द:"इति ।इतरेतराध्यासो ध्यते नेनेति करणे घञ् । स्मृत्यात्मक इत्यनेन ज्ञातस्यैवसङ्केतस्य शक्तिबोधकत्वं दर्शितम् । किन्त्वपाणिन्यादिस्मार्तसङ्केतस्यैव वाचकतानियामकत्वं नत्वाधुनिकस्येत्यादपि दर्शितम् ।'इति । अत्रैव तस्य भाव:"इति पाणिनिसूत्रस्य भाष्यस्यापि सम्मति: नागेशेन पदर्शिता: । तत्र हि भाष्ये -

डित्थादिषु वर्त्यभावात् वृत्तिर्न प्राप्नोति डित्थत्वं डित्थता डम्भित्ता डम्भित्त्वमिति । तत्रापि कश्चित् प्राथमकल्पिक: डित्थो डम्भित्थश्चेति । तेन कृष्णां क्रियां गुणं वा य: कश्चित् करोति स उच्यते डित्थत्वं त एतत् डाम्भित्त्वं त एतत् एवं डित्था: कुर्वन्ति । एवं डाम्भित्था: कुर्वन्ति । य: तर्हि प्राथमकाल्पिको डित्थो डम्भित्थश्च तस्य वर्त्यभावात् वृत्तिर्न प्राप्नोति नैषदोष:,यथैव तस्य काथन्चित्क: प्रयोग एवं वृत्तिरपि भविष्यति । यद्वा सर्वे भावा:स्वेन भावेन भवन्ति स तेषां भाव: तदभिधाने । किमेतैर्निभिर्भावग्रहणै: क्रियते । एकेन शब्देन द्वाभ्यामर्थ: । यदा सर्वे शब्दा: स्वेना र्थेन भवन्ति"।[2] इत्युक्तम् ।

----- --------------

1• वै० सि०ल०म० रत्नप्रभासंवलिते श०नि० पृ०सं० 25

2• महाभाष्ये (पा०सू०5/1/119 (तस्यभाव:इतिसूत्रे त्वतलौ ।

शब्दकौस्तुभकारैः श्रीमद्भिर्भट्टोजिदीक्षितैः घटादिविषयकबोधजनकघटादिपदानां सामर्थ्यमेव शक्तिरेव सम्बन्ध इत्युच्यते । तदखण्डरूपस्याशक्तेर्व्याख्यानविरुद्धान्न्ययुक्तम् । "शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात् । दीपगत प्रकाशकत्वशक्तावपिसम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात् "[1] ।

एतेन शक्तेर्भिन्न एव सम्बन्धः शक्तेः कार्यजनकत्वनियामकत्वेन दृष्टः यथा दीपगतप्रकाशकत्वशक्तेः कार्यजनकत्वे दीपवस्तुनोः प्रकाशकत्वशक्त्यतिरिक्तसंयोगादिसम्बन्धसत्त्व एव वस्तुप्रकाशकत्वं नान्यथा तथा घटपदादिगतशक्तेरपि शाब्दबोधरूपकार्यजनने सम्बन्धसत्त्व एवार्थबोधकत्वं नान्यथा । अतः यत्रोपकारकस्वभावः सम्बन्धोऽस्ति तत्र शक्त्याख्यो धर्मोऽनुमीयते सम्बद्धानां शक्तिमत्त्वेऽपि कार्यजनकत्वाभावादित्युच्यते -

वाक्यपदीये -

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ।।[2] इत्युक्तम्

अतः शब्दार्थयोरितरेतराध्यासः सङ्गच्छते । "कः शब्दः कोऽर्थः इति प्रश्ने "घट" इत्ययं शब्दः "घट" इत्ययमर्थः । इत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धिः । "घट इत्याकारकं ज्ञानं" इति व्यवहाराच्छब्दज्ञानयोरपि "इति" शब्दस्य शब्दस्वरूपपरतात्पर्यग्राहकत्वात् । अत एव

1· वै० सि० ल०म० शक्तिनिरूपणे पृ०सं०3।

2· वाक्यपदीये ब्रह्मकाण्डे ।

"पदं शृणु" पदार्थं शृणु "अयं वदति" इत्यादिव्यवहारे"[1]।
एवञ्चाऽध्यासपक्षाश्रयणेन श्रुतिस्मृतिपरप्रामाण्यान्यपि नागेशेन -
"वृद्धिरादैच्"[2] ओमित्येकाक्षरं ब्रह्म" इति निरूपितम् ।

नागेशाभिमताऽध्यासमूलकतादात्म्यं किदृशमित्युत्सुकायाम् - "तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्" तादात्म्यम् । अभेदस्याऽध्यास्तत्वाच्च न तयोर्विरोधः"[2] इति । तथाऽध्यासमूलकस्य भेदविशिष्टाभेदस्यतादात्म्यरूपत्वादेव शब्दार्थयोस्तादात्म्येन अग्निशब्दोच्चारणे मुखदाहाद्यापत्तिर्नभवति । अयमऽध्यासःआदिव्यवहारकृदीश्वरकृत एव । अतः वाच्यवाचक भावापन्नयोःशब्दार्थयोस्तादात्म्यमस्त्येवेति विचिन्त्योक्तम् ।

वाक्यपदीये -

इन्द्रियाणां स्वविषये गवनादिर्योग्यता तथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा[4]।।इति

यथा चक्षुरादीन्द्रियाणां स्वविषयज्ञानजनने नादिकालिको व्यवहारः योग्यता वा तज्जनकतावच्छेदकधर्मवत्त्वरूपा भवति, तथा नादिशब्दानामर्थैन सह अनादिःसम्बन्ध एव तज्जनकतावच्छेदको धर्म उपपद्यते । अतः पयोक्तुः "घट" इति शब्दोच्चारणेन "घट"इत्ययं शब्दः" "घट" इत्ययमर्थः "घट इतीदं ज्ञानम्"इत्येवं रूपैःशब्दैर्ज्ञानम्। अतः शब्दार्थज्ञानानां स्वभाव सिद्धः कश्चनविलक्षणः सम्बन्धो स्त्येवेति वैयाकरणानां महाभाष्यवाक्यपदीय-मञ्जूषाग्रन्थकाराणाम्मते ।अध्यासमूलकस्य शब्दार्थज्ञानाभेदस्यानादिपरम्परानिर्वचनायैव श्रीमतानागेशेन-

---

1· वै० सि० ल० म० शक्तिनिरूपणे पृ० 33

2· पा०सू० 1/1/1

3· ब्रह्मबिन्दूपनिषद् 5 4· वै०सि०ल०म०शक्ति०नि०पृ०34तमे ।

बौद्धार्थस्य कल्पनमिति कृतम् । एतेन व्याख्यानमेव सिद्धतीदं यन्नागोजिभट्टा:प्राक्तनवैयाकरणानाम्युपस्थाप्य शब्दार्थयोस्तादात्म्यं स्वीकुर्वन्ति । तच्चानादि:। एतेन तेन अध्यासप्रकृत्यापि स्वीकृता । अत: शब्दार्थयोस्तादात्म्यमनादि त्वन्यादिकालत एव सिद्धं भवति ।

तान्त्रिकास्तु शब्दार्थयोस्तादात्म्यमभेदसम्बन्धेति पदेन व्यवहरन्ति । अत्र मते वाच्य वाचकभावस्थितिषु वाचक: शब्द:वाग्रूप: विमर्शाख्य:शक्तिपरक:,वाच्यो र्थश्च प्रकाशरूप: शिवपरक: तयो:परस्परमभेद: । अत एव शब्दार्थयो:परस्परभेदनेनान्वय: । विश्वसर्ग: शिवशक्तिसामरस्यादेव जायते । तच्च सामरस्य मभेदेन अभेदश्च शब्दार्थरूपयो:शिवशक्तयो: अपार्थक्येनस्थिति: । एतदेव रघुवंशमहाकाव्यस्यादौ मङ्गलश्लोकेन कविकुलगुरु: कालिदास: स्मरति -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ।।[2]

अत्रेदं परावागात्मनावतभट्टारकशिवस्वरूपा षट्त्रिंशत्तत्त्वप्रसरण हेतुभूता संविदेन मातृका पदेनोच्यते तन्त्रशास्त्रे नित्याषो शिकार्णवादिग्रन्थेषु । सा एव मातृका वर्णमेलनेन यन्त्र शब्दवाग्रूपं धत्ते। शब्दराशेर्मातृका मालिनी कालिकेत्यादिभि: । पदैस्तत्र तत्र शास्त्रेषूच्यमाना परभैरवीय परावागात्मिका मातृकैव ज्येष्ठारौद्रयम्बिकाख्यशक्तिप्रसरणसम्भेदवैचित्र्येण सर्ववर्णोदयकारणभूता वर्णसङ्घटशरीराणां सप्तकोटिमहामन्त्राणां जननी ।

1· वाक्यपदीये 3/3/29

2· रघुवंशमहाकाव्ये प्रथमसर्गे श्लोक-।

अत एव तन्त्रसद्भावे -

सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ।।[1]

अन्यच्च -

अखिलमनाहतमूर्तिनात्युत्तीर्णस्वरूपिणीतरति
कायाति नानानामप्रपञ्च रूपेण मातृकादेवी ।।[2] इति

अत्रेदं - शिवशक्त्यादिप्रतिनियतव्यपदेशासहिष्णुरनाख्यःपरपरामर्शान्यानुत्तरः प्रकाश एव परं तत्त्वम् । स एव स्वातन्त्र्याद् विश्वमवविभावयिषुःप्रथमं शिवशक्तिरूपतां स्वात्मन्यवभासयति,अकारादिहकारान्तानां मातृकामुल्लासयतीति यावत् । अत्रानुत्तरलिपिरकारःविमर्शलिपिश्च हकारः ।

एतदर्थम् -

"अकारःसर्ववर्णाग्र्यःप्रकाशःपरमः शिवः ।
हकारोऽन्त्यःकलारूपो विमर्शाख्यःप्रकीर्तितः।।[3] इति

वचनमुपोद्बलयति ।

अन्यच्च तन्त्रालोके -

अकुलस्यास्य देवस्य कुलप्रथनशालिनी ।
कौलिकी सा पराशक्तिरवियुक्तो यया प्रभुः।।[4] इति

इत्यनेन च स स्वार्थः प्रतिपादितः । पुनश्च सा शक्तिः वेत्युत्कण्ठायामुक्तम् ।

---

1. तन्त्रसद्भावे 1-4
2. सौभाग्यसुधोदये 1/6
3. सङ्केतपद्धतौ
4. तन्त्रालोके 3/67

"त्रिपुरा परमा शक्तिराद्या जातादित:प्रिये"।।[1] इति

एवं हि -

शिव: शक्त्या युक्तो यदि भवति शक्त:प्रभवितुं------

न चेदेवं न खलु कुशल:स्पन्दितुमपि ।।[2] इत्यादयश्च

अत: शिवशक्त्यपरपर्यायस्य वाच्यवाचकस्य शब्दार्थतादात्म्यस्योपपत्ति: ।वैयाकरणनागेशस्य तान्त्रिका भिनिवेशं साधयति ।

किन्च -

विना स्वरैस्तु नान्येषां जायते व्यक्तिरञ्जसा ।

शिवशक्तिमयान्प्राहुस्तस्मान्स्वर्णान्मनीषिण:।।[3] इति

इति रीत्या स्वरव्यञ्जनवर्णात्मिकस्या:शब्दराशे: शिवशक्त्यात्मकत्वमुपपद्यते । नागेशोपाध्यायानामखण्डरूपशब्दार्थयोस्तादात्म्यरूपाशक्ति: तान्त्रिकाणां शिवशक्तयो:वाच्यवाचकभावापन्नयो: शब्दार्थरूपयो:अभेदरूपाया: शक्ते: एव साधर्म्यमूलकमिति विद्याविद्योतितान्त:करणै: सुधिभिर्विमृश्यते इति ।

1· नित्याषोडशिकार्णवे चतुर्थपटले श्लोक सं० 4

2· सौन्दर्यलहर्याम् श्लोक सं० १

3· शारदातिलके 2/8

-0-

पञ्चमोऽध्यायः

कार्यविवक्षाः -

1. परादिस्वरूपप्रदर्शनपुरस्सरं तेषां शब्दसृष्टिवादः अर्थसृष्टिवादश्च ।
2. व्याकरणशास्त्रीयस्फोटस्य परादावेवान्तर्भावः ।
3. नादकारिकायाः व्याख्यानम् ।
4. भास्कररायकृतश्लोकयोर्व्याख्यानम्।।इति।।

पञ्चमोऽध्यायः

परादिस्वरूपप्रदर्शनपुरस्सरं संक्षिप्तः शब्दसृष्टिवादः अर्थसृष्टिवादश्च

सृज्धातोः क्तिनि कृते सृष्टिपदम्, तच्च प्रपञ्चकारणमिति गम्यते । प्रकर्षेण प्रकृष्टा वा क्रिया सा प्रक्रिया । तत्र यद्यपि दर्शनेष्वास्यास्तत्त्वमेव प्राधान्येन भवति । तत्र वाक्यपदीय ग्रन्थे सृष्टिप्रक्रियायाः परं दर्शनं समुपलभ्यते तत्रैव शाब्दिकानां सिद्धान्तरूपेण अनादिनिधनं व्यापकं चिद्रूपं वेदान्तवेद्यं ब्रह्म "वाग् वै ब्रह्म" इत्यादि श्रुतिबलेन शब्दरूपतया अभ्युपेत्य तस्य जगतो विवर्तोपादानत्वमेव विद्याशक्तिरविद्यारूपकालशक्तेश्च सहकारित्वं स्वीक्रियते ।

प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्रक्षालनेन सर्वजगत्कार्या माया चैतेन ईश्वरे लीयते । ततश्चास्य पुनः प्रादुर्भावकत्वात् नात्यन्तिको नाशः उत्तरसर्गानुपपत्तेः । नापि सर्वथाभानम् प्रतिभासमानशरीरस्य मिथ्यावस्तुनो नभसि तदभावस्यैवापत्तेः । किन्तु सुप्तेव तिष्ठति, कार्यप्रवृत्त्यभावात् । स्वप्रतिष्ठेश्वरप्रकाशस्यात्यन्तनिर्विकल्पकतया तद्बलाद् भासमानाप्यभासमानेति ।

एवं तत्त्वोपासिभिः सह कार्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डान्तर्वर्तिनिखिललोकान्तर्वर्तिस्थावरादीनां भौतिकानां भूतानाञ्च प्रकृतौ मायायां लयः । कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यमात्रगतो नैमित्तिकप्रलयः । ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितः कालः । प्रलयकालोऽपि दिवसकालपरिमितः । तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्वमोक्षः इत्यादिना प्रतिपादितम् । यथा – मञ्जूषायाम् – ततो परिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतो बुद्धिपूर्विका सृष्टिमायापुरुषौ प्रादुर्भवतः ।

ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो बिन्दु-रूपमव्यक्तं त्रिगुणं जायते । तस्य बिन्दोरविशेषो बीजम्, बिन्दबिन्मि-श्रो शोनादः । विशेषो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभय संस्कार अपि प्रोच्यते ।

तस्माद् बिन्दोःशब्दब्रह्म परमानन्दमयम्, वर्णादिविशेषरहितम्, ज्ञानप्रधानम्, कूटस्थरूपो व्यवस्थापरिच्छिन्नम्, चैतन्यमिश्रम्, नाममात्रमुत्पद्यते । एतच्चतुष्पादानमेव परा, पश्यन्ती, मध्यमा वैखरीति शब्दैर्व्यपदिश्यते ।

"बिन्दोस्तस्माद्भिद्यमानाद् रवो व्यक्तात्मको भवेत् ।
स एव श्रुतिसम्पन्नैःशब्दब्रह्मेति गीयते ।।[1]"

एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कारात्मकत्वेनाभिव्यज्यते । तात्पर्यं विवक्षोःपुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवन-संस्कारः तदभिव्यक्तं शब्दब्रह्म स्प्रतिष्ठिततया निष्पन्दनम् "परावाक्" इत्युच्यते । तदुक्तं भर्तृहरिणा -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।[2]इति

एवं इमस्याःपराख्यवाच एव पश्यन्त्यादि क्रमेण स्थूलावस्था उत्पद्यन्ते । तत्र मध्यमा शब्दास्त्वमात्राश्रव्याः, वैखरीशब्दास्तुपरश्रव्या, इत्यादि स्पष्टं शब्दसृष्टिः स्फुटमुक्तालघुमञ्जूषायाम्- अर्थसृष्टिस्तु पूर्ववदेवावबोध्या । यतश्चैतन्मतेऽपि पराख्यवाचःसर्वशब्दतदर्थमयोपादानत्वं स्वीकृतमेव ।

---

1. प्रपञ्चसारतन्त्रे । पटले श्लोक सं० 43
2. वाक्यपदीये ब्रह्मकाण्डे श्लोक-1

तन्त्रशास्त्रानुसारी चायं सृष्टिक्रमः यथा सूर्याभिमुख दर्पणे तदन्तः प्रविष्टकिरणात् उभयकिरणसङ्कलनरूपः तेजोविन्दुविशेषरूपः कुड्यादौ प्रादुर्भवति तथा प्राप्तादृष्टवशात् स्वान्तः संसृतविश्वसिसृक्षायाप्रकाशरूपं ब्रह्म स्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्तस्तेजोरूपेण प्रविश्य शुक्लीबिन्दुभावयते ततस्तं विन्दुं रक्तरूपाशक्तिःप्रविशति । स च विन्दुःसमष्टि रूपेणैको व्यष्टिरूपेण द्वौ तत्र शुक्लः इन्दुः रक्तोऽग्निरिति विन्दुद्वयात्मकत्वाद विसर्ग इति च व्यवह्रियते । एवञ्च कामाख्यो विन्दुः विसर्गः, ऽर्धकला चेतित्रयवद् एकःपदार्थो णादिप्रत्याहारवत्र कामकलेत्युच्यते । इदमेव च समस्तसृष्टिवीजम् । एतन्मूलभूतं ब्रह्मतुरीयं विन्दुरित्युच्यते । इयमेव प्रकाशविमर्शमयीपराशक्तिःपञ्चभूतात्मिका निरन्तरं वृद्धिद्वारा पञ्चदशसंख्याक मात्राक्षरतिभूयभिभानदेवता स्वरूपिणी संजाता ।

"अकारःसर्ववर्णाग्र्यःप्रकाशः परमःशिवः" इति रीत्या प्रकाशाख्य एकैव परमेश्वरः तस्य शक्तिविमर्शाख्या सा च पञ्चधा भवति । सैव अ, इ, उ, ऋ, लृ, इति पञ्चात्मना व्यवस्थिता, पुनरपि आ, ई, ऊ ॠ, ॡ इत्येवं सङ्कलनया दश । तत ए, ओ, ऐ, औ, अं इति पञ्चदश विसर्गः इति षोडशस्वराः कादयो पञ्चवर्गाः पञ्चविंशतिः । यरलवाश्चत्वारः शषसहाश्चत्वारः ळकारेण सह पञ्चाशन्मातृकाःसम्पन्नाः ।

तन्त्रालोक ग्रन्थानुसारि-

तत्र हि प्रकाशस्वरूपस्य विन्दोः प्रकाशे नैव सर्वं प्रकाशते । तत आविर्भूतायाः पश्यन्त्या स्तस्मिन् विन्दौ प्रतिविम्बितत्त्वम् । यथा मुखस्य दर्पणे प्रतिविम्बितत्त्वम् तथा स्य शब्दस्य नभसि प्रतिविम्बमस्ति ।

तथा चास्यां संविदि सर्वं विश्वं प्रतिबिम्बितो भवति । स्वातन्त्र्यं हि विमर्शः स चास्य प्रकाशस्यमुख्यो स्वभावः । नहि निर्विमर्शः प्रकाशः सम्भवति । स एव प्रतिभानुत्तरादिशब्दैरभिधीयते। तस्यैव भगवतः परमेश्वरस्य प्रकाशरूपता चिच्छक्तया स्वातन्त्र्याभिधया नन्दशक्त्या आनन्दचमत्कारात्मिकया इच्छाशक्त्या आमर्शात्मिकया ज्ञानशक्त्या सर्वाकारोपयोगिन्या क्रिया शक्त्याजुष्टस्याष्टैश्वर्यात्मकमूर्तेः परिपूर्णस्य शिवशक्तयादिभेदा संहिवणोर्विश्वमवविभावयिसोः प्रथमं शिवशक्तिरूपतात्मन्येव भासयते । तस्य परै व शक्तिः सृष्टिविकीर्षया इच्छाज्ञानक्रिया रूपं गृह्णाति । तथा चानुत्तराख्यः प्रकाशो विन्दुः स्वातन्त्र्याख्ये विमर्शाभिधे विसर्गे विपरिणमते तथा च विन्दो अपहृतम् अकारो नुस्वारश्च । एवं विसर्गस्यापि उभयीवृत्तिः विसर्जनीयो हकारश्चेति । एतौ चाकारहकारौ अविभक्तभावेन शिवशक्त्यात्मकौ सदावभासेते । तस्य सिसृक्षातः परमर्शस्योदये इच्छाशक्तिः इकारः। ईशित्री सैवेच्छा ईकारः । यदा ज्ञेयापेक्षया ज्ञानमूनं भवति तदा उकारस्योदयो भवति । तथा चैतदेव विमर्शात्मकं परामर्शषट्कं वीजपदेनोच्यते- तथा चोक्तम् -

> स्वराणां षट्कमेवेह मूलं स्याद् वर्णसन्ततौ ।
> षड् देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः ।।[1]

एवं हि -

> आत्मैव समावेशात् क्रियाशक्तितयोदितात् ।
> संविदो द्वादशप्रोक्ता यासुसर्वा समाप्यते ।।[2]

अस्मिन् इकारादिचतुष्टये क्षोभोदयाभावाद् वर्णान्तरोत्पत्त्यभावान्न वीजत्वम् । क्षोभाधारत्वाभावाद् योनित्वाभावस्यापि

---

1. तन्त्रालोके 3 आन्हिके 184-185 श्लोकांशौ ।

2. " " 250-251 "

निश्चयाद् बीजयोनिर्वैलक्ष्यमेषाम् । एवं इच्छोन्मेषशक्तिभ्याभिकारो काराभ्यामनुत्तरानन्दयो:संघट्टे एकार ओकाराश्चसम्पद्यते । एवमेव यदा अनुत्तरानन्दशक्ति वृद्धिपुरोवाप्लुतस्तदा एकारयोगे ऐकार: ओकारयोगे औकारश्च सम्पद्यते ।

उक्तश्च -

इच्छैवानुत्तरानन्दयाताशीघ्रत्वयोगत: ।
वायुरित्युच्यते वह्निर्भासनात् स्थैर्यतो धरा।।[1]

एवं हि अनुत्तरात् पन्चात्मन:कवर्गस्यप्लव:, एवमिच्छाशक्ति: चवर्गस्य द्विरूपाया: ऋ,ऌ इत्येवं रूपं प्राप्ताया: इच्छाया:एव ट तवर्गोत्पत्ति: । उन्मेषात् तवर्गोत्पत्ति:।ऋऌ उ ऊ इति सम्मिलित यवर्गोत्पत्ति: । तथा व क् ष् इति संयोगात् क्षकारोत्पत्ति: । एवं सति पन्चविंशति:स्पर्शा: चत्वारो न्तस्था:,चत्वार: उष्माण: षोडशस्वरा: संकलिता: क्षकारेण पन्चाशद् वर्णा: संजाता:। तत्रानुस्वारविसर्गौ स्वरेषु गणनीयाविति षोडशस्वरा:सम्पद्यते ।

तदुक्तम् -

अकाराज्जात आकार: इकाराद् ई इतिस्मृत: ।
ऊकारश्च उकाराद् स्याद् ऋकाराच्च नपुंसकम् ।।

एकरैश्वरश्चैव ओकार औकार एव च ।
अकारश्च अनुस्वार: अ: विसर्ग इति स्मृत:।।[2]

1· तन्त्रालोके 3 आन्हिके 157 श्लोके

2· " टीकाया " 209 पृष्ठे 222 श्लोके:।

तथा च -

अनुत्तरानन्दभुवामिच्छाशै भोग्यतां गते ।
सन्ध्यक्षराणामुदयो भोक्तृरूपं च कथ्यते ।।[1]

तन्त्रालोके टीकायामुक्तञ्च -

षडेव हि स्वरा:मुख्या:कथिता:मूलकारणम् ।
ते च प्रकाशरूपत्वात् विज्ञेया:सूर्यरश्मय: ।।

एवञ्च मूले -

इच्छाशक्तिश्च या ज्ञेया क्षुभिताक्षुभितत्वत: ।
सा विजातीयशक्त्यंशोप्रोन्मुखी याति यात्मताम् ।।

सैवशीपतरोपातज्ञेयकालुष्य रूपिता ।
विजातीयोन्मुख येन रत्वं ल त्वं च गच्छति ।।[2] इति

<u>वीरवश्यारहस्ये शब्दसृष्टिक्रम:</u>

परममहामहेश्वरा भास्करराायाचार्यस्तु स्वकीये वीरवश्या-रहस्याख्ये पुस्तके सर्वसृष्टिप्रवारिकां विमर्शाख्यां चिटरूपिणीं त्रिपुरसुन्द-रीमेव सर्वसृष्टिकारिकां मन्यन्ते । सा च त्रिपुरसुन्दरी वामा ज्येष्ठा रौद्री अम्बिका,इच्छा,ज्ञानक्रिया,शान्ता एता अष्टशक्तय:परासहिता नवसंख्याका सती मातृका पदेनोच्यते । तत: स्रष्टव्य पदार्थानालोच्यतदै-सत बहुस्यां प्रजायेय" इति श्रुति रीत्या तादृशमीक्षमाणमेव प्रवृत्तिनिमि-त्तीकृत्य तस्यां पश्यन्ती पदं प्रवर्तते । तदवयवाश्च वामादयो उपर्यु-ल्लिखिता अष्टशक्तय: । एवञ्च वामाशिखा ज्येष्ठारूपा सा त्रिपुरसुन्दरी

---

1. तन्त्रालोके 3 आन्हिके 190 श्लोक: ।
2. " 3 " 154-155 श्लोकौ ।

ज्ञानक्रियेच्छात्मिका ब्रह्मविष्णवीशरूपिणी । सैव सृष्टि-समष्टिभेदेन नवविधा भिद्यमाना सती ततो नवनादा जाता: ।ते च त्रीणीति प्रथम: त्रीणि त्रीणीति द्वितीय:घण्टानादस्तृतीय:शङ्खनादश्चतुर्थ: पञ्चमस्तन्त्रीनाद:षष्ठस्तालनाद:,सप्तमो वेणुनाद:,अष्टमो भेरीनाद: नवमो मृदङ्गनाद: तत्समष्टिश्चनादध्वन्यादिपदवाच्या नातिसूक्ष्मा परावत् नातिस्थूला वैखरीवत् अतो मध्यमाख्या मातृका । ततोनवभिर्नादै: अकचटतपयशलाख्यवर्गनवकवती वैखरी मातृका समुत्पन्ना । इदं वाणीचतुष्टयम् । यथा स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदात् तथैव तद्वाच्या-अर्था अपि तथा तथोन्नेया: इति ।।

प्रपञ्चसारे सृष्टिक्रम:

समस्तागमसारसङ्ग्रहेप्रपञ्चागमसारसङ्ग्रहे प्रपञ्चसारे पूर्वं तावत् प्राणिकर्माभिन्नमाया वच्छिन्नस्य ब्रह्मणो घनीभाव:ततो विचिकीर्षा, ततो व्यक्तम्,ततो व्यक्तोरव:,तत:पश्यन्ती,ततो मध्यमा, ततो वैखरी,इति क्रम: प्रदर्शित: ।

उक्तञ्च -

अकचटतपयाद्यै:सप्तभिर्वर्णवर्गै-

र्विरचितमुखबाहापादमध्याख्यहृत्का ।

सकलजगदधीशाशाश्वताविश्वयोनि-

र्वितरतु परिशुद्धिं चेतस:शारदाव:[2] ।।इति

1· तैत्तरीयोपनिषदि - 26

2· प्रपञ्चासारग्रन्थे मङ्गलम् ।

सर्वसाक्षिणी चिद्रूपिणी सर्वाधिष्ठानसमर्थाशारदैव । विश्वयोनि:सकलजगत:कलाभि:कारणं भवति,जगच्चकार्यमित्यवशिष्यते । तथा प्रपन्चसारग्रन्थस्यमङ्गलप्रसङ्गे -स्थूलसूक्ष्मकारणसामान्यसाक्षिलक्षण:। पन्चविधो स्य प्रपन्चसारग्रन्थस्य विषय: । तत्र वैखरीत्वर्थात्मकं विराड्रूपं स्थूलं विषयमाह ग्रन्थस्य पूर्वभावेन ।

एकदाक्षीरसागरे नन्तशेषशय्यायां विराजिते विष्णो: देवा: स्वस्तुतिभिस्तोषिता:।प्रसन्नोहरि:दु:खनिवेदनाय देवानामादिदेश । तदाज: भगवांश्चन्द्रमौलीश्वरश्च -

"स्वामिन् प्रसीदविश्वेश क वयं केन भाविता:।
किं मूला किं क्रियासर्वमस्त्यभ्यं वक्तुमर्हसि ।।[1] इति

प्रश्नस्योत्तरं ददता भगवता उक्तम् -

इति पृष्टं परं ज्योतिरुवाच प्रमिताक्षरम् ।
यूयमक्षरसम्भूता:सृष्टिस्थित्यन्तहेतव: ।।

तैरेव विकृतिं यातास्तेषु वो जायते लय: ।[2]इति

प्रमिताक्षरेषु श्रीविष्णु: चराचरात्मक जगत:कारणत्वेनाक्षराणि प्रोक्तवान् । प्रमिताक्षरश्वात् "क" इति जिज्ञासायां प्रकर्षेण मीयते -ज्ञायते मिनोति जानाति प्रभिनोति परिच्छिन्नत्तीति क्रमेण प्रकृतिपुराकाला:प्रमिता:प्रमितानां वाचकमक्षरं तदभिन्न प्रमिताक्षरं परा वाक् । सतत्त्वहकारमित्यर्थ: । तस्य बीजविन्दुनादरूपेण प्रकृत्यादिवाचकत्वं द्रष्टव्यम् । अहमेलन रूपेण वा । तत्र प्रकृति:उपादानीम् तरी

1• प्रपन्चसारे 5 प्र०पटले श्लोक सं० 17-18

2• प्रपन्चसारे प्र०पटले पूर्वार्द्धे श्लोक -28

निमित्तमिति शर्ङ्गणो भिप्राय: ।

अत्र हकारो हि अकारहकारात्मा । तयोश्चाद्यन्ताक्षरयो: प्रत्याहारग्रहणन्यायेन गृहीतेतरवर्णयो:नादाकाररूपेण बुद्धिप्राणरूपेण ज्ञानक्रियाशक्तिरूपेणप्रकाशविमर्शरूपेण चिदानन्दरूपेण वा सर्ववर्णानुगमात् सर्वशब्दार्थसमष्ट्यात्मक परावागात्मत्वेन सर्वात्मत्वात् प्रकृतिपुरुषकालात्मत्वं नित्यत्वन्चावगन्तव्यम् । वाचकमक्षरं साक्षान्नारायणोवेदमूर्ति: । तस्य वाच्यानिखिलान्यक्षराणि ।

एवं हि कालतत्त्वात्मिका प्रकृति:कालतत्त्ववेत्ता परमधाम्ना भगवतैव ज्ञायते ।

उक्तन्च -

सा तु कालात्मना सम्यक् मयैव ज्ञायते सदा ।।इति[1]

अयम्भाव:- कालस्या परस्य पन्चदशधाभिन्नस्यापि आत्मा कालात्मा प्रभु: । तेनोन्मनीरूपेण कालेन माया पन्चदशकालाभिमानिनी सम्यग्भेदेन ज्ञायत इत्यर्थ: । लव:त्रुटि: कलाकाष्ठा निमेष मात्रा नाडिका मुहूर्त्ताहोरात्र-मास-संवत्सर-युग- कल्पमहाकल्प-परार्ध- कालपर्वाणि-अकारोकारमकारविन्दु-कला-निरोधिका-नाद-नादान्त-शक्तिव्यापिनी व्योमरूपान्त-नादानाश्रिता समनीलक्षणप्रणवमात्रासु मूलाधारमारभ्यद्वादशान्तं व्यवस्थितासु सन्चिन्त्यक्रमेण संहृत्याकालकालिकायामुन्मन्यां व्यवतिष्ठतेत्यर्थ: ।

1• प्रपन्चसारे प्र०पटले पूर्वार्द्धे श्लोक -28

तथा चेयं प्रकृतिः तत्त्वात्मकतां अन्तर्मुखतां अपरित्यज्यैव क्वचिद्देशे बिन्दुनां क्वचिद् बहिर्मुखतया सृष्ट्युन्मुखतयां विभक्ततया तरङ्गमूलभूतसूक्ष्मवायुव्याप्तसमकलचिचिकीर्षा । एवं हि परस्मादुत्पन्नस्य प्रकृतितत्त्वस्योत्तरसृष्टि निर्वाहार्थमिच्छा सत्त्वादिरूपतां कालशब्देनोच्यते । इच्छादीनामेकैकस्य मायातच्छक्तितरगतप्राणिकर्मविषयभेदेन त्रिरूपतां स्थूल-सूक्ष्म-परत्वभवाप्यते ।

अत्र बिन्दुपदमीश्वरं परम् । नादस्तस्य त्रिन्यिश्रं रूपं पुरुषाख्यम् । एतन्मन्त्रावृत्तिसमये स्वानुभवेनानुगन्तव्यम् । अत्र स्वरूपस्थेन वक्ष्यति हि शब्दावगम्यमर्थमिति ।

उक्तक्रमेणार्थरूपस्य प्रकृति तत्त्वस्य सृष्टिमभिधाय एतामेवार्थसृष्टि शब्दसृष्टित्वेनाप्याह अत्र शब्दार्थभेदाभावादिति ।

तथा चोक्तम् -

विन्दोस्तस्माद्भिद्यमानाद्रवो व्यक्तात्मको भवेत् ।
स एव श्रुतिसम्पन्नैःशब्द ब्रह्मेति कथ्यते ।।
अव्यक्तादन्तरुदितत्रिभेदगहनात्मकम् ।
अहन्नाम भवेत्तत्त्वं महतो हङ्कृतिस्तथा ।।
भूतादिवैकारिक तैजसभेद क्रमादहङ्कारात् ।
कालप्रेरितया गुणबोधयुजा शब्दसृष्टिरथशक्या ।। इति

१· प्रपञ्चसारे प्रथमपटले श्लोकाः 44,45,46

तस्माद् बीजरूपयोक्त प्रकृत्या सम्बन्ध्यमानाद्-
भयोर्भेदलक्षणो देदीप्यमान:परापश्यन्त्यात्मकोरवो भवत् ।स र व
एव च कुण्डल्यादिशब्दैरभिलक्ष्यते । सो यं एव:कारणविन्दुतादा-
त्म्यापन्नत्वात्सर्वगतो पि व्यञ्जकयत्नसंस्कृतपवनवशात् प्राणिनां
मूलाधारे व्यज्यते । तदिदं कारणविन्द्वात्मकव्यक्तं शब्द ब्रह्म-
स्वप्रतिष्ठितया निष्पन्दं परावागित्युच्यते ।

अस्याखिलजगत:सर्वस्वभूत:निग्रहानुग्रह समर्थशिव:
प्राणिषु कृपयाकरुणविष्ट:सृष्टिलीलां विकीर्षु: ।स्वनिर्गुणस्वरूप-
मुत्सृज्यात्मानं सगुणं व्यवस्थापयति ।

उक्तं हि -

नित्यं सर्वगत: सूक्ष्म: सदानन्दो निरामय: ।
विकाररहित: साक्षी शिवो ज्ञेय:सनातन:।। इति

अविद्यासंबलितेन जडत्वे पि कथं तस्य सृष्टिकर्तृत्व
मित्याशङ्•कां वारयति -

सच्चिदानन्दविभवादिति पदेन -

अनेनाविद्योपहितत्त्वे पि तस्य न स्वरूपहानि-
रित्यर्थ: । सकलाच्छक्तिसहितात् शक्तिरासीदिति योजना । ननु
शक्तिसहितादेव पुन: कथं शक्तिराक्षीदिति चेत्सत्यम् । या अनादि-
रूपा चैतन्याभासेन महाप्रलये सूक्ष्मा स्थिता तस्या: गुणवैषम्या-
नुगुणतया सात्त्विकराजसतामससृष्टव्यप्रपञ्चकार्यसाधने या उच्छूनावस्था

।• प्रयोगसारे ।

सैवोपचारादुत्पत्तिः । इयं च सदुत्पत्तिवादिसांख्यमतमाश्रित्य शारदातिलककारस्योक्तिः तदुक्तं प्रयोगसारे -

तस्माद् विनिर्गता नित्या सर्वगा विश्वसम्भवा"।।इति

तस्या नादविन्दुसृष्ट्युपयोगावस्थारूपौ उक्तञ्च प्रयोगसारे -

नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी ।
शिवोन्मुखी यदा शक्तिःपुंरूपा सा तदा स्मृता।।इति

अन्यत्रापि -

अभिव्यक्ता पराशक्ति रविनाभावलक्षणा ।
अखण्ड परचिच्छक्तिव्याप्ता चिद्रूपिणीविभुः।।

समस्ततत्त्वभावेन विवर्तेच्छा समन्विता ।
प्रयातिविन्दुभावं च क्रिया प्राधान्यलक्षणम् ।।इत्युक्तम्

विन्दवादेर्भेदत्रयस्य परम्परा स्वरूपमुच्यते -

विन्दुःशिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायःसमाख्यातःसर्वागमविशारदैः ।।
रौद्री विन्दोस्ततोनादाज्ज्येष्ठा वीजादजायत ।
वामा ताभ्यःसमुत्पन्ना रुद्रब्रह्मरमाधिपाः।।
संज्ञानेच्छाक्रियात्मानो वह्नीन्द्वर्कस्वरूपिणः।।[1] इति

संज्ञानेति शब्देन-संज्ञाने इच्छाक्रिये तदात्मानस्तेन ब्रह्मरुद्ररमाधिपाः क्रमेणेच्छा शक्तिक्रियाशक्ति ज्ञानशक्तिस्वरूपाः। एते च वह्नीन्द-

---

1. शारदातिलके प्रथमपटले श्लोकौ ९-१०

वर्धकृस्वरूपिणां स्वब्रह्मरमाधिपा: शब्दसृष्ट्यन्तर्गता :निरोधका-र्धेन्दुविन्दुरूपा: शक्तेरेवावस्थाविशेषा ज्ञेया:। यथामिच्छाक्रिया-ज्ञानात्मत्वं तु शक्ति: उत्पन्नत्वात् ।

परादृविन्दोरित्यनेन शक्त्यवस्थारूपो थ: पृथमो विन्दुस्तस्मादव्यक्तात्मा वर्णादिविशेषरहितो रूपो नादमात्रं स्वं उत्पन्न: स एव शब्दब्रह्मेत्युच्यते ।

भिद्यमानात्पराद्विन्दोरव्यक्तात्मा वो भवत् ।
शब्दब्रह्मेति तं प्राहु: सर्वागमविशारदा: ।।
शब्दब्रह्मेति शब्दार्थं शब्दमित्यपरे विदु: ।।[1] इति

तान्त्रिकमतं शब्दविषये व्यवस्थापयन्निदमुक्तम् । अस्याशयस्तु वैयाकरणाभ्यते न्याब्दशब्दार्थयोशब्दब्रह्मतत्त्वसिद्धि: न सम्पद्यते । उभयोस्तयोर्जडत्वात् । यदि शब्दार्थ:शब्दो वा शब्दब्रह्मेत्युच्यते तदाब्रह्मपदवाच्यं नोपपद्यते ,यतो हि सच्चिदा-नन्दरूपो ब्रह्मशब्दार्थ: । तौ च शब्दार्थौ जडाविति सम्प्रधार्य हरिकारिकादावुक्तम् -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्तते र्थभावेन प्रक्रिया जगतो यत: ।।[2] इति

शब्दब्रह्मेति शब्दस्यार्थं शब्दमेवेत्याहुरिति योजना कृत्वा सर्वागमविशारदा: इत्येकापक्ष: । अपरे विन्दुरिति । द्वितीयस्तयोर्दक्षणमित्याहु: । तन्नजडत्वादिति हेतु:प्रथमपक्षे न

---

1. शारदातिलके प्र०प० श्लोक सं० 11-12

2. वाक्यपदीये ब्रह्मकाण्डे का० सं० 1

सम्भवति । तेन सर्वागमविशारदा इत्ययमेव च पक्षो ग्रन्थकृद्भिमत इति ।

एवं हि रव एव शब्दब्रह्मस्वरूपं संगम्य ततः वर्णात्मना सम्भवतीत्युच्यते -

"तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।[1]
वर्णात्मना विर्भवति गद्यपद्यादिभेदतः ।। इति

अन्यच्च -

पायुमध्यन्तात् द्व्यङ्गुलादूर्ध्वलिङ्गाच्चाद्व्यङ्गुलादधः
मध्येकाङ्गुलं यच्च देहमध्यं प्रचक्षते ।।

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् ।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ।।

इत्यादयः ।

एतेन देहस्य मध्यभागे कुण्डलिनी आद्यापराशक्ति स्तिष्ठति, तच्चैतन्यं गद्यपद्यादिभेदतः वर्णात्मना विर्भवति । अतएव कुण्डलिनीशक्ति एवैतस्य जगतः मूलमित्यवसीयते । एतावता शब्दसृष्टिमुक्ता, अधुनार्थसृष्टिं विवेचयन्नुच्यते -

अथविन्दवात्मनःशम्भो कालबन्धोकलात्मनः।
अजायत जगत्साक्षी सर्वव्यापीसदाशिवः ।।

सदाशिवाद् भवेदीशस्ततो रुद्रसमुद्भवः।
ततो विष्णुस्ततो ब्रह्मा तेषामेव समुद्भवः।।इति

---

1. शारदातिलके प्र० प० श्लोक-14

अथवा कलानिवृत्त्याद्या, तदधिष्ठातृसदाशिवादीनां प्रतिलोम्येनोत्पादकास्तदात्मनं कालबन्धोरित्यनाद्यनन्ते कालेसृष्टिरूपकालसहायान्नादात्मन: इत्यर्थ: । शम्भो: परमशिवात् सृष्टिस्थितिध्वंसनिग्रहानुग्रहकार्यपञ्चककर्ता अत एव जगन्निर्माणबीजरूपो जगत् साक्षीसदाशिवोजात: । अत एव कलात्मन:इतिहेतुहेतुमदभावेन् योजना । अथ च कालबन्धोरिति बन्धुशब्देन कालस्य निमित्तत्वं सूचितम् ।

उक्तञ्च -

> "लवादिप्रलयान्तो यं तत:शक्तिविजृम्भित: ।
> निमित्तभूत: कालो यं भावानां जन्मनाशयो:।।इति

अन्यच्च -

> भ्रान्तं योन्यन्त:स्फुरदरुणबन्धूककुसुमप्रभं,
> कामध्यायेज्जरठशशभृत्कोटिशिशिरम् ।।इत्यादिना

शरीरे मूलाधारे तेजस्वरूपस्य तस्यैवोक्तत्वात् ।शक्तिरूपत्वाच्च बिन्द्वात्मन: इति ।

उक्तञ्च -

> विश्वं भूतेन्द्रियान्त:करणमयमिनेन्दुपञ्चिरूपं समस्तं
> वर्णात्मैतत्प्रधाने कलनयनमये बीजरूपक्रमेण ।
> नीत्वा तं पुंसिबिन्द्वात्मनितमपि स्वात्मन्यथोकालतत्त्वे ।
> त्वं वैशक्तौ निदात्मन्यपि नयतु च मांकेवलेधाम्नि-शान्ते ।।

परे तु शम्भो: हकारात् कलार्धेन्दुरात्मा ईकार: ।कालोग्नि: प्रलये सर्वविनाशकत्वात् । अस्याजगन्मूलबीजभूतत्त्वं प्रसिद्धमेव । इदं च व्याख्यानं प्रपञ्चसारकर्तुरपीष्टम् ।

तदुक्तम् -

स्वामिन् प्रसीद विश्वेश के वयं केन भाविता: ।
किं क्रिया सर्वमस्यभ्यं वक्तुमर्हसिवाग्पतम् ।।इति
पृष्टे ज्योतिरुवाच प्रमिताक्षरम् "इति ।प्रकर्षेण मीयते
ज्ञायते इति प्रमिता प्रकृति: ।प्रमिणोति जानातीति
प्रमित:पुरुष: । प्रमिणोति परिच्छिन्नन्तीति प्रमित:
काल: । तेषां प्रमितानां वाचकमक्षरं प्रमिताक्षरं परा
वाक् । तत् तत्त्वं हकारेत्यर्थ: । तस्य बीजविन्दुनाद
रूपेण प्रकृत्यादि वाचकत्वं द्रष्टव्यम् । एतेन हेत्युत्तरमू-
मुवाचेत्यर्थ: । सङ्ग्रहेणोक्तस्याप्रतिपत्तिमात्रस्य तदेव
विवृणोति ।

पृथमक्षरसम्भूता :सृष्टिस्थित्यन्तहेतव: ।।इति [1]

क्षरत्यश्नुते वेति व्युत्पत्त्या ----------

"अक्षरात् सम्भवतीहविश्वम्" [2] इत्यादिना । तेषामिति पदेन शब्दसृष्टौ तेषां समुद्भव: उक्त एव । तेषामेव समुद्भव:अर्थ-सृष्टौ इत्यर्थ: ।

----

1. प्रपञ्चसारतन्त्र

2. स्मृतिवचनम् ।

व्याकरणशास्त्रीयस्फोटस्य परादावेवान्तर्भाव:

ध्वन्यात्मकं वर्णात्मकञ्चेति तर्कशास्त्रे द्विविधं रूपं शब्दस्य दरीदृश्यते । तत्र धर्मिणी नास्ति केषाञ्चिदपि विप्रतिपत्ति: । दृश्यते च लोके मृदङ्गादिभवे ध्वनौ अकारादिषु च वर्णेषु सर्वजनीन:, शब्दपद-व्यपदेश:, इत्यसांशयिकतया न तयोर्विमर्शयोग्यत्वम्, सन्दिग्धस्य सप्रयोजनस्यैव च प्रेक्षावतां जिज्ञास्यत्वात् । तयो:शब्दपदप्रवृत्तिस्तावत्तार्किकादीनां मते शब्दत्वजातिपुरस्कारेण, शब्दत्व वर्णत्वादिजातिमभ्युपगच्छतां प्राभा-कराणां मते श्रोत्रग्राह्यत्वोपाधिनावेत्यन्यदेतत् । तदुक्तं भर्तृहरिणा-

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शन भेदो हि प्रवादेष्वनवस्थित: ।।[1] इति

अत्र नैयायिकै: शब्दस्य गुणत्वमेव स्वीक्रियते । आकाशगुण: शब्द: उत्पत्तिनिरोधकधर्म इति । रूपरसगन्धादिसहवृत्तिर्द्रव्येषु सन्नि-विष्टो भिव्यक्तिधर्मक इति सांख्या: । आकाशगुण:शब्दो विभुर्नित्यो-भिव्यक्ति धर्मक इति प्राभाकरा: । स तु विभुर्द्रव्यरूपो नित्य इति भाट्टा: । पञ्चमहाभूतसंक्षोभज: शब्दो नाश्रित उत्पत्तिधर्मकाक्षणिकश्चेति बौद्धा: । अणुपरिणामो हि शब्द इत्यार्हता: पौद्गलिका:। वायुपरिणामो हि शब्द इति शिक्षाशास्त्रिण: आत्मा बुद्ध्या समेत्यर्थान्"[2] इत्यादिनोक्तो ज्ञानपरिणामे हि शब्द इति वैयाकरणा:। तथा हि "आख्यातोपयोगे इति सूत्रखण्डनावसरे भाष्ये भगवता पतञ्जलिना उक्तम् "अयमपि योग: शक्यो वक्तुम् । कथमुपाध्यायादधीत इति । अपक्रामति तस्मात्तदध्ययनम्। यद्यपक्रामति किं नात्यन्तायापक्रामति ? सन्ततत्वात् । अथवा ज्योति-

---

1. वाक्यपदीये ब्रह्मकाण्डे का० 108

2. पाणिनीय शिक्षायाम् ।

र्वज्ञानानि भवन्ति ।"[1] इति अयंभाव: - उपाध्यायादपक्रामच्छब्दजातमधीयान् उपादत्ते इत्यर्थके उपाध्यायादधीत इत्यत्रापक्रमजन्यविशेषाश्रयत्वादुत्तर्गेणापादानत्वं संसाध्य शब्दानामपक्रमणं न युक्तम् ।

तत्तच्चोक्तं सन्ततत्वादिति । शब्दस्य व्यञ्जका ध्वनय उपाध्यायेनोत्पाद्यमाना अपि सादृश्यात् तत्त्वेनाध्यवसीयमाना:श्रोतु: पुन: पुन: श्रोत्रदेशं गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्ति । अथवा ज्वालारूपं यथा ज्योतिरविच्छेदेनोत्पद्यमानं सादृश्यात् तत्त्वेनाध्यवसीयमानं सन्ततम्, तथैवोपाध्यायमानानि भिन्नशब्दरूपतामापद्यमानानि सन्ततान्युच्यन्त इति । सन्ततान्युक्त्वा भाष्यकृता शब्दस्य ज्ञानपरिणामत्वं सूचितम् ।

महाभाष्ये पश्पशान्हिके पि अथ गौरित्यत्र क: शब्द:"[2] इत्युत्तरप्रसङ्गे येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपस्य सम्प्रत्ययो भवति स शब्द"[3] इत्युक्तम् । तत्र येनोच्चारितेनेत्यस्य येन प्रकाशितेनाभिव्यक्तेनेत्यादि कैयटादिभिरर्थो कारि । एवञ्च नादाभिव्यङ्गयत्वं स्फोटस्य शब्दब्रह्मरूपस्येति व्याख्यानं भवति । ततश्च परमताभिप्रायेणाथवा प्रतीतपदार्थको लोके ध्वनिरिति शब्द इत्युक्तम् ।तत्र नैयायिकमतेन नादरूपस्य ध्वनेरेव शब्दत्वं स्वीकृतम् । तत्र नादाभिव्यङ्गयत्वं ध्वन्यभिव्यङ्गयत्वं वा शब्दस्येति नागेशादिभिस्स्वीकृतम् । तदुक्तं भर्तृहरिणा -

"ग्रानुपादानशब्देषु शब्दौ शब्दविदो विदु: ।
एको निमित्तं शब्दानामपरो र्थे प्रयुज्यते ।।"[4] इति

----

1. अष्टाध्यायाम् 1/3/39 भाष्ये ।

2. महाभाष्ये पश्पशान्हिके नवा०पृ०सं०

3. " " "

4. वाक्यपदीये ब्रह्मकाण्डे का०सं० 44

स्फोटस्याखण्डत्वम्

वैयाकरणा : स्फोटस्याखण्डत्वं नित्यत्वं कूटस्थत्वमनादिनिधन-पदव्यपदेश्यत्वञ्च स्वीकुर्वन्ति । तदुक्तं महाभाष्ये- "नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिरिति"[1] इति ।

तदुक्तं वाक्यपदीये

"नित्या :शब्दार्थसम्बन्धा : समाम्नाता महर्षिभि: ।
सूत्राणां चानुतन्त्राणां भाष्याणाञ्च प्रणेतृभि: ।।[2] "इति ।।

"सिद्धे शब्दार्थसम्बन्धे"इत्युक्त्या वार्तिककारो पि ब्रवीति । तदशिष्यं संज्ञाप्रमाणत्वात्" पृषोदरादीनि यथोपदिष्टम्"इत्यादिदिशा पाणिनिरपि ब्रवीति ।

ध्वनिस्फोट तादात्म्यविचार :

"आद्यन्तौ टकितौ"[3] तपरस्तत्कालस्य"[4] इत्यादिसूत्रभाष्यदिशा ध्वनिस्फोटयोस्तादात्म्य सम्बन्धो भ्युपेयो भवति । तत्र स्फोटध्वनी इति शब्दद्वयस्योपादानं शब्दत्वेन स्वीकृतम् । स्फोट : शब्द :, ध्वनि शब्दगुण :, भेर्याघातवद् । तदुक्तम् -

"ध्वनि : स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महा श्च केषाञ्चिदुभयं तत् स्वभावत: ।। इति

1· महाभाष्ये - 2· वाक्यपदीये ब्रह्मकाण्डे का0सं0

3· अष्टाध्याय्याम्

4· "

तद्यथा भेरीमाहत्यकश्चिद् विंशतिपदानि गच्छति, कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत् । स्फोटस्तु तावानेव, ध्वनिकृता वृद्धि: । तत्र स्फोट: श्रोत्रेन्द्रियग्राह्य स्फोटनामापदार्थ: । शब्दध्वनि:तदभिव्यक्तेरुत्तरं जायमानो वैकृतध्वनिरूप: शब्दस्य चिराचिरोपलब्धिकरत्वद् गुण: उपकारक: । अत्र खलु ध्वनिरूपेण स्फोट एव गृह्यते । तदुक्तं भर्तृहरिणा पि -

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिन: ।
स्वभावतस्तु नित्यत्वाद्ध्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वने:काल: शब्दस्येत्युपचर्यते ।।[1] इति

अन्यत्रापि प्राकृतध्वनि: स्फोटाभिव्यञ्जकत्वेन गृह्यते । तदुक्तम् -

"स्फोटस्य ग्रहणे हेतु: प्राकृतोध्वनिरिष्यते ।
स्थितिभेदे निमित्तत्वं वैकृत: प्रतिपद्यते ।।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता: ।
ध्वनय:समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ।।[2] इति

अयम्भाव: - स्फोटस्तावच्छब्दतत्त्वमस्ति, ध्वनि:शब्दगुण: स्फोट यद्याकांशस्तर्हि ध्वनि:शब्दरूपेण गुण: । स्फोटा शब्द:, ध्वनिरर्थ: । स्फोट:प्रकृति:ध्वनि:प्रत्यय: । स्फोटो ब्रह्म, ध्वनिर्ज्ञानम् । स्फोट: परोक्ष:ध्वनि: प्रत्यक्ष: । स्फोट:परमाणुरूप:ध्वनिरणु: । स्फोटो क्षर ध्वनि:क्षर एव । स्फोटो नित्य:ध्वनिरनित्य: ।

---

1. वाक्यपदीये - 75

2. वाक्यपदीये ब्रह्मकाण्डे का० 77, 78

एवञ्च "स्फोटध्वनि-इत्यनयोरभिव्यङ्ग्याभिव्यञ्जकसम्बन्धेन ज्ञानं भवति। तत्र व्यञ्जकध्वनिस्थितस्य ह्रासस्य वृद्धेर्वा स्फोटे भानं भवति। तेन व्यङ्ग्ये किमप्यन्तरं भवति। यथा स्वच्छस्फटिकस्याभिमुखे जपाकुसुमादीनां स्थित्या लौहित्यादिप्रतीतिर्भवति, यथा च चन्द्रस्य स्थिरत्वे पि जलतरङ्गचाञ्चल्यस्य तत्र प्रतीतिर्जायते, तद्वद् ध्वनिगतद्रुतमध्यमाविलम्बितादिवृत्तीनामपि भानं तत्र भवति। एवं स्फोटो ध्वनिश्चेति द्वयमपि प्रमाणसिद्धं वर्तते। ध्वनेःशब्दगुणत्व कथनस्याभिप्रायस्तु स्फोटाभिव्यञ्जकत्वेन ग्राह्यः।

स्फोटशब्दव्युत्पत्ति विचारः

"स्फुटत्यर्थोऽस्मादिति स्फोटः इति। तत्रेदमिति पदस्य शब्दत्वेन पर्यवसानं बोध्यम्। वैयाकरणभूषणसारे कौण्डभट्टेनापि स्फोटस्य यौगिकत्वेन स्वीक्रियते। स्फुटत्यर्थो यस्मादिति येनार्थज्ञानं भवति स स्फोटपदवाच्यः। स्फोटचन्द्रिकायामपि श्रीकृष्णेन च स्फोटशब्दस्य यौगिकत्वमस्वीकुर्वता योगरूढत्वं पङ्कजशब्दत्वात् शब्दवद् व्यवस्थापितम्। तत्र स्मूक्तम् -"यद्यस्य यौगिकत्वमेव स्वीकुर्यात्तर्हि येन केन प्रकारेणार्थ ज्ञानोत्पादकानां वाच्यलक्ष्यव्यङ्ग्यार्थादीनां चेष्टादीनाञ्च स्फोटपदव्यपदेश्यत्वं भवति। अत्र जातिस्फोटवादिनां वैयाकरणानां मतेन वाच्यलक्ष्यव्यङ्ग्यार्थप्रतिपादकवाचकलाक्षणिकव्यञ्जकशब्दानामज च तत्र स्थितानां जातीनाञ्च स्फोटत्वं स्वीक्रियत एव।

अतएव स्फोटस्य शब्दब्रह्मणो नादिनिधनपदव्यपदेश्यत्वसिद्धिर्भवति। स्फोटस्याष्टौ भेदा वैयाकरणनिकाये प्रसिद्धा सन्ति।

ते च वर्णस्फोट:, पदस्फोट:, वाक्यस्फोट:, वर्णजातिस्फोट:, पदजातिस्फोट:, वाक्यपाजातिअखण्डवाक्यस्फोट:, अखण्डपदस्फोटश्चेति । तत्राखण्डवाक्यस्फोट एव मुख्य: । अन्यत्तवं प्रक्रियाज्ञानार्थमेव ज्ञेयम् । उक्तन्च कौण्डभट्टेन -

"वाक्यस्फोटेति निष्कर्षे तिष्ठतीति मतस्थिति:।।[1]

भर्तृहरिणा प्युक्तम् -

"उपाया: शिक्षमाणानां बालानामुपलालना: ।
असत्ये वर्त्मनि स्थित्वा तत:सत्यं समीहते ।।[2] इति

महावैयाकरणेन नागेशेना पि मञ्जूषायाम् "तत्र वाक्यस्फोटो मुख्य:, लोके तस्यैवार्थबोधकत्वात्तेनैवार्थसमाप्तेश्च । तदुक्तं न्यायभाष्यकृता - "पदसमूहो वाक्यमर्थसमाप्तौ ".इति । तत्र परमार्थतो खण्डब्रह्मस्वरूपवत् स्फोटो पि सर्वथा नित्य:सच्चिदानन्दस्वरूप एव । स एवस्फोटो विवक्षो: पुंस: - केनचिदभियुक्तेन -

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।

इत्युक्तदिशा परापश्यन्तीमध्यमावैखरीरूपेण क्रमश: सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलशब्देन तत्तत्स्थानेष्वभिव्यक्तद्वारा वैखरीरूपेणान्ते सर्वजनश्रवणगोचरो भवति । तदुक्तं ऋक्संहितायामपि -

---

1. वैयाकरण भूषणसारे का० सा० 34

2. वाक्यपदीये

3. वैया० सि० ल० मञ्जूषायाम् - पृ०

चत्वारिवाक् परिमिता पदानि तानि विदुर्ब्राह्मणायेमनीषिण: ।
गुहा त्रीणिनिहितानेङ्गयन्ति तुरीयं वाचो मनुष्यावदन्ति ।।[1]

आचार्य भर्तृहरिणा पि -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्तते र्थभावेन प्रक्रिया जगतो यत ।।[2] इति

एवन्च शब्दब्रह्मण एवेदं जगत् पन्चजातं विवर्तरूपेण वर्तते । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम् ।।" स भूरिति व्याहरत् ततो भुवमुत्सृजत् "इत्यादिश्रुत्या च तदेव स्पष्टीभवति । किन्च -

"सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।[3] इति ।।

स्मृतिरपि प्रमाणं भवति । एवं "ओंकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति श्रुतेश्च बह्वी नानेति पदस्य घटपदादिरूपेणेत्यर्थकरणात् सर्वस्यापि कारणं वेद एवेति ज्ञायते । अस्य खलु शब्दाद्वैतवादस्य परमप्राचीनासु संहितास्वपि बीजं समुपलभ्यते - "वागेव विश्वाभुवनानि जज्ञे" "वाच इत् सर्वममृतं मर्त्यन्च" वागेवार्थं पश्यति, वाग् ब्रवीति वागेवार्थं सन्निहितं सन्तनोति । वाचैव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते"।[4] इति ।

1· ऋक्संहितायाम् 1/164/10

2· वाक्यपदीये ब्रह्मकाण्डे का0सं0 1

3· मनुस्मृतौ अ0 12 श्लोक: 21

4· वाक्यपदीये ।

आचार्यभर्तृहरिणा पि -

"शब्दस्य परिणामो यमित्याम्नायविदो विदु:" इति कथनेन परिणामशब्दस्य फलवाचित्वेन न तूपादानसमसत्ताक् कार्यापत्ति-रूपपरिभाषिकत्वेन ग्रहणेन जिज्ञास्यत्वात् । तयो:शब्दपदप्रवृत्ति-स्तावत्तार्किकादीनां मते शब्दत्वजातिपुरस्कारेण पदत्ववर्णत्वादि जातिमभ्युपगच्छतां च विश्वं वेदस्य विवर्तत्वेनाभिप्रेतम् । अत एव वैयाकरणानांविवर्तवाद:राद्धान्तितो भवति । स च विवर्तो वाक्य-पदीयब्रह्मकाण्डोक्तीदशा- "एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणा-सत्याविभक्तान्यरूपोपग्राहिता विवर्त:स्वप्नविषयप्रतिभासवत्" इति लक्षणकोवोध: । अत्र नागेश: शैवागममतमनुसृत्य प्रपन्चसारोक्त-दिशा विन्दुतत्त्वादेव तत्र चिदंशो वीजमित्यादिना चिदचिन्मिश्रो-शो नाद इति कथनानन्तरम् -

विन्दोस्तस्माद् भिद्यमानाद्रवोव्यक्तात्मको भवत् ।
स एव श्रुतिसम्पन्नै:शब्दब्रह्मेति गीयते ।।[1] इति ।

कथयित्वा मध्यमानादांश एव स्फोट इति प्रत्यपादयत् ।तत्र स्फोटस्य धारावाहिकन्यायेन प्रवाहनित्यतान्वस्वीकृत्य व्यावहारिकनित्यत्वं प्रतिपादितवान् । यथोक्तम् -

क्रियाशक्तिप्रधानाया:शब्दशब्दार्थकारणम् ।
प्रकृतेर्विन्दुरूपिण्या:शब्दब्रह्माभवत्परा ।।[2] इति

नित्यत्वं तु यावत्सृष्टिस्थित्या व्यवहारनित्यतया च वोध्यम् ।

---

1. प्रपन्चसारे 1/43

2.

सर्वथेयं नागेशस्योक्तिस्तावद् भ्रान्तमूलिका वर्तते । अनादिनिधनपदव्यपदेश्य नित्यस्य स्फोटस्य च नित्यत्वं सर्वथा नष्टं भवति, अत एव नेदं प्रामाणिकमिति कृत्वा भाष्यादिमतेन सर्वथा नित्यत्वमनादित्वञ्च शब्दब्रह्मण: स्फोटस्येति बोध्यम् ।

नादध्वनिस्फोटेषु भेद:

श्रीरामकण्ठेन नादकारिकायाम् -

बुद्ध्यस्मितामनोभ्यो विद्यातो रागत:कलायाश्च ।
माया पुंशक्तिभ्यो नादो न्यो दृश्यते ध्वनिभि:।।इति

अयम्भाव: - अस्मिता अहङ्कार: । ततश्च बुद्ध्यादीनां मायान्तानां स्वकार्यैरेव सिद्धे: कार्यान्तरहेतुत्वे च प्रमाणाभावात् पुरुषस्य तच्छक्तेश्चाविकारित्वेन वाचकभावायायोगाद् ध्वनीनाञ्च स्थूलानामुत्पत्त्यपवर्गयोगित्वेन कारणान्तरोपसित्वात् तदुद्भूतवर्णानां क्रमभावित्वेनाभिधायकत्वान्यथानुपपत्त्या तत्कारणत्वेन नादस्तेभ्यो-भिन्न एक:कश्चनपदार्थ इति निश्चीयते । अत्र ध्वन्यभिव्यञ्जकविधिना वाचकत्वेन कस्य ग्रहणम् ? पदस्य वाक्यस्यान्यस्य वेतिसन्देहेपदवाक्यैकदेशभूतानां वर्णानां क्षणध्वंसित्वेन परस्परोपकारकत्वाभावात् तद्व्यतिरिक्तयोश्च पदवाक्ययोर्भेददर्शनान्नतयोरपि वाचकत्वमिति प्रत्यक्षनिराकृतत्वात् ।

अथ गौरित्यत्र गकारौकारविसर्जनीयरूपेण पदं वाच्यम्, तदा तदभिन्नत्वेन वाचकत्वाभावाद् यदि सर्वथा अन्त्यवर्णस्य विसर्गस्यैव वाचकत्वमभ्युपगच्छेत्तदा "अश्व:पुरुष:" इत्यादावपि विसर्जनीयस्य सत्त्वेन ततो पि सास्नादिरूपार्थप्रतिपत्ति: स्यात् ।

अत्र शैवा: -यत्तावदब्रुवन् वैयाकरणा:वर्णव्यतिरिक्त:स्फोट इति, तदयुक्तम् न वर्णव्यतिरेकेण तस्य स्फोटस्य तद्ग्राहकयोमध्ये स्थितिरुपपद्यते । यत: स हि स्फोटो वर्णेभ्यो भिन्नो भिन्नो वा स्यात् ? तत्र न तावद्भिन्न: वर्णव्यतिरेकेण तस्योपलब्धिलक्षणप्राप्त स्यानुपलब्धे:, शशविषादादेरिव । न चानुमानात् स्थितिरुपपद्यते, तस्य प्रत्यक्षनिराकृतत्वात् । न चोपलब्धि प्राप्तत्वं तस्यासिद्धमिति, वाच्यम् , ज्ञापकत्वात् । न चोपलब्धि प्राप्तत्वं तस्यासिद्धमिति वाच्यम्, ज्ञापकत्वात् । कारको हीन्द्रियादिशक्त्यैवाज्ञातो पि कार्यं जानाति करोति संस्कारवद् वीजादिवच्च । ज्ञापकस्यासिन्निको-चादेरिव ज्ञापकत्वस्यासम्भवान्नानुमानादनवस्था । तथा चा ज्ञापक: स्फोटो नाभ्युपगन्तव्य इति । यदा अभिन्नस्तदा वर्ण एव स्फोटो

न तु तेभ्यो भेदेनावस्थित इति हस्त: कर इतिवत् स्फोटो वर्ण इति समानश्रुत्यापत्ति: स्यात् ।

यत्तावदुक्तं वर्णाभिव्यङ्•गय इति तदपि न युक्तम् । स्फोटो हि बहुभिर्वर्णैरभिव्यज्यते ततश्चार्थप्रतीति हेतु स्यात्, एकैकेन वा ? यदा बहुभिरविव्यङ्•गयस्तदा तेषामुच्चारितप्रध्वंसित्वेन विसर्जनीय काले गकारौकाराभावान्न विसर्जनीयमात्रात्तदभिव्यक्तिरिति दोष: स्यात् । यथैकैकेन वर्णनाभिव्यज्यते स्फोटस्तर्हि गकारादि "गो गवय गगन "इत्यादि स्फोटानां बहूनामभिव्यक्ततो विशेषाभावादनेकार्थ प्रतिपत्तिप्रसङ्•ग: । किञ्च विभुत्वे, चास्यैकपुरुषोच्चारितैर्वर्णैरभि-व्यज्यते चोच्चारितैर्वर्णैरभिव्यक्तिभावे सति विशेषाभावाद् देशान्तरे पि प्रमातृणामर्थप्रतिपत्ति:स्यात् । तथा कालान्तरे नित्यत्वेनाधेया विशेषत्वात् । तथा च नायं स्फोटोनित्यो विभुर्वा कश्चिदर्थप्रतिपादको

युक्त इति चेन्न, भाष्ये परः सन्निकर्षः संहिता इत्यत्र -

"बुद्धौ कृत्वा सर्वां चेष्टाकर्त्ता धीरस्तन्वन्नीतिः ।
शब्देनार्थान् वाच्यान् कृत्वा बुद्धौ कुर्यात् पौर्वापर्यम् ।।इति

कथनोक्तदिशा सर्वस्य वस्तुजातस्य बौद्धपदार्थत्वात्तत्रैव सास्नालाङ्गूलादिलक्षणमर्थं बुद्ध्याऽध्यवस्य तदनुगुणं गौरिति पदं चिन्तयैवानुसन्धाय ततः स्थूलशब्दं प्रयुङ्क्ते ततश्च बुद्ध्यधिरोहितं पदं बुद्ध्याधिरूढं गवादिपदसङ्कृतं विवक्षितगोगवयाद्यर्थक्रमेण तत्तदर्थाकारमुत्पद्यमानं ततत्स्थूलशब्दोच्चारणकारणं तत्तद्बुद्धिवृत्त्यात्मकमेवार्थविज्ञाने क्रमेण गवादीनां वाचकं भवति । तदुक्तम् -

तद्बुद्ध्यधिरोहपदं क्रमवृत्तस्य क्रमेण विज्ञानम् ।
वाचकमिष्टमदृष्टं हेतुश्चेत् स्थूलशब्दजातस्य ।।[1] इति

अतएव वाच्याद् भिन्नं किमपि वाचकत्वेन स्थितमान्तरं विमर्शात्मकं वस्तु विद्यते । बुद्धिर्हि वाह्ये चक्षुरादिनाविषयीकृत एवार्थे ऽध्यवस्यतीति दृष्ट्वा न खलु सर्वथा विषयीकृते त्विप्रसङ्गात् । ततश्चाभ्यन्तरे बुद्धिःकेनापि विषयीकृतस्वार्थे परामर्शं करोति, अन्यथा सर्वदा सर्वार्थप्रसङ्गः । तदुक्तम् -

स्पर्शरसगन्धशब्दाद्यर्था येनावमृश्यतां नीताः ।
सोऽन्तः सज्जयात्मा नादःसिद्धो न विषयभावेन ।।
विषयीकुर्वन् सर्वान् शब्दार्थानेष वाचको नान्यः ।।इति ।

---

1. नादिकारिकायाम् - 7

तस्माद् रूपादयो र्थो येनावपृश्यतां नीता:स एवात्र नादे वाचक:, स चान्त:सन्चल्यात्मा, प्रतिपत्तुर्वाच्यवुद्धिगत्या स्थूलशब्दाकारेण वाच्यो भवति । एवन्च सूक्ष्मनाद एवाभिव्यङ्ग्य:स्थूलनाद एवाभिव्यञ्जकत्वेन गृह्यते । नादाभिव्यञ्जकत्वेन परनादस्य स्फोटरूपस्य ग्रहणं वोध्यम् । उक्तन्च वाक्यपदीये -

न सो स्ति प्रत्ययो लोके य:शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।[1] इति

उक्तन्च श्रीमत्पराख्ये ग्रन्थे -

पूर्ववर्णसंस्कारयुक्तो न्त्यो र्णो भिधायक: ।।इति

तत्र "अर्ण" इति पदेन नादध्वनिरेव गृह्यते । एवं परनादस्य [परावाच:] शब्दब्रह्मरूपस्य स्फोटस्थानापन्नस्य वाचकत्वं सिद्ध्यति, अस्य सूक्ष्मशब्देत्यपिसंज्ञा । तथा च वाक्येषु पदेषु वा वाचकत्वेन भिन्नरूपो यं नादो व्यक्तत्वेन सूक्ष्मशब्दवाच्यवाचकत्वेन स्थूलशब्दवाच्य:।

उक्तन्च नादकारिकायाम् -

"अव्यक्तत्वान्नाद: सूक्ष्मशब्दस्तु वाचकत्वेन"।[2] इति ।

एवं स एवाव्यक्तात्मा नाद:परावाग् शब्दब्रह्मपदव्यपदेश्य:। तस्य ज्ञानादेव मोक्ष: । उक्तन्च भर्तृहरिणा -

"शब्द ब्रह्मणि निष्णात: परब्रह्माधिगच्छति"[3]।इति

1· वाक्यपदीये ब्रह्मकाण्डे -
2· नादकारिकायाम् - 13
3· वाक्यपदीये - का० सं०

शैवागमपद्धत्या विचारे क्रियमाणे नादस्य द्वैविध्यं दृश्यते । तत्रैक: कारणरूपो नाद: {परनाद:} अपरश्च कार्यरूप: । तयोर्द्वयोरभिव्यङ्ग्याभिव्यञ्जकभावरूप: सम्बन्ध इति बोध्यम् ।

परमार्थतस्तु महामायाया:शक्तिस्वरूपाया जन्यो नाद:एव {परनाद} परावाग् रूपेण वाचकत्वेन ज्ञेय:, यस्य स्थूलशब्दत्वेन मन्त्रतन्त्रात्मका:शब्दा:वाच्यो अभिव्यञ्जका भवन्ति । उक्तञ्च -

"देवीं वाचमजनयन्त देवास्तां विश्वरूपा:पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु।।[1] इति

पुनश्च श्रीरामकण्ठेन -

"सा प्रतिपुरुषं भिन्ना वाक्शक्तिर्वाचिकास्थितेति ।
वाचक जातं निर्मायान्तरस्तद् व्यनक्ति वाह्ये पि ।
स्थूलै:शब्दैर्व्यक्ता: सूक्ष्मानादात्मकास्ततो ध्वनय:।
वाच्यार्थभिन्नां वुद्धिं कुर्वन्तो वर्धयन्ति जनयानाम् ।।[2] इति

वस्तुतस्तु यो हि खलु शैवानां गेहे नादशब्देनाऽऽहतनाद् परावाग् शब्दब्रह्मपदेनोच्यते स एवास्माकं वैयाकरणानां नये स्फोट शब्देन व्यवह्रियते । स च स्फोट:सर्वथा भाष्यकारवार्तिककारसूत्रकार वाक्यपदीयाद्युक्तदिशानित्य:कूटस्थो नादिनिधनपदव्यपदेश्य एव ।

श्रुतिरपि वक्ति -

सूक्ष्मामर्थामविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।
तामन्ये विदुरन्यामिव नानारूपामात्मनि सन्निविष्टाम् ।।

----

1. ऋग्वेदे 8/100/11

2. नादकारिकायामन्ते -

एवं साधनैकधना: तन्त्रागम तत्त्वविद: परामेवार्था दुर्गां कुण्डलिनीं त्रिपुरसुन्दरीं राजराजेश्वरीमित्यादि परैःसहस्रैःशब्दैः संगिरन्त: समग्रं चराचरं जगत् तस्यामेव विनिवेदयन्त: नितरां योगक्षेमं प्रार्थीयन्तीं विलक्षणाञ्च स्थितिं जिज्ञासुषु सम्पादयन्तीति सदा स्मर्तव्यं तत्त्वविद्भिरिति शम् ।

नादतत्त्वस्य स्वारस्यम्

शैवागमे विन्दु-शक्ति शिवाख्यमिति तत्त्वत्रयं स्वीक्रियते । तत्र विन्दु:कारणं नादरूपस्य तत्त्वस्य । तदुक्तम् -

जायते ध्वा यत: शुद्धो वर्तते यत्र लीयते ।
स विन्दु:परनादाख्यो नादविन्द्वर्णकारणम् ।।[1]

एवं शुद्धाध्वन:शिवादिरूपस्योत्पत्तिलयाधारत्वेनोपादानतया नादविन्दुवर्णापरनादाख्य रूपेणाव्यक्तं त्रिगुणञ्च शक्तितत्त्वमुच्यते । तत्र नादो नामाभिधेयवुद्धिहेतुर्विन्दो: प्रथमप्रसररूप: । सूक्ष्मो नादश्चिन्तयारहित: । विन्दुश्च तत्कार्यो मयूराण्डरसवद्व्यपदेश्य:परामर्शज्ञानरूपोक्षरविन्दुस्तत्रैव सूक्ष्मत्वेनोक्त: ।अर्णश्च वर्ण एव । आकाशवायुप्रभव:श्रोत्रग्राह्य:स्थूलशब्द: । एतञ्च नादविन्द्वर्णकारणत्वं विन्दोर्विज्ञेयम् । उक्तञ्च -

स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत् ।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम् ।।

---

1. रत्नत्रये श्लोक सं० 22

एवं स्थूल-सूक्ष्मपरभेदेन विन्दुनादशब्दरूपस्य ग्रहणं बोध्यम् । तथा च शब्दस्य परनादरूपस्य विन्दुतत्त्वस्याव्यक्तरूपस्य ज्ञानन्तु निर्विकल्पकसमाधौ भवति । शिव एव च विन्दोर्विस्फोटको वर्तते । तदुक्तं -

"विद्याशरीरो भगवाननन्तः क्षोभको मतः ।
मायायाः सा च विन्दुर्द्भिर्बैन्दवं तत्त्वमुच्यते ।।"[1]

किन्तु यदा वश्यं शब्दो पेक्षितो भव त, तदा शिवसंक्षोभाद् विन्दुजन्यः कश्चन शब्दो भवति । तस्यैव च चतस्रो वृत्तयःपरा-पश्यन्तीमध्यमावैखरीरूपा भवन्ति तत शब्दोपादानत्वेन विन्दुसिद्धि-र्भवति । तदुक्तम् -

स तु शब्दश्चतुर्धा वाग् वैखर्यादिविभेदतः ।
जायते विन्दुसंक्षोभादनन्तस्यार्थ दर्शने ।।"[2]

अत शैवागमोक्तदिशा विन्दोःपर्यायेष्वेतानि नामानि परिगृह्यन्ते -

"शब्दतत्त्वमघोषा वाग् ब्रह्मकुण्डलिनी ध्रुवम् ।
विद्या शक्तिः परा नादो महामायेति दैशिकैः ।।
विन्दुरेव समाख्यातो व्योमानाहतमित्यपि ।।[3]

इत्याद्युक्तदिशा परा नाद विन्दूत्यादीनामेकार्थवाचकत्वमेव ज्ञायते । उक्तञ्च -

"शब्दराशिश्च विन्दूत्यो विन्दुर्नादादशावपि ।
विन्दोरनाहतादेष कारणं शुद्धवर्त्मनः ।।"[4]

---

1. रत्नत्रये श्लोक सं० 47
2. " " 46
3. " " 60-61 तत्रैव श्लोकार्थम् ।
4. " " 172

इत्यत्र "विन्दुर्नान्दादसावपि" इति वचनेन नादादेव विन्दोरुत्प- त्तिर्वक्तुं शक्यते । स च नादो नाहताद् विन्दोर्जायते । अनाहतो विन्दुश्च केवलाद् विन्दोर्भिन्न इति न पूर्वापरविरोधः ।

अत्र प्रसङ्गाद् वैखरीमध्यमापश्यन्तीसूक्ष्मेतिरूपैर्वृत्तिचतुष्टयस्य संक्षेपतः शैवागमोक्तदिशा विचारः क्रियते । तत्र वैखरीश्रोत्रग्राह्या, वार्थस्य वाचिका भवति । तदुक्तम् -

आकाशवायुप्रभवाच्छरीरात् समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः ॥[1]

एवञ्च नादाभिव्यङ्ग्यत्वं शब्दस्येति भवति -

"केवलं बुद्ध्युपादाना क्रमाद् वर्णानुपातिनी ।
अन्तःसंजल्परूपा तु न श्रोत्रमुपसर्पति ।
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाह्वया ॥[2]

एवञ्च मध्यमावाक् स्थूलशब्दस्य कारणत्वेन गृह्यते ।

अविभागेन वर्णानां सर्वतः संहृतक्रमा ।
स्वयं प्रकाशा पश्यन्ती मयूराण्डरसोपमा ॥"[3]

पश्यन्ती चैवाक्षरविन्दुरूपा ।

सूक्ष्मा तु नादापरपर्यायेरत्युक्तम् -
"स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी" ॥[4]

1· रत्नत्रये श्लोक सं० 64

2· " " 65

3· " " 66

4· " " 75

त्तापायित्वञ्च सुषुप्त्याद्यवस्थास्वपिसम्भवात्, न तु नित्यमेव तेनास्या अपि प्रतिपुरुषं भिन्नतया अचेतनत्वादनेकत्वाच्च कार्यत्व-मनित्यत्वं च बोध्यम् । एतस्यां च पुरुषाविवेकेन दृष्टायां पुरुषस्य भोगसमाप्तिरूपा संसारनिवृत्तिः । तदुक्तम् -

"यस्यां दृष्टस्वरूपायामधिकारो निवर्तते ।।"इति

यस्यां पुरुषस्वरूपाद् विवेकेन दृष्टस्वरूपायां पुरुषस्य भोगाधिकारो निवर्तत इति तदर्थः ।

अत्र वैयाकरणाः - परा वागेव शब्दब्रह्मव्यपदेश्या । सैव वाक् शैवदर्शने सूक्ष्मापदेन व्यवह्रियते । तज्ज्ञानादेव मोक्षः। तदुक्तम् -

"सर्वभूतान्तरचरः शब्दब्रह्मात्मको रविः ।
भित्त्वा बोधमङ्गेन निर्गच्छन्त्यविशङ्किता:।।"[2]

किन्च -

शब्दब्रह्मणिनिष्णातः परं ब्रह्माधिगच्छति " इति सर्वा चेय मागमोक्तसृष्टिप्रक्रिया नागेशेनापि लघुमञ्जूषायां प्रतिपादिता -

"प्रलयान्ते परमेश्वरस्य सशक्तिकस्य सिसृक्षात्मिका मायाः वृत्तिर्जायते । ततो विन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्ति-तत्त्वम् । विन्दोरचिदंशो बीजम् ।चिदंशोविन्दुः,चिदचिन्मिश्रो शो-नादः । अत्राविद्याशब्देन शब्दार्थोभयसंस्काररूपाविद्या उच्यते ।ततश्चा-स्माद् बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते ।एतज्जगदुपादान-मेव "स" "परा" इत्यादिशब्देन व्यवह्रियते । तदुक्तम् -

---

1. रत्नत्रये श्लोक सं0 74
2. " " 77

"बिन्दोस्तस्माद्भिद्यमानाद्रवो व्यक्तात्मको भवत् ।
स एव श्रुतिसम्पन्नै: शब्द ब्रह्मेति गीयते ।।[1]

एतत्सर्वमपि प्राणिनां मूलाधारे संस्कृतपवन चलनेनाभिव्यज्यते । आत्मार्थं विवक्षो: पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थ-पवनसंस्कार:, तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं "परावाक्" इत्युच्यते ।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।[2]

तामेव परावाचं शब्दब्रह्मानादिनिधनपदव्यपदेश्यां शैवागमानुसारिणो बन्धनात्मिकामेव ब्रुवते । तथा -

तामेव वाणीं सूक्ष्माख्यामाहुरात्मविदो जना: ।
प्रस्यात्मनियता एताश्चतस्रो बन्धनात्मिका ।।[3]

वैयाकरणाभिमतां शब्दब्रह्मापरपर्यायां पराख्यां वाचमेव शैवा विन्दुकार्यभूतां शब्दवृत्तिमेव मन्यन्ते, न तु पुरुषसमवायिनीम्, तस्या-विकारित्वेन जडत्वात्, तत्समवाये पुरुषस्यापि विकारित्वा चेतन त्वादिदोषप्रसङ्गाच्च । एतासाञ्च चतसृणां वृत्तीनां कार्यत्वेन जडत्वा-न्न सित्समवायो युज्यते, अपितु बन्धनत्वमेवेति बोद्धव्यम् । तदुक्तम् -

---

1· प्रपञ्चसारे 1/43

2· वाक्यपदीये ब्रह्मकाण्डे कारिका सं० ।

3·

"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद् विन्दुसमुद्भवः ।।
परशक्तिमयः साक्षात् त्रिधा सौ भिद्यते पुनः ।
विन्दुर्नादो बीजमिति तस्य भेदाःसमीरिताः ।।
विन्दुःशिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायःसमाख्यातः सर्वागमविशारदैः ।।
भिद्यमानात् पराद् विन्दोरव्यक्तात्मा ततो भवत् ।
शब्द ब्रह्मेति तं प्राहुः सर्वागमविशारदाः ।।[1]

अत्र खलु समवायःसम्बन्धः । स च क्षोभ्यक्षोभकभावरूपःसृष्टि-हेतुः । अत्र पराद् विन्दोरित्युक्त्याप्रथमविन्दोरेव नादो जायतेति प्रतीयते । तदुक्तम् -

कालेन भिद्यमानस्तु स विन्दुर्भवति त्रिधा ।
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ।।
स विन्दुनादबीजत्वभेदेन च निगद्यते ।।[2] इति

वैयाकरणैः सूक्ष्मापरपर्याया एव वाक् शब्दब्रह्मपदेन व्यवह्रियते । अत्र खलु येषां भ्रम एव वर्तते । यतो हि - वैखरी श्रोत्रजे बोधे कारणम् । मध्यमा सविकल्पकज्ञाने कारणम् । पश्यन्ती मध्यमोत्पत्तौ कारणम् । किन्तु सूक्ष्मा -

"यदा वृत्तिरक्षेण विलीनाविरतसंश्रया ।
तदा सूक्ष्मा विशुद्धेव चिदाभात्यविवेकतः ।।[3]

---

1. रत्नत्रये

2. प्रपञ्चसारे 1-42

3. रत्नत्रये 83

इत्युक्तदिशा यदा चित्संश्लिष्टा भवति, सर्वावृत्तयश्चित्ते विलीना भवन्ति, तदा सूक्ष्मा वाक् तादात्म्यापन्नतया चिदिव भाति । तत्र चिदा सहात्यन्तश्लेष एव कारणम् । अत एव न तज्ज्ञानान्मोक्षः। यथा अतात्त्विकान्यथा भावस्थले रज्जौ सर्पभ्रमेण बिभ्यति जनाः, किन्तूत्तरकालिकेन प्रभात्मकेन ज्ञानेन नायं सर्पः, अपि तु रज्जुरेवेतिज्ञानेन भयापनोदनं भवति, तथा परावाचो पि कारणीभूतस्य चिच्छक्तिसम्पन्नस्य बिन्दुरूपस्य ज्ञानान्मोक्ष इति तेषां सिद्धान्तः । वस्तुतस्तु परा सूक्ष्मशब्दापरपर्याया चिच्छक्तिरूपैव, तत्प्रकृतीबिन्दुरूपेण स्थितस्य परनादस्य ज्ञानमेव मोक्षकारणमिति मन्तव्यम् ।

एष एव पन्था सर्वेषां साधनैक धनानां तन्त्रागमतत्त्वदाभिष्टः। अत्रैव वैयाकरणपरमाचार्याणां, तत्र भवतां व्याडि पाणिनि पतञ्जलि भर्तृहरिभोजराज -हेलाराज-नागेशभट्ट-कालिकाप्रसाद शुक्लादीनां तत्र-तत्र ि ग्रन्थेषु न्यूनाधिक्येन स्वारस्यमिति विभावयन्तु सुधियः ।

1· प्रपन्चसारे 1- 42

2· रत्नत्रये 83

भास्कररायलक्ष्मीधरयोरथस्वारस्यम् -

नादादि प्रकरणानुसृत्य वीरवस्यारहस्ये भास्कररायेणोक्तम् -

स जयति महान् प्रकाशो यस्मिन् दृष्टे न दृश्यते किमपि ।
कथमिव तस्मिञ्ज्ञाते सर्वं विज्ञातुमुच्यते वेदे ।। इति ।।[1]

स सर्वेषामात्मत्वेन प्रसिद्धः महान् देशकालाद्यनवच्छिन्नः पराप्रकाश्यःप्रकाशःसर्वदा अनावृतात्मस्वरूपज्योतिः, स्वरूपज्योतिरेवान्तः, इति रहस्यागमात् " न तत्र सूर्यो भाति" इत्यादिश्रवणाच्च ।जयति सर्वोत्कर्षेण वर्तते । यस्मिन्नधिष्ठाने दृष्टे निर्विकल्पात्मकचरमवृत्तिविषयीकृते सति किमपि दृश्यं न दृश्यते, अधिष्ठानज्ञाननाश्यत्वात् । अत एवैकविज्ञानेन सर्वविज्ञानं श्रुताबुक्तं कथं सङ्गच्छत इति साश्चर्यमाह- कथमिवेति । अथवा विवर्तवादं वेदान्तिसम्मतं परिणामवादी तान्त्रिको दूषयति - कथमिवेति । तन्मते मृद्घटादिदृष्टान्तानुपपत्तिरित्यर्थः । अयं तान्त्रिकप्रक्रिया - "इच्छामि "जानामि" इत्यादावुत्तमपुरुषान्तर्भासमानं स्फुरणान्वयि ज्ञानमेव प्रकाशाभिधं ब्रह्म । तच्च सर्वज्ञत्व सर्वेश्वरत्वसर्वकर्तृत्वपूर्णत्वव्यापकत्वादिशक्तिसंवलितम् ।तस्य चानन्दरूपांश एव स्फुरणं परा अहन्ता, विमर्शःपरा ललिता भट्टारिका त्रिपुरसुन्दरीत्यादिपदैर्व्यवह्रियते । उक्तञ्च -

ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति ।
एते हंताया किलपर्याया: सद्भिरुच्यन्ते ।।[2] इति

पराहंतामन्तरेणेदंताया असंस्फुरणादहमिदमो: ससम्बन्धिकत्वादिदंपदगम्यस्य दृश्यस्याहन्तारूपशक्त्या तद्विशिष्टब्रह्मणा वा जन्यत्वम् ।

1· वीरवस्यारहस्ये प्रथमांशे का०सं० -3

2· विरूपाक्षपञ्चाशिकायां विश्वशरीरस्कन्धे ।

तच्च दृश्यं तत्परिणाम एव तस्यां परिणतायां तु न कश्चित् पर इष्यते "इति वामकेश्वरतन्त्रात् "वाचारम्भणं विकार:"इत्यादिश्रुतीनां तत्रैव स्वारस्याच्च । शक्तिशक्तिमतोरुपादानोपादेययोरत्यन्तमभेद:, न पुनरपिनिबद्धादिवद्भेदाभेदौ । अतएव "सर्वं खल्विदं ब्रह्म"इति समानाधिकरण्यमभेदे, न पुनर्बाधायाम् । । अद्वैत श्रुतय:सर्वा अप्येतदभिप्रायिका एवाविरुद्धा: । सर्वप्रमाणमूर्धन्यया श्रुत्या तदनुसारि तन्त्रैश्चाद्वैते कथिते, तद् विरुद्धत्वेन भासमान:कार्यकारणयोर्भेदांश एव कल्पित आस्तां न पुन:सर्वो पि प्रपञ्च: । नेह नानास्ति किंचन इत्यादि श्रुतिष्वपि भेदांशस्यैव निषेधो न प्रपञ्चस्य । "एकमेवाद्वितीयम्" इत्यादौ श्रूयमाणो भेदवत्प्रपञ्चाभावो पि विशेषणाभावप्रयुक्त एव । अतएव भामत्यां हाटकमकुटग्रन्थे भेदस्यैव हाटकन्यूनसत्ताकत्वं न मुकुटस्योक्तम्, परिणामस्य परिणामिसमानसत्ताकत्वावश्यिकत्वात् । "मायामात्रमिदं द्वैतम्" इत्यत्रापि द्वैतशब्देन भेदस्यैव मिथ्यात्वमुच्यते, न पुनर्भेदवत: तथात्वे तु प्रतियोगितासंबन्धेन जगत इवानुयोगितासंबन्धेन ब्रह्मणो पि भेदवत्त्वस्य सत्वात् सदसद्भ्यामभावो निरूप्यत इति न्यायसिद्धत्वाविशेषान्मिथ्यात्वापत्ते:। ततश्च श्रुतेरपि परिणामवाद एव संगत: सिध्यति । भगवता व्यासेनापि "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"इत्यस्मिन्नधिकरण एकविज्ञानेन सर्वविज्ञानप्रतिज्ञां मृद्घटनखनिकृन्तनादिदृष्टान्तम् बहुस्यां प्रजायेय"इत्यभिध्योपदेशादिकं चानुसंदधानेन परिणामवाद एवाभिप्रेत: कण्ठरवेणोक्तश्च "आत्मकृते: परिणामात्" इति सूत्रे । भाष्यकारैरपि तत्र विवर्तवादानुसारेण व्याचक्षाणैरपि सौन्दर्यलहर्याम् "मनस्त्वं व्योमत्वम्"इति श्लोके त्वयिपरिणतायाम्"इति स्वाभिमत: परिणामवाद एव स्फुटीकृत:।

अस्मिन् पक्षे रहस्यनामसहस्रे "मिथ्याजगदधिष्ठाना" इत्यादौ श्रूयमाणं मिथ्यात्वं तु स्वानतिरिक्तरूपत्वम्, घटादिरूपेणानित्यत्वं ब्रह्मरूपेण नित्यत्वम् , मृद्घटयोरभेदे ऽपि घटरूपेण ऽवस्तत्वं मृद्रूपेणाऽवस्तत्वं चेत्यादिवदविरुद्धधर्मनिरासादिकमूह्यमित्यादिकः । उक्तञ्च -

"नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः ।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति:।।
सावश्यं विज्ञेया यत्परिणामवादभूदेषा ।
अर्थमयी शब्दमयी चक्रमयी देहमय्यपि च सृष्टिः ।।[1] इति

अत्रेदं -अवश्यम्, सर्वविज्ञानसाधनत्वान्मोक्षादिपुरुषार्थप्रदत्वाच्च । अर्थमयी शिवादिक्षित्यन्तषट्त्रिंशत्तत्त्वरूपा । शब्दमयी, परा, पश्यन्ती, मध्यमा, वैखर्यादि चक्रमयी बिन्द्वादिभूगृहान्ता । देहमयी सूक्ष्मादि-स्थूलान्ता ।तत्रचोक्तम् -

तज्ज्ञानार्थमुपाया विद्या लोके चतुर्दश प्रोक्ताः ।
ते ऽपि च सारभूता वेदास्तत्रापि गायत्री ।।[2] इति ।

अयम्भावः -चतुर्दश विद्याः- चत्वारो वेदाःषडङ्गानिन्यायो मीमांसा पुराणं धर्मशास्त्रञ्चेति । तन्त्राणां धर्मशास्त्रे ऽन्तर्भावः । तन्त्रराजव्याख्याने च विस्तरेण तन्त्राणां धर्मशास्त्रे ऽन्तर्भावः प्रपञ्चयिष्यते । एवं च न शिष्टकोपाधिकरणस्थवार्तिकविरोधःशास्त्रापरिमाणानातिक्रमात् । अतः वीरवस्यारहस्ये -

तस्याः स्पष्टितयं तत्रैकं यत्तु प्रपद्यते स्पष्टम् ।
वेदेषु चतुर्ष्वपि परमत्यन्तं गोपनीयतरम् ।।[3] इति

---

1. वीरवस्यारहस्ये प्रथमो ऽशे कारसं० 4-5

2. " " कारसं० 6
7

तस्या:गायत्र्या: स्पष्टमस्पष्टं चेति पदच्छेदआवृत्त्या । चरणत्रयम् "तत् सवितु:"इत्यादि स्पष्टम् । परोरजसे सावदोम्" इति चतुर्थचरणं त्वस्पष्टमित्यर्थ: । परं श्रीविद्याख्यं द्वितीयं रूपम् ।

अत एव -

> कामो योनि: कमलेत्येवं सांकेतिकै: शब्दै: ।
> व्यवहरति न तु प्रकटं यां विद्यां वेदपुरुषो पि ।।[1] इति

यद्यपि तन्त्रराजादौ सौन्दर्यलहर्यां च हादिविद्याया एव प्रन्थमुद्धारो दृश्यते, तथापि "श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा" इति वचनात् । षोडशीचक्रत्वाच्च, यदक्षरैकमात्रे पि यदेकादश-माधारम् "इत्यादिरहस्यार्थ प्रतिपादकाक्षरशालित्वाच्च, त्रिंशत्यामस्या एवादशच्च त्रिपुरोपनिषदेतन्मूलकत्वेनैवान्यासामुद्धाराच्च, योगिनी हृदयादावुक्तानाभिहापि वक्ष्यमाणानामर्थानामत्रैव स्वारस्याच्च, शाङ्खायनश्रुतौ "चत्वार ईं विभ्रति"इत्यस्यामृचि च प्रथममस्याएवो-द्धाराच्च कादिविद्याया: प्राधान्यमिति द्योतयन्नस्या:प्रतीकमादत्ते -

> कामो योनि:कमला वज्रपाणिर्गुहाहसा मातरिश्वाभ्रमिन्द्र:।
> पुनर्गुहासकला मायया च पुरूच्येषा विश्वमातादिविद्या[2] ।।इति

कामो मातरिश्वा च ककार: । योनिरेकार: ।कमला तुरीय: स्वर: । वज्रपाणिरिन्द्रश्च लकार: । गुहाद्वयं माया च लज्जाबीजम् । हसेति सकलेति च स्वरूपम् । गुहया सह समासाद्बहुवचनं न पुन:सकारो

---

1. वीरवरयारहस्ये प्रथमो वै का०सं०-8
2. " " टीकायां पृ०सं०-6

दीर्घः । एवं लृकारो पि । अंहकारः । एतादृशैः सांकेतिकैः शब्दैर्व्यवहारादत्यन्तगोपनीयत्वं समर्थितं भवति ।

तथा चोक्तम् -

"क्रोधीशः श्रीकण्ठारूढ़ःकोणत्रयं लक्ष्मीः ।
मांसनुत्तररूढं वाग्भवकूटं प्रकीर्तितं प्रथमम् ।।
शिवहंसब्रह्मवियच्छक्राःप्रत्येकमक्षरासदाः ।
द्वैतीयीकं कूटं कथितं तत् कामराजाख्यम् ।।
शिवतो वियतो युक्तं तृतीयमिदमेव शक्तिकूटारथम् ।
हृल्लेखानां त्रितयं कूटत्रितये पि योज्यमन्तेस्यात् ।। इति

क्रोधीशो ब्रह्मा च ककारः । श्रीकण्ठो नुत्तरमक्षरं चाकारः। तमारूढ़स्तेन युक्तः । कोणत्रयं योनिः। लक्ष्मीःकमला । मांसं शक्रश्चेन्द्रः शिवोवियच्च हकारः । हंसः सकारः । अक्षरसमूहात्मकत्वात् कूटत्वव्यपदेशः ।

किन्च -

हृल्लेखायाः स्वरूपं तु व्योमाग्निर्वामलोचना ।
विन्दवर्धचन्द्ररोधिन्यो नादनादान्तशक्तयः ।।
व्यापिकासमनोन्मन्य इति द्वादशसंहतिः ।
विन्दवादीनां नवानां तु समष्टिर्नाद उच्यते ।।[2] इति

व्योम हकारः केवलो न त्वकारविशिष्टः । अग्नीरेफस्तादृशः। वामलोचनेकारः। विन्दवादयो नवापि सूक्ष्मसूक्ष्मतरसूक्ष्मतमकालैरुच्चार्याध्वनिविशेषाः,वर्णविशेषा वा । न च ककारादिवत् स्पष्टमनुच्चार्यत्वात् तन्त्रीस्वरतुल्यत्वेन श्रूयमाणत्वाच्च कारप्रत्ययाभावाच्च "बीजविन्दु-

---

1. वीरवरयारहस्ये प्रथमो शे का०सं० १,१०,११

2. " " " 12, 13

ध्वनीनां च त्रिकूटेषु ग्रहात्मिका "इत्यादौ ध्वनिपदेनैव तन्त्रेषु व्यवहाराच्च न वर्णत्वमर्धचन्द्रादेरिति वाच्यम्, अनुस्वारविसर्गादावुक्त हेतुसत्त्वे पि वर्णत्वस्पष्टत्वात् । कथमन्यथा "त्रिषष्टिश्चतुःषष्टीर्वा वर्णाःशम्भुमते मताः" इति प्रतिज्ञाय "अनुस्वारो विसर्गश्च "इति परिगणनं शिक्षायां सङ्गच्छेत् ? न च तादृशसंख्याविरोधादेव नात्र वर्णत्वम् तत्र स्पष्टोच्चार्याणामेव गणनात् । न च ताल्वादिपरिगणितं स्थानानाभिव्यङ्ग्यत्वान्न वर्णत्वम् ,तदनभिव्यङ्ग्यत्वस्य पश्यन्त्यादावव्याप्तेः,"चत्वारि वाक्यपरिमिता पदानि "इति श्रुत्या वर्णसमूहात्मक पदत्वस्य स्पष्टमुक्तत्वाच्च । अतएव चतुःशतीशास्त्रे नादस्यार्थ वर्णनं सङ्गच्छते । न च रथघोषवत् पदार्थस्मारकत्वोपपत्तिः तत्र हि तत्कालकरणीयत्व संबन्धेन माहेन्द्रस्तोत्रोपाकरणस्य स्मृतिविषयताया वाचनिकत्वेन रथघोषसामान्यस्य लौकिकादिसाधारणस्य स्मारकत्वाभावेन तस्य तत्र शक्तेरयोगात् प्रकृते तु न तथेति वैषम्यात् हृल्लेखात्रयसंभूतैस्त्रिसख्यैस्तथाक्षरैः ।इत्यादौ प्रतिहृल्लेखं हकाररेफेकारानुस्वारनादपञ्चकमिति पञ्चदशाक्षराणीत्युक्तया नादे क्षारत्वक् व्यवहारात् । तदुक्तम् -

"भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनौ ।
अर्धचन्द्रश्च विन्दुश्च नवार्णो मेरूच्यते ।
महात्रिपुरसुन्दर्यां मन्त्रा मेरु समुद्भवाः ।।[1] इति

ज्ञानार्णवादावप्यसकृद्व्यवहारस्य दर्शनाच्च ध्वनिपदेन व्यवहारस्तु तत्तुल्लत्वलक्षणाया ध्वनिपर्यायनादपदवाच्यत्वान्नेयार्थरूपलक्षणया वा नेय इति । एवं च प्रथमतृतीयकूटे अष्टादशवर्णात्मके:,

---

1. वीरवश्यारहस्ये टीकायां पृष्ठे 8 तमे उद्धृतम् ।

मध्यकूटं तु चतुरधिकम् ,संहत्याष्टपञ्चाशद्वर्णात्मिका विद्येति यद्यपि विन्दु विनिर्मुक्तानामष्टानामेव नादसंज्ञा मन्त्रशास्त्रे तथापि व्यवहार- सौकर्याय तत्सहितानामेव सात्रकृतेति । अत एवोक्तम् -

प्रथमे ष्टादशवर्णाद्वाविंशतिरक्षराणि मध्ये स्यु: ।
प्रथमेन तुल्यमन्त्यं संघातेनाष्ट पञ्चाशत् ।।
मात्राद्वितयोच्चार्या कामकला च त्रिकोणा च ।
विन्दुरहितहृल्लेखा मात्र्यकालत्रयोच्चार्या: ।।
अन्येषां वर्णानां मात्राकालो र्धमात्रया सहित: ।
विन्दोरर्धं मात्रा परे परे चापि पूर्वपूर्वार्धा ।।[1] इति

वस्तुतस्तु - मात्रा लघ्वक्षरस्य काल: । तद्द्विगुणोगुर्वक्षरस्य । अत एव कामकला कमला त्रिकोणा योनिश्चद्विमात्रा । हृल्लेखायां द्वयोर्व्यञ्जनयोरेका मात्रा कामकलाया द्वे मात्रे इति त्रिस्त्र:। अनेषा- मकारसहितानां ककारादिदशवर्णानाम् । विन्दोरपि व्यञ्जनत्वादर्धा मात्रा । उक्तञ्च -

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम् ।।[2] इति

वचनात् । परे परे अर्धचन्द्ररोधिन्यादय:,पूर्वपूर्वार्ध:,अर्धचन्द्रस्यार्ध- कालो रोधिन्या:,रोधिन्यर्धकालो नादस्येत्यादिक्रमेण कालवन्त:। अयं भाव: - कालपरमाणुरेव इत्युच्यते । तथा च -

---

1. वीरवर्यारहस्ये का०सं० 14, 15, 16
2. " " टीकायां पृष्ठे 10 तमे उद्धृतम् ।

"नलिनीपत्रसंहत्या सूक्ष्मसूच्यभिवेधने ।
दले दले तु यः कालः स कालो लव संज्ञितः।
अतः सूक्ष्मतमो कालो नोपलभ्यो भृगूद्वह ।। इति

इति वचनात् षट्पन्चाशदुत्तरशतद्वपलवैरेकामात्रा । विन्दोरष्टाविंशत्युत्तरशतं लवाः । अर्धचन्द्रस्य चतुःषष्टी । रोधिन्या द्वात्रिंशत् । नादस्यषोडश । नादान्तस्याष्टौ । शक्तेश्चत्वारः। व्यापिकाया द्वौ लवौ । समनाया एको लवः । उन्मनायास्तु नास्त्येव कालः । यद्यपि योगिनी हृदये चक्रसंकेते,दीवाकारो र्धमात्रश्च इत्यनेन विन्दोःकालमुक्त्वा अर्धचन्द्रादेः शक्तिपर्यन्तस्य चतुरंशाष्टांशषोडशांशादिरूपभागद्वैगुण्यं कालस्योक्तवा शक्त्यादीनां पूर्वपूर्वद्विगुणांशकालवत्त्वं सामान्येनोक्तम् । "चतुषष्ठिस्तदूर्ध्वं तु द्विगुणं द्विगुणं ततः"इति तेन च वचनेन मात्राया द्वादशोत्तरपन्चशततमो भागउन्मनाकालःमात्रास्वरूपं च द्वादशोत्तरपन्चशतलवात्मकत्व मेव प्रतीयते, अत एव देशकालानवच्छिन्न तदूर्ध्वं परमं महत् इत्युत्तरग्रन्थे प्युन्मनायाःपरत एव कालानवच्छेद उक्त इति व्यक्तं प्रतीयते, तथापि "चतुःषष्टि-"इतिश्लोकस्य शक्तेश्चतुषष्टितमो मात्राभागः, तदूर्ध्वं द्विगुणं व्यापिकाया अष्टाविंशत्युत्तरशततमो भाग इत्यर्थस्ततस्तदूर्ध्वमिति पदाभ्यां द्विगुणपदद्वयेन च स्पष्टं प्रतीयते, अत एवोत्तरार्धे "शक्त्यादीनां च मात्रांशो मनोन्मन्यास्तथोन्मनी" इत्यत्र मनोन्मनीति पदस्य समनापर्यायस्य समनापर्यन्तानामित्यर्थकत्वमङ्गीकृत्य शक्त्यादीनां तिसृणा मित्यमृतानन्दैर्व्याख्यातम् । नादस्य विन्दवादिनवकस्य । अत एवोक्तम् -

---

1. वीरवस्यारहस्ये टीकायां पृष्ठे -10 तमे उद्धृतम् ।

"संहत्यैकलवोनो मात्राकालो स्य नादस्य ।
एकादशवाक्कूटे सार्धा एकादशोदिता मध्ये ।।

सार्धा अष्टौ शक्तावेकैकलनोनिता मात्रा: ।
संहत्यैकत्रिंशन्मात्रा मन्त्रेलवत्रयन्यूना :।।
कण्ठे च कण्ठतालुनि तालुनि दन्तेषु मूर्धि न सायाम् ।
स्पृष्ठविवारा घान्तरवाह्यैर्यत्नैस्तदक्षरोत्पत्ति: ।। इति

ककारत्रयमकारदशकं हकारपञ्चकं च कण्ठे । द्वितीयमक्षरं कण्ठतालुनि ईकारचतुष्टयं तालुनि । लकारत्रयं सकारद्वयं च दन्तेषु ।रेफत्रयं च मूर्द्धिनं । विन्दवादिनवकत्रयं नासायाम् । स्पृष्टेति ।ककाश:स्पृष्टयत्ना: अकाश:संवृता: ।ईकारा एकारश्च विवृता: । रेफाकाराश्चेषत्स्पृष्टा। हकारा:सकारौ चेषद् विवृता: विन्दवादय:संवृततमा: । इत्याभ्यन्तरो यत्न: । ककाराविवारश्वासाघोषवन्तो ल्पप्राणवन्तश्च । सकारौ महाप्राणवन्तौ विवारादिमन्तौ च । स्वरा:सर्वे ह्युदात्ता:। रेफा लकाराश्च संवारनादघोषाल्पप्राणवन्त: । हकारास्तु संवारादित्रयवन्तो महाप्राणवन्तश्च । विन्दवादयस्त्वात्यन्तिकसंवारादिचतुष्कवन्त:।

ततश्च -

प्रलयाग्निनिभं प्रथमं मूलाधारादनाहृतं स्पृशति ।
तस्मादाज्ञाचक्रं द्वितीयकूटं तु कोटिसूर्याभम् ।।

तस्माल्ललाटमध्यं तार्तीयं कोटिचन्द्राभम् ।
मालामणिवद्वर्णा: क्रमेण भाव्या उपर्युपरि ।।[2] इति

मूलाधारमारभ्येत्यर्थ: । तस्मादनाहतमारभ्य । तस्मादाज्ञाचक्रमारभ्य । इदं च स्थानत्रयं विन्दवादिरहितकूटत्रयस्यैव । सुषुम्णा-

----

1. वीरवश्यारहस्ये का०सं० 17, 18, 19
2. " " 20, 21

नाडीमूलाग्रयोर्द्धे सहस्रदलकमले, मध्ये चाष्टदलषड्दलानि त्रिंशत्पद्मानि सविस्तरं स्वच्छन्दं संग्रहादौ प्रपञ्चितानि । तत्र गुदोपरि द्व्यङ्गुलोर्ध्वे लिङ्गे नाभौ, हृदि, कण्ठे, भ्रूमध्ये च मूलाधारस्वाधिष्ठानमणिपूरानाहतं विशुद्ध्याज्ञनामानि चतुःषड्दशद्वादशषोडश द्विदलानि त्रिग्रिग्रन्थिमध्यसंदष्टानि चक्रपदवाच्यानपि षट् पद्मानि सन्तीति ।

अतएवेदम् -

> आधारोत्थितनादो गुण इव परिभाति वर्णमध्यगतः ।
> मध्ये फालं विन्दुर्दीप इवाभाति वर्तुलाकारः ।।

तदुपरि गतो र्धचन्द्रो न्वर्थःकान्त्या तथाकृत्या ।
अथ रोधिनी तदूध्वं त्रिकोणरूपा च चन्द्रिकाकान्तिः ।।[1] इति

अत्रेदं शब्दसृष्टिप्रक्रिया -वटबीजान्तर्गतवटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी त्रिपुरसुन्दर्येव तादृशसूक्ष्मरूपवत्त्वप्रवृत्तिनिमित्तकपरापदवाच्या। सैव च माति तरति कायतीति च व्युत्पत्त्या मातृकेत्युच्यते । तस्यां च निर्विकारायामप्यनादिसिद्धप्राण्यदृष्टवशात् स्वान्तःसंभृत विश्वसिसृक्षोत्पद्यते । ततःस्रष्टव्यपदार्थानालोचयति, तदैक्षत बहुस्यां प्रजायेय"इति श्रुतेः । तादृशमीक्षणमेव प्रवृत्तनिमित्तीकृत्य तस्यां पश्यन्तीति पदं प्रवर्तते । सैव च पश्यन्त्याख्या मातृका करणसरणित उत्तीर्णत्वादुत्तीर्णेत्युच्यते । तद वयवाश्च वामादयो ष्टौ शक्तयो न्यत्र प्रपञ्चिताः । अतः सैव व्यष्टिसमष्टित्वेषेण

----

1. वीरवस्यारहस्ये प्रथमां शे का०सं० 22, 23

नवविधा । ततो नवनादा अविकृतशून्यादयो जाता: तत्समष्टिश्च नादध्वन्यादिपदवाच्या नातिसूक्ष्मा परावन्नातिस्थूला वैखरीवदतो मध्यमाख्या मातृका मध्यमावयवरूपमविकृतशून्यस्पर्शनादध्वनिविन्दु-शक्ति वीजाक्षराख्यं नादनवकं मूलाधारादि षट्के नादे नादान्ते ब्रह्मरन्ध्रे च स्थितम् । नवभिर्नादैरकवटतपयशला ख्यवर्गनवकवती वैखर्याख्या मातृका जाता वै निश्चयेन स्पष्टतरत्वात् एवं कर्णविवरवर्तिनभोरूपश्रो-त्रेन्द्रियं राति गच्छति, तज्जन्यज्ञानविषयो भवतीति व्युत्पत्तेरित्या-द्यन्यातोविस्तर: । एवं च ककारादौ कत्वादिवर्णधर्माणां षड्जत्वादि-ध्वनिधर्माणां चानुभूयमानत्वात् परिणामे परिणामिनो नुस्यूतताया मृदघटे दर्शनाच्च वर्णेषु नादो नुस्यूत: । तन्तुविशेषजन्य:पटविशेषो वर्णरूपदवाच्य: । तत्र क प्रत्ययपरित्यागेन प्रयोगस्त्वक्षरवाचकवर्णपदेन श्लेषार्थ: । गुण इव वर्णकाख्यपटविशेषोपादानभूततन्तुविशेषवन्माला-मण्याधारसूत्रवच्चेत्यर्थ: । वर्णमध्यगत इत्यस्य द्वयोर्वर्णयोर्मध्यभागे वर्णशरीरान्तर्भागे च स्थित: । वस्तुतस्तु द्वयोर्वर्णयोर्मध्यभागे मणिद्वयं मध्यभागस्थ शुद्धसूत्रवच्छुद्धनादस्यमानम्, वर्णशरीरान्तर्भागे तु पटाभेदेन संवलिततन्तुवद्घटान्तर्मृद्वच्च तत्तद्वर्णाभेदेनैव नादस्य मानम्, न पुनस्तत्र मण्यन्तर्गतसूत्र दृष्टान्त: ,तस्य मणितो ल्पन्तभिन्नत्वात् ।

ततश्चोक्तम् -

> नादस्तु पद्मरागवदण्डद्वयमध्यवर्तिनीव सिरा ।
> नादान्तस्तडिदाभ:सव्यस्थितविन्दुयुक्तलाङ्गलवत् ।।
> तिर्यग्विन्दुद्वितये वामोद्गच्छत्सिराकृति: शक्ति: ।
> विन्दूदगच्छत्र्यश्राकारधरा व्यापिका प्रोक्ता ।।

ऊर्ध्वाधोविन्दुद्वयसंयुतरेखाकृति: समना ।
शैवोर्ध्वविन्दुहीनोन्मना तदूर्ध्वं महाविन्दु: ।।

शक्त्यादीनां तु वपुर्द्वादशरविकान्तिपुञ्जाभम् ।।[1] इति

कान्त्या, चाकृत्या चान्वर्थ:, अर्धचन्द्रवत्कान्तिराकारश्चेत्यर्थ: । अण्डस्थानीयौ द्वौ विन्दू सिरास्थानीयामध्यरेखा चेति त्रयं संहृत्य नादस्याकार: "विन्दुद्वयान्तरे दण्ड:शैवरूपो मणिप्रभ:" इति चक्रसंकेतोक्ते:। शैवोमुष्कद्वयमध्यवर्तिनी नाडी, मणि: पद्मराग इति तु साम्प्रदायिकी व्याख्या । दण्डस्य शैवरूपत्वविशेषणं वनता दार्ढ्ययोर्निरासाय, केशतुल्यपिष्टविकारेषु पायसोपयुक्तेषु शैवपदप्रयोगादित्यपि व्याख्या नाति विरुद्धा । ऊर्ध्वाग्रं दक्षिणारं लाङ्गलम् वामभागे विन्दुरेक इति नादान्ताकार: ।विसर्जनीयवदूर्ध्वाधो विन्दुद्वयमिति भ्रमनिरासायाम् । वामाद्वामभागस्थविन्दुमारभ्योर्ध्वं गच्छन्ती नि:सरन्ती या सिरा रेखा तदाकारेत्यर्थ: । "शक्तिर्वामस्थविन्दूद्यत्सिराकारा "इति चक्रसंकेते । आर्षत्वात् समस्तस्यापि विन्दुपदस्य पूर्वपदेन सह बहुव्रीह्यवयवत्वेन, उत्तरपदेन सह पञ्चमीतत्पुरुषावयवत्वेनापि काकाक्षिन्यायेनान्वय इति । उद्यत्पदस्य सामान्यवाचकस्यापि विन्दूद्यदिति विशेषे लक्षणायां वामस्या:द्विन्दोशक्त्या:सिराया आकारो यस्या इत्येव विगृह्य विन्दोर्वामस्थत्वविशेषणबलादेव दक्षिणादिभागे नि:सिराक एको विन्दुरस्तीति गम्यत इति व्याख्यायां वा न को पि क्लेश: । विन्दुसंस्पृष्टाग्रकतिकोणाकारा व्यापिका । "विन्दुद्वयान्तरालस्थऋजुरेखामयी पुन:। समना इति वचने शक्तिवद्विन्दुद्वयं तिर्यग्रूपं मा भूदित्यत: । संयुता अग्रमूलभागयो:संश्लिष्टा, न त्वस्पृशन्तीस्थिता । इत्थं च ब्रह्मरन्ध्र

----

1. वीरवश्यारहस्ये प्र० अंशे का० सं० 27,28,29,30

संस्थाना । इयमेव च मनोन्मनीत्यपि व्यवह्रियते । मनसो यथा वस्थितरूपस्यैव । भ्यासविशेषेणैतावत्पर्यन्तवृत्त्युद्गम: सुसाध इत्यत: समनेत्युच्यते । एतदुपरि तु रूपान्तरं प्राप्तस्यैव मनसो धृतिविषयेते- त्यत उत्क्रान्तमनस्कत्वादुन्मना । प्रकृतामुपयुक्तमप्युन्मनोपरिस्थानं चक्रराजस्य त्रिविधभावनान्तर्गतनितकलभावनायामुपयुक्तत्वम् । किन्च-

इत्येवं वर्णानां स्थानं ज्ञात्वोच्चरेत्प्रयत्नात् ।।
नाद:प्राथमिकस्तु द्वितीयकूटेन साकमुच्चार्य:।
द्वैतीयीकं नादं तार्तीयेनोच्चरेन्न पृथक् ।
विन्द्वादिनवकयोस्तु प्राक्तनकूटस्थयोरनयो:।
संमेलनेन शकलं तार्तीयीकं विभावयेत् कूटम् ।
विन्दवादिकसमनान्तं क्रमेण तार्तीयमुच्चरेन्नादम् ।।
उन्मन्यन्तर्लीनं विभावयेदेतदुच्चरणम् ।। इति

वस्तुतस्तु कण्ठाद्युत्पत्तिस्थानं मूलाधारादिस्थितिस्थानं च । यत्नादान्तरवाह्ययत्नपूर्वकम् । इदं च मानसजपातिरिक्तविषयम् । तत्तत्स्थानयत्नविभावनमात्रस्योपयोग इति नादो विन्दवादिनवकम् । पूर्वपूर्वकूटस्थनादस्योत्तरोत्तरकूटोच्चारणेनैवोच्चरितप्रायत्वान्न तत्पार्थक्येन यत्न: कालविभवो वा कार्य इत्यर्थ: । तृतीयकूटे तूत्तर- कूटाभावात्तदुभयं पेक्षितमिति ।

सौन्दर्यलहरी ग्रन्थे नादविन्द्वाद्यधिकृत्य लक्ष्मीधराचार्या:प्राेचु:-

सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां,
भजन्ति त्वां धन्या:कतिचनचिदानन्दलहरीम्।। 2

---

१. सौन्दर्यलहर्या श्लोक सं-8

सुधासिन्धोः - अमृतसमुद्रस्य । मध्ये सुरविटपिवाटीपरिवृते- सुरविटपिनां कल्पवृक्षाणां वाटीभिः पङ्क्तिभिःपरिवृते, मणिद्वीपे- मणिमये अन्तरीपे, नीपोपवनवति - नीपैःकदम्बैः उपवनवति, चिन्तामणिगृहे - चिन्तामणिविरचिते मन्दिरे, शिवाकारे शिवात्मके शक्तिरूपे त्रिकोणे इति यावत्, मञ्चे खट्वायां, परमशिवपर्यङ्कनिलयां -परमशिव एव पर्यङ्कः तल्पं, तत्र निलयः अवस्थितिर्यस्याः तां, भजन्ति- सेवन्ते त्वां भवतीं, धन्याः -त्वत्प्रसादवशात् कृतार्थाः, कतिचन - विरलाः, चिरलाः, चिदानन्दलहरीम् चित् ज्ञानं तदाकारःआनन्दःनिरतिशयसुखं तस्य लहरीं उल्लेकरूपाम् ।

अत्रेदं हे भगवति ? सुधासिन्धोः मध्ये सुरविटपिवाटी परिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे शिवाकारे मञ्चे परमशिवपर्यङ्क निलयां त्वां चिदानन्दलहरीं कतिचन धन्याःभजन्ति ।

अत्रेदं भगवत्पादाचार्याःसमयमतपारदृश्वानःसमयाचारप्रवणाःसमयरूपां भगवतीं स्तुवन्ति । समयाचारो नाम आन्तरपूजारतिः। कुलाचारो नामबाह्यपूजा रतिरिति रहस्यम् । श्रीचक्रस्य वियच्चक्रमिति नामान्तरमस्ति वियच्चक्रत्वं तु वियत्पूज्यत्वात् । वियत्पूज्यत्वं द्विविधं दहराकाशजं बाह्याकाशजञ्चेति । बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ, भूर्जपत्रशुद्धपटहेमरजतादिपट्टतले लिखित्वा समाराधनम् । एतदेव कौलपूजेत्याहुर्वृद्धाः दहराकाशजं नाम हृदयाकाशावकाशे चक्रस्य पूजनम् । इदमेव पूजेत्याहुःसमयिनः । एतदप्युत्तरत्र स्फोर्यते । तत्र नवयोनिष्वधःस्थितशिवात्मकयोनिचतुष्कस्योपरि ऊर्ध्वस्थितशक्त्यात्मकयोनिपञ्चकाधःप्रदेशस्य बैन्दवस्थानस्य नाम सुधासिन्धुरिति ।

तदुक्तम् -

विन्दुस्थानं सुधासिन्धुःपन्चयोन्यःसुरद्रुमाः।
तत्रैव नीपश्रेणी च तन्मध्ये मणिमण्टपम् ।।
तत्र चिन्तामणिकृतं देव्या मन्दिरमुत्तमम् ।
शिवात्मके महामन्चे महेशानोपवर्हणे ।।
अतिरम्यतरे तत्र कशिपुश्च सदाशिवः ।
भृतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः ।।
तत्रास्ते परमेशानी महात्रिपुरसुन्दरी ।
शिवार्कमण्डलं भित्त्वा द्रावयन्तीन्दुमण्डलम् ।।
तदुद्भूतामृतस्यन्दिपरमानन्दनन्दिता ।
कुलयोषित्कुलं त्यक्त्वा परं वर्षणमेत्य सा ।।[1] इति

देव्यामन्दिरमुत्तमम् "इत्यस्यार्थः - देवीमन्दिरं त्रयश्चत्वारिंशत् त्रिकोणात्मकं श्रीचक्रमुच्यते । अत उक्तं शिवाकारे मन्चे इति त्रिकोणात्मक श्रीचक्रस्य वैन्दवस्थानं प्रत्यङ्गत्वात्, वैन्दवस्थानस्य प्रधानत्वात् प्रधाने गुणस्यान्तर्भावात् तदन्तर्भाव उक्त इति रहस्यम् "भृतकाः" इत्यस्यार्थः -भृतकाःभृत्याः दुहिणहरिरुद्रे श्वराः । "शिवार्कमण्डलं भित्वा" इत्यस्यार्थः- शिवा नाम शक्तिःकुण्डलिनी अर्कमण्डलं हृत्कमलोपरि स्थितं भित्वा भिन्नं कृत्वा अवयुत्य आच्छाद्येत्यर्थः । अर्कमण्डलोपरि स्थितं ब्रह्म, रं विधाय सहस्त्रकमलान्तस्थितमिन्दुमण्डलं दर्शति द्रावयति । अत एव कुलयोषित् कुण्डलिनी शक्तिः कुलं कुलमार्गं सुषुम्नामार्गं त्यक्त्वा तत्रैवेन्दुमण्डले आस्थाय,परं वर्षणं उत्कृष्टवर्षणं, द्विसप्ततिसहस्त्रनाडीषु प्रवर्षणं, कृत्वेति शेषः । सा कुण्डलिनी पुनःस्वस्थानमेत्य स्वाधिष्ठानं प्राप्य स्वपितीति तात्पर्यम् । शिवा

---

1. सौन्दर्यलहर्यामष्टमश्लोक व्याख्यायां पृ०सं० 16 तमे उद्धृतम् ।

दीनां मन्त्रत्वोपधानत्वपतद्ग्रहत्वावस्थापन्नत्वं कामरूपत्वाद्देवाना-
मत्यन्तासन्नसेवार्थं घटते । इममेवार्थं संक्षेपेणोक्तवान् सदाशिवः -

सुधाब्धौ नन्दनोद्याने रत्नमण्डपमध्यगाम् ।
बालार्कमण्डलाभासां चतुर्बाहां त्रिलोचनाम् ।।
पाशाङ्कुशशराश्चापं धारयन्तीं शिवां श्रियम् ।
ध्यात्वा च हृद्गतं चक्रं व्रतस्थःपरमेश्वरीम् ।।[1]
पूर्वोक्तध्यानयोगेन चिन्तयन् जपमाचरेत् ।। इति

पुनश्चोक्तम् -

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदिमरुत्माकाशमुपरि।
मनो पि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे रहसि पत्या विहरसे ।।[2] इति

महीं पृथिवीतत्त्वं ,मूलाधारे मूले गुदस्थाने सर्वाधारभूतं चक्रं
मूलाधारभूतमिति ,तस्मिन् मूलाधारे -

सर्वाधारा मही यस्मात् मूलाधारतया स्थिता ।
तद्भावे तु देहस्य पातः स्यादुद्गमो पि वा ।।[3] इति

पृथ्वीतत्त्वात्मकस्य मूलाधारस्याभावे देहउध्वं वा गच्छेत्
अधो वा पतेदित्यर्थः । कं उदकतत्त्वम् । अपि शब्दः-स्वाधिष्ठा-
नोक्तवन्हिं समुच्चिनोति । मणिपूरे मणिपूरचक्रे ,यत्र स्थिता भगवती

----

1. सौन्दर्यलहर्यामष्टम श्लोकस्य व्याख्यायां पृष्ठे 17 तमे
2. सौन्दर्यलहर्या श्लोक सं० ९
3. सौन्दर्यलहर्यां नवमश्लोके व्याख्यायां पृ० 18 तमे उद्धृतम् ।

मणिभि: तत्प्रदेशं पूरयति, स देशो मणिपूर:। समयिनामान्तरपूजावसरे तृतीयकाले नानाविधमणिगणरचितभूषणार्पणं देव्या: कर्त्तव्यमिति रहस्यम् । हुतवहं - अग्नितत्त्वं, स्थितं प्रतिष्ठितं, स्वाधिष्ठाने स्वाधिष्ठाननामके चक्रे, कुण्डलिन्या: भगवत्या: स्वयमधिष्ठाय ग्रन्थि कृत्वा अवस्थानं स्वाधिष्ठानम् ।

यथोक्तम् -

रुद्रग्रन्थिरयं शक्ते: स्वाधिष्ठानाग्रसीमनि ।।[1] इति

यद्यप्याधारचक्रस्योपरि स्वाधिष्ठानं वर्णनीयं तथापि आकाशादितत्त्वोत्पत्तिक्रममवलम्ब्य व्युत्क्रमेण मणिपूरचक्रवर्णनं कृतमित्यनुसन्धेयम् । हृदि - हृदयाकारो नाहतनामनि चक्रे, अनाहतनाद स्थानत्वात् अनाहतनामास्य । मरुतं -मरुत्तत्त्वम्, आकाशं - आकाशतत्त्वम् । उपरि- पूर्वोक्तानामुपरि विशुद्धिचक्रे ,शुद्धस्फटीकसङ्काशत्वात् विशुद्धिनामास्य मन: मनस्तत्त्वम् ,अपशि अपिशब्द: - उक्तसमुच्चयार्थ:, भ्रूमध्ये -भ्रुवोरन्तराले आज्ञाचक्रे, अत्र आङ् ईषदर्थ: आ ज्ञानम्, ईषत् ज्ञानं यत्र ज्जायते साधकानां भगवती विषयम् । ब्रह्मग्रन्थिभेदजातिव्यग्रतया भगवत्या आज्ञाचक्रे क्षणमात्रावस्थानात् साधकानां तटिल्लेखारूपेण अवभासमानात् आज्ञाचक्रनामास्य । स्थितमिति लिङ्गव्यत्ययेन सर्वत्रानुसज्यते । सकलं सर्वम्, अपि: - समुच्चये, भित्त्वा [छित्त्वा] कुलपथं -सुषुम्नामार्गम्, सहस्रारे -सहस्रदले ,पद्मे -कमले, सह-मिलित्वा, रहसि, एकान्त, पत्या सदाशिवेन, विहरसे क्रीडसे ।।

---

1. सौन्दर्यलहर्यां नवमश्लोके व्याख्यायां पृ० 18 तमे उद्घृतम् ।

अयमर्थः - हे भगवति ? मूलाधारे महीं कं मणिपूरे हुतवहमपि, स्वाधिष्ठाने हुतवहमेव, हृदि मरुतं, आकाशमुपरि, मनोऽपि भ्रूमध्ये आकाशमपि, स्थितमिति लिङ्गव्यत्ययेन सर्वत्रानुषज्यते । सकलं कुलपथमपि भित्त्वा सहस्रारे पद्मे रहसि पत्या सह विहरसे ।

अयमाकूतम् - मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धया-ज्ञात्मकानि षट् चक्राणि । एतानि पृथिव्याग्निजलपवनाकाशमनस्तत्त्वा-त्मकानि । तानि तत्त्वानि तेषु चक्रेषु तन्मात्रतया वस्थितानि । तन्मात्रास्तु गन्धरूपरसस्पर्शशब्दात्मकाः। आज्ञाचक्रस्थितेन मनस्तत्त्वेन एकादशेन्द्रियगणःसंगृहीतः । एवमेकविंशति तत्त्वानि प्रतिपादितानि । पत्या सह रहसि सहस्रपत्रे विहरसे इत्यनेन तत्त्वचतुष्टयम् । एवं मिलित्वा पञ्चविंशतितत्त्वानि मायापर्यन्तानि मायाया युक्तत्वात् प्राकृतानि । माया महेश्वरेण संयुक्ता सती तस्य जीवभावमापादयति स जीवःप्राकृत इति । शुद्धविद्या तु सदाशिवेन युक्ता सती सादाख्या कलेति व्यवह्रियते । अतो भगवती चतुर्विंशतितत्त्वान्यतिक्रान्ता सदा-शिवेन पञ्चविंशेन सार्धं विहरमाणा षड्विंशतत्त्वात्मतामापन्ना परमा-त्मेति गीयते । एतदुक्तं भवति - सादाख्या कला पञ्चविंशेन सदाशिवेन मिलिता षड्विंशा भवति, मेलनस्य तत्त्वान्तरत्वात् । न चोभयोर्मेलन-मुभयात्मकम् । तस्य तदात्म्यरूपत्वात् तत्त्वान्तरमेवेति रहस्यम् । यत्तु श्रुतिवाक्यं "पञ्चविंश आत्मा भवति" इति तत्तु सदाशिवतत्त्व प्रतिपादनपरम् न मेलवपरमिति ध्येयम् ।

ननु बैन्दवस्थानं श्रीचक्रस्य मध्यस्थितं, शिवचक्राणां चतुर्णामुपरि शक्तिचक्राणां पञ्चानामधस्तादवस्थितत्वात्, सहस्रारपद्मस्य तु शिरस्स्थ-तत्वात् सर्वेषामुपरि वर्तमानत्वात् तस्य बैन्दस्थानत्वं नोपपद्यत इति चेत् ।

"चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
शिवशक्त्यात्मकं ज्ञेयं श्रीचक्रं शिवयोर्वपुः ।।इति[1]

इत्यादौ शक्तिचक्राणि त्रिकोणाष्टकोणदशारद्वितयचतुर्दशकोणात्मकानि पञ्च चक्राणि । शिवचक्राणि तु अष्टदलषोडशदलमेखलात्रितयभूपुरत्रयात्मकानीति । अतः शक्तिचक्राणां बाह्यतः शिवचक्राणि शिवस्य शक्तिबाह्यत्वायोगात् तानि शिवचक्राणि बिन्दुरूपेणाकृष्टा शक्तिचक्रान्तरे स्थापितानि । अतएव बिन्दुः शिवचक्रचतुष्टयात्मकः शक्तिचक्रेषु पञ्चसु व्यश्नुवानः समाप्त इति शिवशक्त्योरैक्यमिति केचित् ।

अन्ये तु - बिन्दुत्रिकोणयोरैक्यं, अष्टकोणाष्टदलाम्बुजयोः, दशारयुग्मषोडशदलाम्बुजयोः चतुर्दशारभूपुरयोरैक्यम्, अनेन प्रकारेण शिवशक्त्योरैक्यमित्याहुः। अत्र बिन्दुशब्देन शिवचक्रचतुष्टयप्रतिनिधिभूतो वर्तुलाकारो लक्ष्यते, न तु चतुष्कोणमध्यवर्ती बिन्दुः । स तु सहस्रकमलान्तर्गतः आधारस्वाधिष्ठानदशदलप्रकृतिभूतः शिवशक्तिमेलनाविष्टतनुःसादाख्यं षड्विंशं तत्त्वम् । तेन सह नादबिन्दुकलानामैक्यं नास्ति। तस्य नादबिन्दुकलातीतत्वात् । अतएव सहस्रकमलान्तर्गत चन्द्रमण्डल मध्यवर्ती सुधासिन्धुरेव भगवत्या विहरणस्थानमिति "सहस्रारे पद्मे सह रहसि पत्या विहरसे" इति सुधासिन्धोर्मध्ये" इति च श्लोकद्वयस्यैक एवार्थ इति रहस्यम् । इममेवार्थं शिव आह पार्वतीम् -

चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ।।
त्रिकोणमष्टकोणं च दशारकोणद्वयं तथा ।
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ।।

---

1. सौन्दर्यलहर्यां नवमश्लोकस्य व्याख्यायां पृष्ठे 20 तमे ।

विन्दुश्चाष्टदलं परमं पद्मं षोडशपत्रकम् ।
चतुरश्रं च चत्वारि शिवचक्राण्यनुक्रमात् ।।
त्रिकोणे बैन्दवं श्लिष्टं अष्टारे ष्टदलाम्बुजम् ।
दशारयोः षोडशारं भूगृहं भुवनाश्रके ।।
शैवानामपि शाक्तानां चक्राणां च परस्परम् ।
अविनाभावसम्बन्धं को जानाति स चक्रवित् ।।
त्रिकोणमष्टकोणं च दशकोणद्वयं तथा ।
मनुकोणं चतुष्कोणं कोणचक्राणि षट्क्रमात् ।।
मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकम् ।
अनाहतं विशुद्धाख्याज्ञाचक्रं विदुर्बुधाः ।।
तदाधारस्वरूपाणि कोणकोणचक्राणि पार्वति ।
त्रिकोणरूपिणी शक्तिः विन्दुरूपशिवः स्मृतः ।।
अविनाभावसम्बन्धः तस्माद्विन्दुत्रिकोणयोः।।इति

इतः पूर्वम् -

अधोमुखं चतुष्कोणं शिवचक्रात्मकं विदुः" इति इत्यनुसारेण अधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि"इत्युक्तिः शिवचक्राणि बाह्यानि तद्रूपे णावस्थितानि"इत्येवं परेति ध्येयम् ।।

यद्वा- कौलमतानुसारेण अधोमुखानि चत्वारि त्रिकोणानि त्रिकोशिवात्मकानि ऊर्ध्वमुखानि पञ्चत्रिकोणानि शक्त्यात्मकानि । कौलमते संहार-क्रमेण लेखने नवत्रिकोणात्मकं श्रीचक्रम् ।सम्पद्यते इति दिक् ।।

1· सौन्दर्यलहर्यां नवम श्लोकस्य व्याख्यायां पृष्टे 22 तमे
2· " " " " " "

उपसंहार:

उपसंहारः

यदा हं ग्रामादागत्य शब्दविद्यापठने प्रवृत्तो भवं तदोच्चकक्षा-
स्वध्ययने वाक्चातुर्विध्यं श्रावं-श्रावं मम जिज्ञासा दृढ़तरा समजनि,
वाणीं वा तत्त्वं किमिति यस्याश्चातुर्विध्यं तत्र-तत्र महाभाष्य-वाक्यपदीय-
भट्टनागेशीयप्रभृतिग्रन्थेषु चर्चा जाता । वाक्यपदीयस्यादौ शब्दब्रह्म इति
श्रुते सति तत्त्व ज्ञानाय मम जिज्ञासा पूर्वतो ऽपि दृढ़तरा बभूव, यदिदं
किन्नाम अक्षरं ब्रह्म इति । ततः योगेनोत्तीर्णायां व्याकरणाचार्य
परीक्षायां पूर्वजिज्ञासामाश्रित्य शोधकार्यार्थमहं प्रवृत्तो भवम्। 2 एतदर्थमेव
"तन्त्रागमेषु परादिवाणी विमर्शः" इति शोध-प्रबन्ध विषयः ममातीव
रुचिकर प्रीतिकरश्च बभूव । येनाहमस्मिन् शोधकर्मणि प्रवृत्तः ।

यतश्चायमस्मिन् व्याकरणविभागीयच्छात्रः परादि वाचां विमर्शस्तु
तन्त्रागम सिद्धान्तेन सह सम्बद्धः । कथं कारमत्र यथानुसन्धानपूर्वकं
व्याकरणविदो नुसन्धातुं शक्यत इत्यासीच्चिन्ता । परं कृपालुना तदा-
नीन्तन व्याकरणविभागीयाचार्येण डॉ० रामयत्न शुक्लेनानुकम्प्य "तन्त्रागमेषु
परादिवाणी विमर्शः" इति शोध-प्रबन्ध विषयः प्रतिष्ठितः स्वनिर्देशने नु-
सन्धातुं रक्षितश्च ।

प्रथमाऽध्याये

ममास्मिन् शोध-प्रबन्धे सन्ति किल पञ्चाध्यायाः येषु क्रमशः प्रथमा-
ध्याये तन्त्रागम शास्त्रस्य तत्त्वज्ञान पुरस्सरं व्याकरणशास्त्रेण तच्छास्त्र-
स्य सम्बन्धं सामञ्जस्यञ्चोपस्थाप्य चतुर्दश माहेश्वरसूत्राणां व्याकरणोप-
कर्तृत्वेन स्वरव्यञ्जनद्वारा वैशिष्ट्यं सार्वभौमिकत्वञ्च संसाधितम् । अष्टाध्यायी
सूत्राणां व्याख्या ग्रन्थेषु "इति माहेश्वराणि सूत्राण्यणादि संज्ञार्थानि"

सुलेखेन माहेश्वरसूत्राणां व्याकरणस्योपजीव्यत्वं व्याकरणशास्त्रस्योप-जीवकत्वञ्च सुतरां सिद्ध्यति । एवं "शिवो ऽहं अहं ब्रह्मास्मि"इत्यादि श्रुति वचनेषु "अहं पदार्थः"चतुर्दशमाहेश्वरसूत्राणामकारमारभ्य हकारपर्यन्तं गच्छन्तीं व्यापनीं ज्ञानवारिधारां स्मारयति । एतेन महावैयाकरणा-चार्याणां शैवत्वस्य दृढतापूर्वकं संस्मरणमपि सङ्गच्छते । यद्येवं तर्हि शिवसाक्षात्कारमुद्दिश्य प्रवृत्तं शैव दर्शनं व्याकरणशास्त्रस्योपजीव्यं कथन्न स्यादिति "उपक्रमोपसंहाराभ्यां तत्त्वं समधिगच्छतीति"सङ्केतेन मया-त्राध्याये विस्तारशः संक्षेपतश्च सर्वं निरूपितम् ।

द्वितीयाऽध्याये

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति सिद्धान्तमनुसृत्य व्याकरणशास्त्रस्य दर्शनपक्षस्थापनधिया द्वौ व्याकरणशास्त्रस्येतिहासः सम्यङ्मया शोधितः । नानाविध श्रुतिस्मृति ग्रन्थलोकादि प्रमाणैः व्याकरणशास्त्रस्य वैशिष्ट्यमुपपादयता तितीर्षेण येन प्राप्तस्येतिहास्य विव-रणस्य विस्तारो मया कारि । अन्ते च त्रिमुनि व्याकरणमिति विबुधा-न्निकाये तादृशं विवादेन विविधोपपत्तिभिरात्मानं स्वारस्यं संयोज्य पाणिनीय व्याकरणस्य वैशिष्ट्यं साधितम् ।"कीर्तिर्यस्य स जीवति"इति कृत्वा यत्ते केचन वैयाकरणाः किञ्चिद् व्याकरणशास्त्रमन्वाचक्षते यशोलिप्सा-नुगतम् । एवं वैज्ञानिकत्वेनादौ पाणिनीयं व्याकरणमद्यापि समग्रं विश्वं परिव्याप्योपजृम्भते । एतदेव तत्त्वं मया न स्वबुद्धिबलेन शास्त्रप्रामाण्येन चोपपादितम् ।शब्दसाधुत्व पर्यवसायिकस्य व्याकरण-शास्त्रस्य शैवदर्शने प्रवृत्तिः कथमुदिता तस्याः कारणं किं,के च आचार्याः पुरस्कृताः अभूवन्निति सर्वं निरूप्य व्याकरणदर्शन पक्षस्य शैवागमिकत्वं मयात्रोपस्थापितम् ।अत्रैव प्रकरणे मया "चत्वारि शृङ्गा त्रयो अस्य

पादा" चत्वारि वाक्परिमिता पदानी"त्यादि महाभाष्य सङ्केतमादाय वाचां चातुर्विध्यं व्याकरणप्रस्थान ग्रन्थेषु प्रस्थापितमिति सम्यङ् निरूप्य युक्तिबलेन शास्त्रप्रामाण्येन च समुपकल्पितम् ।

तृतीयाऽध्याये

परादिवाणी स्वरूपविवेचनमेवास्माकं शोधमस्तीति कृत्वा स्मि-न्नध्याये व्याकरणशास्त्रस्यास्पन्दन ग्रन्थानां महाभाष्य वाक्यपदीय लघुमञ्जूषादि नामक पक्षे पक्षं प्रस्थाप्य महापण्डितानां नागेशभट्टानां शैवागम मत स्वीकार विषये कारणनिरूपणपुरस्सरं स्वमार्गं नागेशस्यागमि-कत्वं संसाधितम् । नागेशभट्टाः परादिवाग् विमर्शादिषु शैवागम सिद्धान्त-पथ संरक्षकाः सन्तीति प्रेक्षावन्तोऽपि स्वीकुर्वन्ति । एतदेवाखिलं तत्त्व-मत्राध्याये परिशील्य तन्त्रागमव्याकरणमयोरैक्यमार्थक्यं वा गुरूणां कृपया समुपपादितम् ।

चतुर्थाऽध्याये

शैवागमे परावागेव चिच्छक्तिरूपेण निगदिता । चिच्छक्तिरेवेच्छा-ज्ञानक्रिया त्रिरूपशक्तिसंवलिता सती चराचरात्मकस्य कारणं भवति । शैव विभिन्न शैवागमशाक्तागम ग्रन्थेषु विविधोपचारैः प्रतीकैः लक्षणोपलक्षणैश्च प्रस्थापिता । एतत्सर्वं तत्त्वं समालोच्यात्रैव प्रतिपाद्य कुण्डलिनी शक्तेरेव परात्वं परायाः पर्यायत्वञ्च प्रतिपादितम् । किञ्च मूलाधार-मारभ्य सहस्रारपर्यन्तं गच्छन्ती परैवेति कुण्डलिनीः चिच्छक्तिः षट्-कमलान्युद्भावयति । अत्र अस्मिन्नेव प्रसङ्गे षट्कमलदलचक्राणां निरूपणमपि महता टौकेन कृतवानहम् । षट्चक्राणां तात्पर्यं सन्निवेशः सहस्रार एव महामणिद्वीपमध्ये मणिमय पर्यङ्के चिन्ताभावेन शक्तिसंवलितो मणिमण्ड-शायिनो शिवो एव समधिगच्छति । अतः एतत्तत्त्वनिरूपणद्वारा शैवागम-

व्याकरणागम दृष्ट्या च शिवशक्त्योः सामरस्यं परिभाष्यान्ते शिवशक्त्योः प्रकाशविमर्शत्वं शब्दार्थत्वञ्चाहं यथाशास्त्रं स्वधियैवोपस्थापितम् ।

पञ्चमाऽध्याये

अन्तिमोपदेशस्य महिमा तीव ज्यायसी विमृश्य विमृश्य पञ्चमाध्याये ऽन्त्याध्याये पदनिरूपितानां परादिवाक् सम्बन्धि तत्त्वानां सम्यङ्•निरूपणं मयोपकल्पितम् । अत्र प्रसङ्•ग दौ शैवागम दृष्ट्या शब्दार्थयोः स्वरूपं विविच्य शब्दसृष्टिवादः अर्थसृष्टिवादश्चोपपादितः । गम्भीरायासेन वैयाकरणानां स्थापितस्य स्फोटतत्त्वस्य पर्यवसानं परातत्त्वे मध्यमा वाचि वा भवतीति शास्त्रगर्भितां सरणिं प्रदर्श्य स्फोटतत्त्वस्थानादूर्ध्वे एव स्थितिः परायामेवान्तर्भावयेति सम्यङ्•केतितम् ।अत्रैव प्रसङ्•गे परायामेव नादतत्त्वस्यानुसन्धानं विधाय वरिवस्यारहस्य -सौन्दर्यलहरी ग्रन्थकाराणां तत्र भवतां भास्करराय-आद्यशङ्•कराचार्य-लक्ष्मीधराचार्याणाञ्च स्वारस्यमत्र महता तेन च मया सर्वं स्वशक्त्या गुरूणां कृपाभिश्च यथायथमुपपादितमिति एतेन तत्त्वज्ञाना यदि भवति किल स्वल्पतरो पि प्रमोदः तर्हि श्रमो मे सान्यशिष्यवरेषु समर्प्य सानन्दं विरमामि ।

।। इति शम् ।।

परिशिष्टम्

शोधप्रबन्धे सहायकाः ग्रन्थाः ग्रन्थकाराणां नामानि च

ग्रन्थाः	ग्रन्थकार नामानि
[अ]	
अथर्ववेदः	
अष्टाध्यायी	पाणिनिः
अमरटीकासर्वस्वम्	
अक्षरतन्त्र भूमिका	
[आ]	
आश्वलायनगृह्यसूत्रम्	आश्वलायन ऋषिः
[इ]	
इत्सिंग की भारत यात्रा	इत्सिंग
ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी	आचार्य अभिनवगुप्ताः
ईश्वरप्रत्यभिज्ञा	उत्पलाचार्य
[उ]	
उणादिवृत्तिः	उज्ज्वलदत्तः
[ऐ]	
ऐतरेयोपनिषद्	
ऐतरेय ब्राह्मणः	
ऐतरेय आरण्यकः	
[क]	
कविकल्पद्रुमः	
कथासरित्सागरः	
कङ्कालमालिनीतन्त्रम्	

कात्यायनप्रातिशाख्यम्	
नन्दिकेश्वरकाशिका	नन्दिकेश्वराचार्यः
कामधेनुतन्त्रम्	
कृष्णचरितम्	समुद्रगुप्तः
कुलार्णवतन्त्रम्	
कुलगुह्वरतन्त्रम्	
कुलमूलावतारः	
केनोपनिषद्	
[गा]	
गणरत्नमहोदधिः	वर्धमानः
गरुडपुराणम्	व्यासः
गन्धर्वतन्त्रम्	
गणरत्नावली	
गीतासारः	प्रकाशक- भण्डारकर पूना संग्रहालयः
गीताशाङ्करभाष्यम्	भगवान्- शङ्कराचार्यः
गोपथ ब्राह्मणम्	
गोभिलगृह्यसूत्रम्	
[च]	
चरकसूत्रम्	
चर्वाकिरः	
चान्द्रव्याकरणम्	चन्द्रगोमिः
चिकित्सास्थानम्	जज्जटः
[छ]	
छान्दोग्योपनिषद्	

[ज]

ज्योतिर्विदाभरणम्

[ट]

टेक्निकल टर्म्स आफ संस्कृतग्रामर उल्लेख:-युधिष्ठिर मीमांसक द्वारा

[त]

तन्त्रालोक: अभिनवगुप्तपादाचार्य:

तन्त्रप्रदीपम्

तन्त्रप्रभाव:

तन्त्रसङ्ग्रह:

तन्त्रसार: अभिनवगुप्तपादाचार्य:

तापनीयोपनिषद्

तैत्तिरीय संहिता

तैत्तिरीय प्रातिशाख्यम्

[द]

द्वादशारनयचक्रम्

दुर्गनिरुक्त वृत्ति:

[ध]

धातुवृत्ति: माधवाचार्य:

धातुप्रदीप:

ध्यानबिन्दूपनिषद्

[न]

नादकारिका श्रीरामकण्ठाचार्य:

नारदसंहिता महर्षिनारद:

नान्दीसूत्रम् मलयगिरि:

न्यायसिद्धान्तमुक्तावली आचार्य विश्वनाथ भट्टाचार्य:

न्यास: हरदत्त:

न्यायमञ्जरी	मण्डनमिश्रः
निरुक्तः	यास्कः
निर्णयसिन्धुम्	
॥प॥	
पदमञ्जरी	
परात्रिंशिका	आचार्याभिनवगुप्ताः
पराप्रावेशिका	आचार्य क्षेमेन्द्रः
परिभाषावृत्तिः	
प्रपञ्चसारतन्त्रम्	श्रीमच्छङ्कराचार्यः
प्रयोगसारः	
प्रपञ्चसारतन्त्रम्	
प्रबन्धचिन्तामणिः	
प्रश्नोपनिषद्	
प्रक्रियाकौमुदी	
प्रक्रियासर्वस्वम्	
प्रक्रियामञ्जरी	
पाणिनीय शिक्षा	महर्षिः पाणिनि
पार्श्वनाथचरितम्	
पुरुषकारः	
पुरुषसूक्तः	ऋग्वेदः
प्रौढमनोरमा	भट्टोजिदीक्षिताः
॥ब॥	
ब्रह्मसूत्रशाङ्करभाष्यम्	जगद्गुरुशङ्कराचार्यः
ब्रह्मबिन्दूपनिषद्	
ब्रह्मवैवर्तपुराणम्	व्यासः
बृहदारण्यकोपनिषद्	

[भ]	
भट्टिकाव्यम्	श्रीनारायणभट्टः
भाषावृत्तिः	
भाषावृत्त्यर्थवृत्तिः	श्रीसृष्टिधराचार्यः
भारतकौमुदी	
भारतवर्ष का बृहद् इतिहास	
भोजप्रबन्धकाव्यम्	भोजदेवः
[म]	
मनुस्मृतिः	मनुः
मत्स्यपुराणम्	व्यासः
महाभारतम्	"
मालिनीविजयोत्तरतन्त्रम्	आचार्यअभिनवगुप्तपादानांशैवः
मातृकानिघण्टुः	
मातृकाचक्रविवेकः	
मुण्डमालातन्त्रम्	
मृगेन्द्रागमः	
मैत्रेयीसंहिता	
[य]	
यजुर्वेदः	
यजुःप्रातिशाख्यम्	
यशस्तिलकचम्पू	
यामलाष्टकम्	
योगसूत्रवृत्तिः	
योगकुण्डल्युपनिषद्	
योगिनी हृदयम्	

[र]

रघुवंशमहाकाव्यम्	कालिदासः
रत्नत्रयम्	
रसगंगाधरः	पं०राजजगन्नाथः
राजतरंगिणी	कल्हणः
रूपावतारः	
रुद्रयामलम्	
ऋग्वेदः	
ऋक्तन्त्रम्	
ऋग्वेदभाष्यम्	सायणः महीधरश्च
ऋक्प्रातिशाख्यम्	

[ल]

लघुस्तवः	
लघुशब्देन्दुशेखरः	नागेशभट्टः
लिङ्गानुशासनम्	महर्षिपाणिनिः

[व]

वरिवस्यारहस्यम्	भास्कररायः
वाचस्पत्यम्	चौखम्बा प्रकाशनम्
वाजसनेयि संहिता	
वाक्यपदीयम्	भर्तृहरिः
वाजसनेयि प्रातिशाख्यम्	
वाल्मीकि रामायणम्	महर्षिवाल्मीकिः
वायुपुराणम्	
वातुलागमव्याख्यानम्	
व्याकरणदर्शनेर इतिहास	गुरुपद हाल्दार :
विरूपाक्षपञ्चाशिका	

विक्रमाङ्कदेवचरितम्	बिल्हण:
विज्ञानेन्दु कौमुदी	
विज्ञानोत्तरतन्त्रम्	
वीरमित्रोदय:	मित्रमिश्र:
वैयाकरण भूषणसार:	कौण्डभट्ट:
वैयाकरणसिद्धान्तलघुमञ्जूषा	नागेशभट्ट:
व्याकरणमहाभाष्यप्रदीपोद्योतसहितम्	भगवान् पतञ्जलि:
व्युत्पत्तिवाद:	
(श)	
शब्दशक्तिप्रकाशिका	
शब्दकौस्तुभ:	भट्टोजिदीक्षित:
शाङ्करभाष्यम्	भगवत्शङ्कराचार्य:
शाक्तानन्दतरङ्गिणी	डॉ० रघुनाथ त्रिपाठी–सम्पादित
शारदातिलकम्	लक्ष्मणदेशिकेन्द्र:
शिवलीलार्णव:	श्रीनीलकण्ठदीक्षित:
शिवदृष्टि:	सोमानन्दनाथ:
शिशुपालवधमहाकाव्यम्	महाकवि माघ:
श्रीतत्त्वचिन्तामणि	
श्रीकण्ठीसंहिता	श्रीकण्ठाचार्य:
श्रीमद्भागवतम्	व्यास:
(स)	
सङ्केतपद्धति:	
सकलजननीस्तव:	
संवित्प्रकाश	
संस्कृतव्याकरणशास्त्र का इतिहास	युधिष्ठिरमीमांसक:

संक्षिप्तसागरः	गोपीचन्द्रः
स्वच्छन्दतन्त्रम्	
स्वच्छन्दोद्योतः	
स्वच्छन्दभैरवतन्त्रम्	
स्वरसिद्धान्तचन्द्रिका	
स्कन्दपुराणम्	व्यासः
स्कन्दप्रदीपिका	
सामवेदः	
सामवेद सर्वानुक्रमणी	सत्यव्रतः
सारस्वतव्याकरणम्	अनुभूतिस्वरूपाचार्यः
सारस्वतप्रक्रिया	क्षेमेन्द्रः
सारस्वती सुषमा	शोधपत्रिका, स०सं०वि०वि०, वाराणस्याम्।
सांख्यकारिका	ईश्वरकृष्णः
सांख्यप्रभा	ईश्वरकृष्णरचितायाः सांख्यकारिकायाष्टीका टीकाकारः-डॉ०अम्बिकाप्रसाद मिश्र
सिद्धान्तकौमुदी	भट्टोजिदीक्षितः
सिद्धहैमशब्दानुशासनम्	चन्द्रसागरसूरिः
सिद्धान्तरहस्यसारः	
स्वोपज्ञवृत्तिः	चन्द्राचार्यः
सौभाग्यसुधोदयः	गौडपादाचार्यः
सौन्दर्यलहरी	शङ्कराचार्यः

(ह)

हठयोगप्रदीपिका

हैमबृहल्लघुचूर्णिका

हैमबृहद्वृत्तिः

(क्ष)

क्षीरतरङ्गिणी

(त्र)

त्रिकाण्डशेष कोशः

रुक्मानीमिश्रः
३२२/८२ परीक्षकः
२८।१२।८२